SUBJECTS OF EXAMINATION

IN

SANSKRIT

APPOINTED BY

The Senate of the Calcutta University

FOR THE

FIRST EXAMINATION IN ARTS

BEING THE FIRST EIGHT CANTOS OF THE RAGHUVANSA

AND THE FIRST FIVE CANTOS OF THE BHATTIKAVYA

EDITED WITH

Copious notes, commentaries, English and Bengali Translations, Sanskrit paraphrase, conjugations of verbs & &

BY

Nilmani Mukhopadhyàya, Nyàyalankàra M A B L

Asst. Professor of Sanskrit, Presidency College

New Edition

REVISED BY

Nrisinha Chandra Mukhopadhyàya Vidyaratna, M A B L

CALCUTTA.

Printed by B L Chakravarti.—The New School-Book Press

No 8 Dixon's Lane

1880



Published by
Sasi Bhusana Chattopadhyaya, Vidyavachaspati.

ADVERTISEMENT

OF A

New Edition.



About three years ago Babu Nilmani Mukerjea, M. A., B., L., Assistant Professor of Sanskrit, Presidency College, brought out an annotated edition of the above which comprised the commentary of Mallinatha on the selected portions of the Raghuvansa, and an English translation of, and a new Sanskrit commentary on, those of the Vattikavya.

He has issued a new, revised, and enlarged edition of the above. In addition to what was included in the first edition, the present one comprises a Bengali translation, and a Sanskrit paraphrase (अन्वय) of the entire text together with the conjugations of verbs found therein. By far the most important portion of the present edition, however, is the English translation of the Raghuvansa which has had the advantage of a thorough revision by Professor C. H. Tawney Esqr., M. A., to whom also the editor is, as was acknowledged in the 1st Edition, indebted for his translation of the first three cantos of the Bhattikavya.

With a view to further enhance the usefulness of the present publication, exercises of the choicest and most varied description have been appended to test the progress of the learner at the different stages of his study.

Publisher.

शुद्धिपत्रम् ।

रघुवंशम् ।

पृष्ठा—पंक्ति	अशुद्धम्	शुद्धम्
८ १	सम्भृतार्थानाम्	सम्भृतार्थानाम्
१२ २३	राज्ञोः	राज्ञः
२८ ३	जज्वनाम्	यज्वनाम्
३८ ३	पूर्वैः	पूर्वैः
५३ ५	आशाश्च	आशासु
६० ३	दयार्द्रं भावम्	दयार्द्रभावम्
८७ ६	भूमेर्धूरम्	भूमेर्धुरम्
१४१ १	चापमुत्कृष्य	चापमुत्कृष्य
१७६ २०	नतु त्रेतायामिति टीकाकारोक्तं द्रष्टव्यम् ।	नतु त्रेतायामतः टीकाकारोक्तं त्रिरुक्तम् ।
२५७ ७	आरोप्यचक्रभ्रमम्	आरोप्य चक्रभ्रमम्
२५८ १	महाकाल निकेतनस्य	महाकालनिकेतनस्य
२७४ ४	ृमाङ्गरागः	क्तृमाङ्गरागः
२७६ १	विमद	विमर्द
२७८ २	केयूरबन्धोच्छ्वसितैः	केयूरबन्धोच्छ्वसितैः
२१२ २	बालारुणोभूद्रुधिरप्रवाहः	बालारुणोऽभूद्रुधिर-प्रवाहः

शुद्धिपत्रम् ।

भट्टिकाव्यम् ।

पृष्ठा—पंक्ति	अशुद्धम्	शुद्धम्
४ १५	युष्टः	घुष्टः
७ ३	ज्वल	ब्बल
१५ १	तत्वानि	तत्त्वानि
४१ २	इत्यम्	ह्रत्यम्
४८ ८	अङ्के स्थलम्	अङ्केऽस्थलम्
७५ १	भूमिपतेः	भूंमिपतेः
१०६ २	सर्व्वाङ्गीनं	सर्व्वाङ्गीपे
१०६ ३	ग्राङ्गीकः	ग्राङ्गिकः
१४४ ५	यानोपोत्	यानगोपोत्

PREFACE.

In preparing this edition of the new Sanskrit [illegible] the First Examination in Arts, the editor has spared no pains to adapt it to the capacities of University-candidates. The first eight cantos of the Raghuvansa are published with the commentary of Mallina'tha, as is found in the several Calcutta editions. On comparing these editions with the recent one which forms a part of the Bombay Sanskrit series, the editor has found that the former are not genuine; they contain here and there interpolations from other commentators, and not unfrequently authorities are quoted and lexicons citied, which are not found in the Bombay edition,—an edition admitted to be a faithful transcript of Mallina'tha's commentary. It is not therefore unlikely that *pandits* as they lectured on the poem, should have considered it necessary to make additions from time to time to the very popular commentary of Mallina'tha, for the better elucidation of particular stanzas. It would be curious to make a collection of those interpolations and additions interspersed throughout the entire work; but that would be foreign to the scope of such an edition as the present.

Notwithstanding this, the editor has followed the Calcutta recension, because now and then it is more explanatory, and will prove on the whole better suited to the requirements of University-candidates. He has, however, availed himself of the Bombay edition in correcting errors that were found in those published in Calcutta. Copious notes are appended for the

it is valued more for its well-chosen grammatical illustrations than for its poetical excellencies. In a commentary on such a work then, grammar ought not to be dispensed with, but should be introduced so far as is requisite for a thorough understanding of its peculiar diction. University students have not at their disposal sufficient time to go through one of the existing Sanskrit grammars, and what they learn of grammar is necessarily insufficient and imperfect. In a grammatical point of view then, the usefulness of the study of the Bhattikavya to them, cannot be overrated.

An English translation is subjoined at the end of each canto, with a view to serve the double purpose of giving the learner an insight into correct English translation, as well as of throwing an additional light on the text. The editor has always entertained rather peculiar views on the subject of translation. As on the one hand, to clothe the sense of the author in a new garb without imitating the characteristics of his style, would be too free, so on the other, to supply synonyms adhering strictly to the manner of expression, and the arrangement of words in the text, would be too literal. Holding such an opinion on the subject, the editor would have suppressed his translation of the Bhattikavya, but for the valuable assistance of Mr. C. H. Tawney M. A. Professor of English Language and Literature in the Presidency College, who kindly looked over, and in certain places, retouched the translation of the first two cantos, and himself rendered the greater part of the third canto into English. His acknowledgments are also due to Mr. J. Van. Pope M. A., another professor of the College, for his having looked over the remaining cantos of the poem. In preparing the text of the

Bhattikavya, the editor has followed the two Calcutta editions, in as much as their correctness has never been disputed in this particular; and since it was not his purpose to publish one of the existing commentaries, he deemed it superfluous to collate manuscripts.

It would not be out of place here to say a few words about the authorship of the Bhattikavya. But it is desirable at the outset to disentangle the subject from certain misconceptions, with which it is interwoven. The poem is fathered on Bhattanaráyana, one of the five Bráhmans, who were invited by king Adisura from Kanyakubja in the year 969 of the Saka era, corresponding with 1077 A. D. Bhattanaráyana, it should be borne in mind, was the progenitor of the Bandyopadhyayas in Bengal; and it is not possible that whilst there is no dispute about his being the author of the Venisanhara, there should exist no trace of a tradition to connect his name with the Bhattikavya—a work decidedly more popular in Bengal than the other. Another theory would ascribe the poem to Bhatti, who is said to have been the step-brother and Prime-minister of king Vikramaditya. Both the above hypotheses are based on a mere conjecture, originating, it should seem, in the belief, that as the poem is entitled Bhatti, it should be connected with some personage from whose name the term could be safely derived.

Against these suppositions, it might be urged that in the first place, they are opposed to the common tradition, which would connect the Bhattikavya with the name of Bhartrihari; and that in the second place, they do not tally with the description the poet gives of himself at the end of the work. He states that he composed the poem under the patronage of the son of Sridhara, who was the king of Balabhi. Now it is unlikely

that Bhattanàràyana who was at first a resident of Kanyakubja, and then settled in Bengal, should have lived at Balabhi in Guzrat, and written there one of the largest epics in Sanskrit. Nor is it consistent to suppose that Bhatti, who was the brother and Prime-minister of Vikramàditya should have described himself as writing under the auspices of a rival king, a work, which in the nature of things must have been the production of a long laborious literary life.

Here the question presents itself,—was the author of the Bhattikàvya, identical with that Bhartrihari who wrote the three or four Satakas or "Centuries of poems" and was the brother of Vikramàditya, the founder of the Samvat era? Now all that is known of this Bhartrihari militates against that supposition. He was a prince who led at first a gay, voluptuous life, and then disgusted with it by the infidelity of his wife, renounced the world and became a *sanyasi*. It is therefore opposed to all human experience that such a bulky and learned work as the Bhattikàvya, should have come from the pen of a prince, addicted to pleasures, or of an ascetic retired from the world. Moreover, what the poet says concerning himself at the end of the work does not tally with the supposition, above adverted to. The editor is supported in his views by the authority of the well-known Pandit Isvarachandra Vidyáságara to whose essay on Sanskrit Literature the reader is referred for further information on the subject. In his Essay on Sanskrit and Prakrita poetry, Colebrooke speaks thus: "The author was Bhartrihari; not, as might be supposed from the name, the celebrated brother of Vikramaditya, but a grammarian and poet, who was son of Sridhara Svami, as we are informed by one of his scholiasts, Vidyavinoda" * So

* Essays vol II. p. 116.

that it is evident that the supposition which would make the author of the Bhattikavya indentical with the Bhartrihari of the *Satakas* rests on a mere conjecture, originating in an identity of names alone.

Kasinath Trimback of Bombay in the introduction to his valuable edition of Bhartrihari *Satakas* coincides with Colebrooke in thinking that the Bhattikávya and the *Satakas* are not the productions of the same mind ; but he affirms that the author of the *Satakas* wrote the Vàkyapadiya—a big-work in verse on grammar—and was the brother of that Vikramáditya who was the founder of what is commonly known as the *Saka* or Salivahana era, and flourished about 78 A. D. Now this confounding of the brother of Vikramaditya with the writer of the grammatical work just alluded to, is open to all the objections taken to the supposition which would indentify him with the author of the Bhattikavya. Moreover there is a cogent argument against the affirmation of Kasinath Trimback. The writer of the Vakyapadiya prefaces his work thus :—"The Principles of grammar, embodied in the Mahabhashya of Patanjali had fallen into disuse, so much so, that in course of time, only one copy of that great work was left extant in the Deccan. Chandracharyá and others afterwards learned the science of grammar from Parvata, and amplified it into various *sakhas* or branches. Then my preceptor Vasuráta wrote a compendium of the same, and at his desire I have written this work (Vakyapadiya), so that the science of grammar as is treated in the Bhashya might not die out." *

Now, this description indicates a long line of descent be-

* Preface to Panini by professor Tarunatha Tarkavachaspati.

tween Chandracharya and the author of the Vakyapadiya. But Chandracharya and his colleagues are said in the Rajatarangini to have flourished in the reign of Abhimanyu (king of Kasmir) who, according to the chronology of Prof Lassen, reigned between 45 and 65. A. D." How then is it possible that the author of the Vàkyapadiya should have been the brother of the Vikramaditya of Salivahana era? The above considerations leave no other alternative than to conclude that the Vakyapadiya and the Satakas are not the productions of the same mind. It may be observed here in passing that much more absurd is the conclusion of those who would argue that the author of the Vakyapadiya was the brother of the Vikramaditya of the Sambat era, who flourished about 56. B. C.

Without entering into the question, whether the author of the Satakas was the brother of the first, or the second Vikramaditya, it is patent that there are three Bhartriharis in the field ; the one was the brother of a Vikramaditya and the author of the Satakas ; the other, the writer of the Vakyapadiya ; and the third, the author of the Bhattikàvya. Now the question naturally presents itself—what objection can there be to the supposition that the two grammatical poems have come from the same pen ? No known fact in the history of ancient India militates against this conclusion, which is further confirmed by the nature and scope of the two works. The Vakyapadiya embodies the principles of the Mahabhashya, while the Bhattikavya furnishes illustrations of them, and thus forms a supplement to the former ; so that the one without the other could not be considered complete. This circumstance, coupled with the identity of names establishes, beyond all reasonable doubt, an identity of authorship.

The internal evidence supplied by the diction and the style of the Bhattikavya, favours the supposition that, this Grammarian poet was anterior to Ba'na, who flourished in the 7th century of the Christian era. And as it is affirmed by Bhartrihari himself in the preface to his Vakyapadiya, that he followed in the wake of the revival of the Mahâbhashya, the editor would not be far wide of the mark, in supposing that, he flourished in the third century, and about the middle of the second period of Sanskrit poetry, which commenced with Kalidasa and ended with Bana.

Presidency College.
Calcutta.
The 25th November 1877.

N. M. Mukerjee.

टीकाकृतो मङ्गलाचरणम्

मातापित्रभ्यां जगतो नमो वामाङ्गजानये ।
सद्योदक्षिणदृक्पातसंकुचद्वामदृष्टये ॥ १ ॥

अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
तं नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥२॥

शरणं करवाणि शर्म मे तं चरणं वाणि ! चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः कुरु मामम्ब ! कृपार्थसार्थवाहम् ॥३॥

वाणीं काणभुजीमजीगणदवाग्यासीच्च वैयासिकीम्
अन्तस्तन्त्वमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाकलयद्रहस्यमखिलं यद्याचपादस्फुरां
लोकेऽभूदुपपन्नमेव विदुषां सौजन्यजन्यं यशः ॥ ४ ॥

मल्लिनाथकविः सोऽयं मन्दाक्रातुजिघृक्षया ।
व्याचष्टे कालिदासीयं काव्यत्रयमनाकुलम् ॥ ५ ॥


कालिदासो गिरां सारं कालिदासः सरस्वतीम् ।
चतुर्मुखो यथा साक्षाद्विदुर्नान्ये तु मादृशाः ॥ ६ ॥

तथापि दक्षिणावर्त्तं नाद्याद्यैः चुम्बतां सुधाम् ।
वयञ्च कालिदासोक्तिष्ववकाशं लभेमहि ॥ ७ ॥

भारती कालिदासस्य दुर्व्याख्याविषमूर्च्छिता ।
एषा सञ्जीवनी टीका तामद्योज्जीवयिष्यति ॥ ८ ॥

इहान्वयमुखेनैव सर्व्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चित् नानपेक्षितमुच्यते ॥ ९ ॥

रघुवंशम्।



प्रथमः सर्गः।

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्व्वतीपरमेश्वरौ ॥१॥

इह खलु सकलकविगिरीमणिः कालिदासः, "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे" इत्यालङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकप्रयोजनसाधनतां, "काव्यालापांश्च वर्जयेत्" इत्यस्य निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन् रघुवंशाख्यं महाकाव्यं चिकीर्षुः, 'चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनभूतविशिष्टदेवतानमस्कारस्य शिष्टाचारपरिप्राप्तत्वात् "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इत्याशीर्वादात्मकतमस्य प्रबन्धमुखलक्षणत्वात् काव्यनिर्माणस्य विशिष्टशब्दार्थप्रतिपत्तिमूलकत्वेन विशिष्टशब्दार्थयोश्च "शब्द

जातमग्रेपन्तु धत्ते शर्व्वस्य वल्लभा। अर्द्धरूपं यदखिलं धत्ते मुग्धेन्दुशेखरः" इति वायुपुराणसंहितावचनबलेन पार्व्वतीपरमेश्वरायत्तत्वदर्शनात् तत्प्रतिपित्सया तावेवाभिवादयते वागर्थाविति। वागर्थौइत्येकं पदम्। इवेन सह नित्यसमासो विभक्त्यलोपश्च पूर्व्वपदप्रकृतिस्वरत्वञ्च वक्तव्यम्। एवमन्यत्रापि द्रष्टव्यम्। वागर्थौइव शब्दार्थौइव सम्पृक्तौ नित्यसम्बद्धौ इत्यर्थः। नित्यसम्बद्धयोरुपमानत्वेनोपादानात्। "नित्यः शब्दार्थसम्बन्धः" इति मीमांसकाः। जगतः लोकस्य पितरौ माता च पिता च पितरौ। पिता मात्रेतिद्वन्द्वैकशेषः। "माता-पितरौ पितरौ" इत्यमरः। एतेन शर्व्वशिवयोः सर्व्वजगज्जनकतया वैश्विध्यमिष्टार्थप्रदानयोग्यता परमकारुणिकत्वञ्च सूच्यते। पर्वतस्य अपत्यं स्त्री पार्व्वती। तस्यापत्यमित्यण्, टिड्ढाणञित्यादिना ङीप्। पार्व्वती च परमेश्वरश्च पार्व्वतीपरमेश्वरौ परमयष्टः सर्व्वोत्तमत्वद्योतनार्थः। मातुरभ्यर्हितत्वात् अस्याक्षरत्वाच्च पार्व्वतीशब्दस्य पूर्व्वनिपातः। वागर्थप्रतिपत्तये शब्दार्थयोः सम्यग्ज्ञानार्थं वन्दे अभिवादये। अत्र उपमालङ्कारः स्फुट एव। तथोक्तम्। "स्वतः सिद्धेन भिन्नेन सम्यन्धेन च धर्म्मतः। साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकगोपमा" इति। प्रायिकयोपमालङ्कारः कालिदासोक्तकाव्यादौ। भूदेवतावाचकस्य सर्व्वगुरोर्मंगलस्य प्रयोगात् शुभलाभः सूच्यते (१)

---

(१) सर्वार्थौ श्री भूमि त्रिदेवः त्रिवं दिवति यो इति सर्वं चादिवी, रीतिवंशलक्षणं नाम अदिवी ईकारटं वीजमः। सी श्रीमालवपुर्वंशावतरस्थं जोडी-। एवं सम्बन्ध, अवदी दव सम्बन्धं हुवदुव भोगाव चापुलिवः।

क्व सूर्य्यप्रभवोवंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥ २॥

तदुक्तम् "शुभदो मो भूमिमयः" इति। वकारस्यामृतबीजत्वात् प्रचयगमनादिसिद्धिः (२)॥ १॥

सम्प्रति कविः स्वाहङ्कारं परिहरति क्व सूर्य्येत्यादिश्लोकद्वयेन, क्वेति। प्रभवति अस्मात् इति प्रभवः कारणम्। ऋदोरप् अकर्त्तरि च कारके संज्ञायामिति साधुः। सूर्य्यः प्रभवो यस्य सः सूर्य्यप्रभवः वंशः क्व, अल्पः विषयः ज्ञेयोऽर्थो यस्याः सा मे मतिः प्रज्ञा च क्व। द्वौ क्वशब्दौ महदन्तरं सूचयतः। सूर्य्यवंशमाकलयितुं न शक्नोमीत्यर्थः, तथाच तद्विषयप्रबन्धनिरूपणं दूरापास्तमिति भावः। तथाहि दुस्तरं तरितुम् अशक्यम्। ईषद्दुःसुष्वितयादिना खल्प्रत्ययः। सागरं मोहात् अज्ञानात् उडुपेन प्लवेन। "उडुपन्तु प्लवः कोलः" इत्यमरः। अथवा चर्म्मावनद्धेन पानपात्रेण। "चर्म्मावनद्धमडुपं प्लवः काष्ठं करण्डवत्" इति सज्जनः। तितीर्षुः तरीतुम् इच्छुः अस्मि भवामि। तरतेः सन्नन्तात् उप्रत्ययः। अल्पसाधनैरधिकारम्भो न सकर इति भावः। इदञ्च वंशोत्कर्षकथनं स्वप्रबन्ध-

(१) उडून् पातीति उडुपवत्। प्लवः पानपात्रञ्च अर्द्धचन्द्राकारं भवतीति उडुपपदेनाभिधीयते।

(२) "वौ वायौ वारणे सूक्ष्मा। वरणो मेघसंघातः वद्यौगी व्याप्तिनी वज्रं कवची वारिवाचकः" इति तन्त्रसारवचनात् वकारस्य अमृतबीजत्वं (जलबीजत्वं)। तथाच यथा जलं प्रचयेन (पूरेण) गच्छति (प्रवहति) तद्वत् इदं काव्यमपि यशसा प्रचीयमानं लोके प्रचारितं भविष्यतीति तात्पर्य्यार्थः।

मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥ ३ ॥
अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥ ४ ॥

महत्त्वार्थमेव । तदुक्तम् 'प्रतिपाद्यमहिम्ना च प्रबन्धो हि महत्तरः' । इति ॥ २ ॥

मन्द इति । किंच मन्दः मूढः । "मूढाल्पापटुनिर्भाग्य मन्दाः स्युः" इत्यमरः । तथापि कवियशःप्रार्थी कवीनां यशः काव्यनिर्माणेन जातं तत्प्रार्थनाशीलः अहं प्रांशुना उन्नतपुरुषेण लभ्ये प्राप्ये फले फलविषये लोभात् उद्बाहुः फलग्रहणाय ऊर्ध्वीकृतहस्तः वामनः खर्वः इव । "खर्वो ह्रस्वश्च वामनः" इत्यमरः । उपहास्यताम् उपहासविषयताम् । "तद्धलोर्ण्यदिति ण्यत्प्रत्ययः । गमिष्यामि प्राप्स्यामि ॥ ३ ॥

मन्दधेत् तर्हि त्यज्यतामयमुद्योग इत्यत आह, अथवेति । अथवा पक्षान्तरे पूर्वैः सूरिभिः कविभिः वाल्मीकादिभिः कृतवाग्द्वारे कृतं रामायणादिप्रबन्धरूपा या वाक् सा एव द्वारं प्रवेशो यस्य तस्मिन् सूर्यप्रभवे वंशे कुले । जन्मनैकसन्तानः सन्तानः वंशः । वज्रेण मणिवेधकसूचीविशेषेण । "वज्रं स्त्री कुलिशप्रभेदयोः । मणिवेधे रत्नभेदे" । इति केशवः । समुत्कीर्णे विद्धे मणौ रत्ने सूत्रस्य इव मे मम गतिः सञ्चारः अस्मिन् वर्णनीये रघुवंशे मम वाक्प्रसरोऽस्तीत्यर्थः ॥ ४ ॥

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥ ५ ॥
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥ ६ ॥

एवं रघुवंशे लब्धप्रवेशस्तद्वर्णनां प्रतिजानानः सोऽहमित्यादिभिः पञ्चभिः श्लोकैः कुलकेनाह, सोऽहमिति। सः अहं रघूणाम् अन्वयं वक्ष्ये इत्युत्तरेण सम्बन्धः। किंविधानां रघूणाम् इत्यत्र उत्तराणि विशेषणानि योज्यानि। आजन्मनः जन्म आरभ्येत्यर्थः। आङ्मर्यादाभिविध्योरित्यव्ययीभावः। शुद्धानाम्। सुप्सुपेति समासः। एवमुत्तरत्रापि द्रष्टव्यम्। आजन्मशुद्धानां निषेका (२) दिसर्वसंस्कारसम्पन्नानामित्यर्थः। आफलोदयम् आफलसिद्धेः कर्म येषां ते तथोक्ताः तेषां प्रारब्धान्तगामिनामित्यर्थः। आसमुद्रं क्षितेः ईशानां सार्वभौमानामित्यर्थः। आनाकं रथवर्त्म येषां ते तेषाम् इन्द्रसहचारिणामित्यर्थः। अत्र सर्वत्र आङोऽभिविध्यर्थत्वं द्रष्टव्यम्। अन्यथा मर्यादार्थत्वे जन्मादिषु शुद्धाभावप्रसङ्गात् ॥ ५ ॥

यथाविधीति। विधिम् अनतिक्रम्य यथाविधि। यथा-

---

(१) स्वाध्याय पश्चिमे यामे कृतशौच समाहित।
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत् स शुभां सभां ॥ मनु। ७। १४५ ॥

(२) "निषेकादि श्मशानान्त यस्य वेदोदितोविधि।
तस्य शास्त्रेऽधिकारोऽस्मिन् नान्यस्यैव कदाचन" ॥ इति मनुस्मरणात् निषेकस्य कर्माधानस्य यौगपद्येन वेदोदितनियमवत्त्व, स च परम्परया मातृजठरे स्थितस्यापि भवतीति भाव।

त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥ ७ ॥

साट्श्य इतरव्ययीभावः, तथा हुतशब्देन सुप्सुपेति समासः । एवं यथाकामार्चितेत्यादीनामपि द्रष्टव्यम् । यथाविधि हुताः अग्नयो यैः तेषां, यथाकामम् अभिलाषम् अनतिक्रम्य अर्चितार्थिनां, यथापराधम् अपराधम् अनतिक्रम्य दण्डो येषां ते तेषां, यथाकालं कालम् अनतिक्रम्य प्रबोधिनां प्रबोधनशीलानाम् । चतुर्भिर्विशेषणैः देवतायजनार्थिसत्कारदण्डधरत्वप्रजापालनसमयजागरूकत्वादीनि विवक्षितानि ॥ ६ ॥

त्यागायेति । त्यागाय सत्याय विनियोगः त्यागः तस्मै । "त्यागो विहापनं दानम्" इत्यमरः । सम्भृतार्थानां न तु दुर्व्यापाराय, सत्याय मितभाषिणां मितभाषणशीलानां नतु पराभवाय । यशसे कीर्त्तये । "यशः कीर्त्तिः समज्ञा च" इत्यमरः । विजिगीषूणां, विजेतुम् इच्छूनां नतु अर्थसंग्रहाय, प्रजायै सन्तानाय गृहमेधिनां नतु कामोपभोगाय । अत्र त्यागायेत्यादिषु चतुर्थी तदर्थेत्यादिना तादर्थ्ये चतुर्थीसमासविधानज्ञापकात् चतुर्थी । गृहैः दारैः मेधन्ते सङ्गच्छन्ते इति गृहमेधिनः (१) "दारेष्वपि गृहाः" इत्यमरः, "जाया च गृहिणी गृहम्" इति हलायुधः। मेधसङ्गमे इति धातोर्णिनिः । एभिर्विशेषणैः परोपकारित्वं सत्यवचनत्वं यशःपरत्वं पितॄणां शुद्धत्वञ्च विवक्षितानि ॥ ७ ॥

---

(१) गृहे मेधः सङ्गमः येषां ते गृहमेधिनः, गृहस्था हि गृहे मेधन्ते पत्न्या सङ्गता भवन्ति इति यथार्थकस्य मेधतेः प्रयोगोऽत्र सिद्धः ।

शैशवेऽभ्यस्तविद्यानां(१)यौवने विषयैषिणाम्।
वार्द्धके मुनिवृत्तीनां(२)योगेनान्ते तनुत्यजाम्(३) ॥८॥

शैशव इति। शिशोर्भावः शैशवं बाल्यम्। प्राणभृज्जातिवयोवचनोद्गात्रादिभ्यः ष्यञ्प्रत्ययः। "शिशुत्वं शैशवं बाल्यम्" इत्यमरः। तस्मिन् वयसि अभ्यस्तविद्यानाम्। एतेन ब्रह्मचर्य्याश्रमो विवक्षितः। यूनो भावः यौवनं तारुण्यम्। युवादित्वात् अण्प्रत्ययः। "तारुण्यं यौवनं समे" इत्यमरः। तस्मिन् वयसि विषयैषिणां भोगाभिलाषिणाम्। एतेन गृहस्थाश्रमो विवक्षितः। वृद्धस्य भावः वार्द्धकं वृद्धत्वम्। वृद्धमनोज्ञादिभ्यश्चेति बुञ्। "वार्द्धकं वृद्धसङ्घाते वृद्धत्वे वृद्धकर्म्मणि" इति विश्वः। संघातार्थेऽत्र वृद्धाच्चेति वक्तव्यात् सामूहिकोबुञ्। तस्मिन् वार्द्धके वयसि मुनीनां वृत्तिः इव वृत्तिः येषां तेषाम्। एतेन वानप्रस्थाश्रमो विवक्षितः। अन्ते शरीरत्यागकाले योगेन परमात्मध्यानेन। "योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु" इत्यमरः। तनुं देहं त्यजन्ति इति तनुत्यजः देहत्यागिनः, "कायो देहः क्लीवपुंसोः स्त्रियां मूर्त्तिस्तनुस्तनूः" इत्यमरः। तेषां देहत्यागिनाम् "अन्येभ्योऽपि" दृश्यते इति क्विप्। एतेन भिक्षाश्रमो विवक्षितः ॥८॥

---

(१) "कृतोपनयनस्यास्य व्रतादेशनमिष्यते। ब्रह्मणो ग्रहणञ्चैव क्रमेण विधिपूर्व्वकं।" इति स्मरणात् उपनयनानन्तरमेव द्विजातीना विद्यारम्भो विधीयते।

(२) "गृहस्थस्तु यदा पश्येत् वलीपलितमात्मनः।
अपत्यस्यैव चापत्यं सदारस्थं समाश्रयेत्॥" इति मनुः। ६। २॥

(३) "प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतं।
विसृज्य ध्यानयोगेन ब्रह्माभ्येति सनातनं॥" इति मनुः। ०६। ९।

रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥ ९ ॥
तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः । (१)
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥१०॥
वैवस्वतो(२) मनुर्नाम माननीयो मनीषिणाम् ।

रघूणामिति । सः अहं लब्धप्रवेशः तनुवाग्विभवः अपि स्वल्पवाणीप्रसारः अपि सन् तेषां (रघूणां) गुणैः तद्गुणैः आजन्मशुद्धादिभिः कर्तृभिः कर्णं मम श्रोत्रम् आगत्य चापलाय चापलं चपलकर्म अविमृश्यकरणरूपं कर्तुम् । युवादित्वात् कर्मणि अण्, क्रियार्थोपपदस्येत्यादिना चतुर्थी । प्रचोदितः प्रेरितः सन् रघूणाम् अन्वयं अन्वयविषयप्रबन्धं वक्ष्ये ॥ कलकम् ॥९॥

सम्प्रति स्वप्रबन्धपरीक्षार्थं सतः प्रार्थयते, तमिति । तं रघुवंशाख्यं प्रबन्धं सदसतोः गुणदोषयोः व्यक्तेः हेतवः कर्तारः सन्तः श्रोतुम् अर्हन्ति । तथाहि हेम्नः विशुद्धिः निर्दोषस्वरूपं श्यामिका अपि लोहान्तरसंसर्गात्मको दोषः अपि वा अग्नौ संलक्ष्यते न अन्यत्र, तद्वत् अत्रापि सन्त एव गुणदोषविवेकाधिकारिणो न अन्ये इति भावः ॥ १० ॥

वर्णं वस्तु उपक्षिपति, वैवस्वत इति । मनसः ईप्सितः

---

(१) उपदेशं विदुः यद्वं सलक्षणमुपदेशिनः ।
श्यामायते न युक्तासु यः काञ्चनमिवाग्निषु ॥
१५ अङ्क । मालविकाग्निमित्रे ।

(२) वैवस्वत मनु was the son of the sun by his wife संज्ञा, daughter of विश्वकर्मा. He is regarded as the founder of अयोध्या where the descendants

आसीन्महीक्षितामादिः प्रणव(१)श्छन्दसामिव ॥११॥
तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥ १२ ॥

मनीषिणः धीराः विद्वांसः इति यावत्। पृषोदरादित्वात् साधुः। तेषां माननीयः पूज्यः छन्दसां वेदानाम्। "छन्दः पद्ये च वेदे च' इति विश्वः। प्रणवः ओंकारः इव, महीं क्षियन्ति ईशते इति महीक्षितः क्षितीश्वराः। क्षिधातोरैश्वर्यार्थात् क्विप्, तुगागमश्च। तेषाम् आदिः आदिभूतः, विवस्वतः सूर्यस्य अपत्यं पुमान् वैवस्वतः नाम वैवस्वतः इति प्रसिद्धः मनुः आसीत् ॥ ११ ॥

तदन्वये इति। शुद्धिः अस्य अस्तीति शुद्धिमान् तस्मिन् शुद्धिमति तदन्वये तस्य मनोः अन्वये वंशे। "अन्ववायोऽन्वयो वंशो गोत्रञ्चाभिजनः कुलम्" इति हलायुधः। अतिशयेन शुद्धिमान् शुद्धिमत्तरः। द्विवचनविभज्योपपदेत्यादिना तरप्। दिलीपः इति प्रसिद्धः। राजा इन्दुः इव राजेन्दुः राजश्रेष्ठः।

---

of one of his sons इक्ष्वाकु reigned for many centuries. He was the first of kings who reigned in the earth. His descendants forming themselves into different branches, took possession of, and reigned in, various parts of India. Perhaps this वैवस्वतमनु was identical with king Manu who was preserved, according to the Matsya purana and Mahabharata, by the Matsya Avatara, with the seeds of all things in an ark, from the waters of that inundation which in the season of Pralaya, overspread the world.

(१) प्र+नु+अल्—प्रणवः। 'ओंकारः प्रणवो ब्रह्म सर्वमन्त्रेषु नायकः। आदौ सर्वत्र युञ्जीत मन्त्राणां च समाप्तने' इति मत्स्यपुराणे। 'ओमित्येकाक्षरं ब्रह्म' इति श्रुतिः।

व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।
आत्मकर्मक्षमं(१) देहं क्षात्रो धर्म्म(२)इवाश्रितः ॥१३
सर्व्वातिरिक्तसारेण सर्व्वतेजोऽभिभाविना ।
स्थितः सर्व्वोन्नतेनोर्व्वीं क्रान्त्वा मेरुरिवात्मना ॥१४॥

उपमितं व्याघ्रादिभिरित्यादिना समासः । क्षीरनिधौ इन्दुः इव प्रसूतः जातः ॥ १२ ॥

व्यूढेति । व्यूढेत्यादित्रिभिः श्लोकैर्दिलीपं विशिनष्टि । व्यूढं विपुलम् उरः यस्य सः व्यूढोरस्कः । उरः प्रभृतिभ्यः कप् । "व्यूढं विपुलं भद्रं स्फारं समं वरिष्ठञ्च" इति यादवः । वृषस्य स्कन्धः इव स्कन्धः यस्य सः तथा । सप्तम्युपमानेत्यादिना उत्तरपदलोपो बहुव्रीहिः । शालः वृक्षः इव प्रांशुः उन्नतः शालप्रांशुः । 'प्राकारवृक्षयोः शालः शालः सर्ज्जतरुः स्मृतः' इति यादवः । "उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे" इत्यमरः । महाभुजः महाबाहुः आत्मकर्म्मक्षमं स्वव्यापारानुरूपं देहम् आश्रितः प्राप्तः क्षात्रः क्षत्रसम्बन्धी धर्म्मः इव स्थितः, मूर्त्तिमान् पराक्रमः इव स्थितः, इत्युत्प्रेक्षा ॥ १३ ॥

सर्व्वातिरिक्तेति । सर्व्वातिरिक्तसारेण सर्व्वेभ्यः भूतेभ्यः

"अकारस्याग्निकारश्च मकारश्च प्रजापतिः ।
वेदत्रयान्निरदुहद्भूर्भुवः स्वरितीति च ॥ मनुः । २ । ७६ ।

(१) आत्मकर्म्म च मनुना प्रतिपादितं । तथाहि
"स्वे स्वे धर्म्मे निविष्टानां सर्व्वेषामनुपूर्व्वशः ।
वर्णानामाश्रमाणाञ्च राजा सृष्टोऽभिरक्षिता" ॥ मनुः ७ । ३५ ॥

(२) क्षात्रधर्म्मस्तु मनुना श्लोकः प्रतिगर्हितः सनातनो यौधधर्म्मः । तथाचोक्तं ।
"सधीरनुपसक्तः श्लोकी यौधधर्म्मः सनातनः ।
यद्यान् धर्म्मान् न चरेत क्षत्रियो प्रभु रत्ने रिपून्" इति मनुः । ७ । ९८ ॥

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भ आरम्भसदृशोदयः॥ १५॥
भीमकान्तैर्नृपगुणैः (१) स बभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च (२) यादोरत्नैरिवार्णवः॥ १६॥

अधिकबलेन। "सारो बले स्थिरांशे च" इत्यमरः। सर्वाणि भूतानि तेजसा अभिभवति इति सर्वतेजोऽभिभावी तेन, सर्वेभ्यः उन्नतेन आत्मना शरीरेण। "आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि" इति विश्वः। मेरुः इव उर्वीं क्रान्त्वा आक्रम्य स्थितः। मेरावपि विशेषणानि तुल्यानि। 'अद्भ्यश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः। तस्मादभिभवत्येष सर्वभूतानि तेजसा॥' इति मनुवचनात् राज्ञः सर्वतेजोऽभिभावित्वं ज्ञेयम्॥ १४॥

आकारेति। आकारेण मूर्त्या सदृशी प्रज्ञा यस्य सः, प्रज्ञया सदृशागमः प्रज्ञानुरूपशास्त्रपरिश्रमः। आगमैः सदृशः आरम्भः कर्म यस्य सः तथोक्तः। आरभ्यते इति आरम्भः कर्म तत्सदृशः उदयः फलसिद्धिः यस्य सः तथोक्तः॥ १५॥

भीमेति। भीमैश्च कान्तैश्च नृपगुणैः राजगुणैः तेजःप्रतापा-

---

(१) "तीक्ष्णश्चैव मृदुश्च स्यात् कार्यं वीक्ष्य महीपतिः।
तीक्ष्णश्चैव मृदुश्चैव राजा भवति सम्मतः"॥ मनु। ७। १४०।

(२) तेजोबलं भवत्क्षमा प्रभावः प्राप्तकालता।
षडृष्यस्य गुणानेतान्नृपस्य सुनयो विदुः॥
शौर्यं धैर्यं दया दानं धर्मः सत्यं कृतज्ञता।
इत्यादयोऽधिगम्यस्य गुणा राज्ञः प्रकीर्त्तिताः। इति दिनकरः।

रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥ १७ ॥
प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥ १८ ॥

दिभिः कुलशीलदाक्षिण्यादिभिश्च सः दिलीपः उपजीविनाम् आश्रितानां यादोभिः जलजीवैः "यादांसि जलजन्तवः" इत्यमरः । रत्नैश्च अर्णवः इव अधृष्यः अनभिभवनीयश्च अभिगम्यः आश्रयणीयश्च बभूव ॥ १६ ॥

रेखामात्रमिति । नियन्तुः शिक्षकस्य सारथेश्च तस्य दिलीपस्य सम्बन्धिन्यः नेमीनां चक्रधाराणां वृत्तिः इव वृत्तिः व्यापारः यासां ताः । "चक्रधारा प्रधिर्नेमिः" इति यादवः । "चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमान्' इत्यमरः । प्रजाः आमनोः मनुम् आरभ्य इत्यभिविधिः, पदद्वयञ्चैतत् समासस्य विभासितत्वात् । क्षुण्णात् अभ्यस्तात् प्रहताच्च वर्त्मनः आचारपद्धतेः अध्वनश्च परम् अधिकम् इतस्ततः इत्यर्थः । रेखा प्रमाणम् अस्येति रेखामात्रं रेखाप्रमाणम् ईषदपीत्यर्थः । 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' इत्यादिना मात्रच्प्रत्ययः । परशब्दविशेषणञ्चैतत् । न व्यतीयुः न अतिक्रान्तवत्यः । कुशलसारथिप्रेषिता रथनेमय इव तस्य प्रजाः पूर्वक्षुण्णमार्गं न जहुरिति भावः ॥१७॥

प्रजानामिति । सः राजा प्रजानां भूत्यै अर्थाय' भूत्यर्थं हितार्थम् एव । अर्थेन सह नित्यसमासः सर्वलिङ्गता च वक्तव्या,

सेना परिच्छदस्तस्य इयमेवार्थसाधनम् ।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चाततता ॥१९॥
तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य (१) च ।

ग्रहणक्रियाविशेषणञ्चैतत् । ताभ्यः प्रजाभ्यः बलिं षष्ठांशरूपं(२) करम् अग्रहीत् । "भागधेयः करो बलिः" इत्यमरः । तथाहि रविः, सहस्रं गुणाः यस्मिन् कर्मणि तत् यथा तथा सहस्रगुणं सहस्रधा उत्सृष्टुं दातुम् । उत्सर्जनक्रियाविशेषणञ्चैतत् । रसम् अम्बु आदत्ते गृह्णाति । "रसो गन्धे रसे स्वादे तिक्तादौ विषरागयोः । शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे" इति विश्वः ॥ १८ ॥

सम्प्रति बुद्धिशौर्यसम्पन्नस्य तस्य अर्थसाधनेषु परानपेक्षत्वमाह, सेनेति। तस्य राज्ञः सेना चतुरङ्गबलं परिच्छाद्यते अनेन इति परिच्छदः उपकरणं बभूव छत्रचामरादितुल्यमभूदित्यर्थः। पुंसि संज्ञायां घः प्रायेणेति घप्रत्ययः, छादेर्घेऽद्व्युपसर्गस्येति उपधाह्रस्वः। (३)अर्थस्य प्रयोजनस्य तु साधनं इयम् एव शास्त्रेषु अकुण्ठिता अव्याहता बुद्धिः, व्याप्ता इत्यपि पाठः। धनुषि आतता आरोपिता मौर्वी ज्या च। "मौर्वी ज्या शिञ्जिनी गुणः" इत्यमरः। नीतिपुरःसरमेव तस्य शौर्यमभूदित्यर्थः ॥१९॥

राज्यमूलं मन्त्रसंरक्षणं तस्यासीदित्याह, तस्येति। संवृत-

(१) "गूढाकारं गुप्तरूपमिङ्गितं यस्य तथा" इति दिनकरः।

(२) "पञ्चाशद्भाग आदेयो राज्ञां पशुहिरण्ययोः।
धान्यानामष्टमो भागः षष्ठो द्वादशएव वा ।" मनुः । ७ । १३ ।

(३) यद्वा सेनापरिच्छद इत्येकं पदम्। परिच्छाद्यते अनेनेति परिच्छत्। करणे क्विप्। सेना परिच्छत् यस्य तथोक्तस्य।

फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ॥२०॥
जुगोपात्मानमत्रस्तो भेजे धर्म्ममनातुरः (१) ।
अगृध्नुरादत्त सोऽर्थमसक्तः सुखमन्वभूत् ॥ २१ ॥

मन्त्रस्य गुप्तविचारस्य । "वेदभेदे गुप्तवादे मन्त्रः" इत्यमरः । शोकहर्षादिसूचको भ्रुकुटीमुखरागादिः आकारः, इङ्गितं चेष्टितं हृदयगतविकारः वा । "इङ्गितं हृद्गतो भावो बहिराकारं आकृतिः" इति सज्जनः । गूढ़ आकारेङ्गिते यस्य, स्वभावचापलात् आप्तपरम्परया (२) मुखरागादिलिङ्गैः वा अदृतीयगामिमन्त्रस्य तस्य, प्रारभ्यन्ते इति प्रारम्भाः सामादुपायप्रयोगाः । प्राग्लिव्ययेन पूर्वजन्म उच्यते, तत्र भवाः प्राक्तनाः । सायञ्चिरेत्यादिना ट्युल्प्रत्ययः । संस्काराः पूर्वकर्म्मवासनाः इव फलेन कार्य्येण अनुमेयाः अनुमातुं योग्याः आसन् । अत्र याज्ञवल्क्यः, "मन्त्रमूलं यतो राज्यमतो मन्त्रं सुरक्षितम् । कुर्य्यात् यथा तत्र विदुः कर्म्मणामाफलोदयात् इति ॥ २० ॥

सम्प्रति सामादुपायान् विनैव आत्मरक्षादिकं कृतवानित्याह, जुगोपेति । अत्रस्तः अभीतः सन् । "त्रस्तो भीरुभीरुकभीलुकाः" इत्यमरः । त्रासोपाधिम् अन्तरेणैव त्रिवर्गसिद्धेः प्रथमसाधनत्वादेव आत्मानं शरीरं जुगोप रक्षितवान् । अनातुरः अरुग्नः एव धर्म्मं सुकृतं भेजे अर्जितवान् इत्यर्थः । अगृध्नुः अगर्धनशीलः एव अर्थम् आदत्त स्वीकृतवान् । गृध्नुस्तु गर्धनः ।

(१) "रोगीव देवताभक्त" इति शाकदर्यनाटकं भेजे धर्म्ममनातुर इति ।

(२) आप्तपरम्परयैवेत्र क्वचित् पाठो दृश्यते ।

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्ययः।
गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव ॥ २२ ॥
अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।
तस्य धर्म्मरतेरासीत् दृढत्वं जरसा विना ॥ २३ ॥

लुब्धोऽभिलाषुकस्तृष्णुक् समौ लोलुपलोलुभौ" इत्यमरः। वसिस्थधिष्टयिचेपेक्नु रिति क्नु प्रत्ययः। असक्तः आसक्तिरहितः एव सुखम् अन्वभूत् ॥ २१ ॥

परस्परविरुद्धानामपि गुणानां तत्र साहचर्य्यमासीदित्याह ज्ञाने इति। ज्ञाने परहृत्तान्तज्ञाने सति अपि मौनं वाङ्नियमनम्। यथाह कामन्दकः, "नान्योपतापि वचनं मौनं व्रतचरिष्णुता" इति। शक्तौ प्रतीकारसामर्थ्ये अपि क्षमा अपकारसहनम्। अत्र चाणक्यः, "शक्तानां भूषणं क्षमा" इति। त्यागे वितरणे सति अपि श्लाघायाः विकत्थनस्य विपर्य्ययः अभावः। अत्राह मनुः 'न दत्त्वा परिकीर्त्तयेत्' इति। इत्थं तस्य गुणाः ज्ञानादयः गुणैः विरुद्धैः मौनादिभिः अनुबन्धित्वात् सहचारित्वात्, सह प्रसवः जन्म येषां ते सप्रसवाः सोदराः इव अभूवन् विरुद्धा अपि गुणाः तस्मिन् अविरोधेनैव स्थिता इत्यर्थः ॥ २२ ॥

द्विविधं दृढत्वं ज्ञानतो वयसा च, तत्र तस्य ज्ञानेन दृढत्वमाह, अनाकृष्टस्येति। विषयैः शब्दादिभिः। 'रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी" इत्यमरः। अनाकृष्टस्य अवशीकृतस्य, विद्यानां वेदवेदाङ्गादीनां पारदृश्वनः पारम् अन्तं दृष्टवतः। दृशेः क्वनिप्। धर्म्मे रतिः यस्य तस्य राज्ञः जरसा जरया

प्रजानां विनयाधानात् रक्षणात् भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥ २४ ॥

स्थित्यै दण्डयतो(१)दण्ड्यान् परिणेतुः प्रसूतये(२) ।

विना । "विस्रसा जरा" इत्यमरः । पिच्छिलादिभ्योऽङ् इति अङ्प्रत्ययः । जरायाः जरसन्यतरस्यामिति जरसादेशः । ह्रस्वत्वं वार्द्धकम् आसीत् । तस्य यूनोऽपि विषयवैराग्यादिज्ञानगुणसम्पत्त्या ज्ञानतो ह्रस्वत्वमासीदित्यर्थः । नाथस्तु चतुर्विधं ह्रस्वत्वमिति कृत्वा अनाकृष्टस्येत्यादिना विशेषणत्रयेण वैराग्यज्ञानशीलह्रस्वत्वान्युक्तानीत्यवोचत् ॥ २३ ॥

प्रजानामिति । प्रजायन्ते इति प्रजाः जनाः । उपसर्गे च संज्ञायाम् इति डप्रत्ययः । "प्रजा स्यात् सन्ततौ जने" इत्यमरः । तासां विनयस्य शिक्षायाः आधानात् करणात् सन्मार्गप्रवर्त्तनात् इति यावत्, रक्षणात् भयहेतुभ्यः त्राणात् आपन्निवारणात् इति यावत्, भरणात् अन्नपानादिभिः पोषणात् । अपिः समुच्चये । सः राजा पिता अभूत्, तासां पितरस्तु जन्महेतवः जन्ममात्रकर्त्तारः केवलमुत्पादका एवाभूवन् । जननमात्र एव पितृणां व्यापारः, सदा शिक्षारक्षणादिकन्तु स एव करोतीति तस्मिन् पितृत्वव्यपदेशः । आहुश्च, 'स पिता यस्तु पोषकः" इति ॥ २४ ॥

स्थित्यै इति । दण्डम् अर्हन्तीति दण्ड्याः । दण्डादिभ्यो

1. This is said in allusion to the mercenary spirit of the ancient law as laid down by Manu and other sages.

(१) "प्रजार्थं क्रियते भार्या पुत्रः पिण्डप्रयोजनः" इति स्मरणात् । यद्वा पुत्रोत्पादनस्य पितृत्व परिहारपक्षत्वादुक्तं "धर्म एव" इति ।

अप्यर्थकामौ तस्यास्तां धर्म्म एव मनीषिणः॥ २५॥
दुदोह गां(१) स यज्ञाय शस्याय मघवा दिवम्।
सम्यग्विनिमयेनोभौ दधतुर्भुवनद्वयम्॥ २६॥

यदिति यत्नत्ययः। "अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्। अयशो महदाप्नोति नरकञ्चैव गच्छति॥" इति शास्त्रवचनात्। तान् दण्ड्यान् एव स्थित्यै लोकप्रतिष्ठायै दण्डयतः शिक्षयतः, प्रसूतये सन्तानाय एव परिणेतुः दारान् परिगृह्णतः मनीषिणः विदुषः दीपज्ञस्य इति यावत्। "विद्वान् विपश्चिद्दीपज्ञः सन् सुधीः कोविदो बुधः। धीरो मनीषी" इत्यमरः। तस्य दिलीपस्य अर्थकामौ अपि धर्म्म एव आस्तां जातौ। अस्तेर्लङ्। अर्थकामसाधनयोर्दण्डविवाहयोर्लोकस्थापनप्रजोत्पादनरूपधर्म्मार्थत्वेन अनुष्ठानात् अर्थकामावपि धर्म्मशेषतामापादयन् स राजा धर्म्मोत्तरोऽभूदित्यर्थः। आह(२) हि गौतमः, 'न पूर्वाह्णमध्यन्दिनापराह्णानफलान् कुर्य्यात् यथाशक्ति धर्म्मार्थकामेभ्यः, तेषु धर्म्मोत्तरः स्यात्" इति॥ २५॥

दुदोहेति। सः राजा यज्ञाय यज्ञं कर्तुं गां भुवं दुदोह करग्रहणेन रिक्तां चकार इत्यर्थः। मघवा देवेन्द्रः शस्याय शस्यं वर्द्धयितुं दिवं स्वर्गं दुदोह द्युलोकात् महीलोके वृष्टिमुत्पादया-

1. It is not unlikely that the goddess earth being represented in the shape of a cow, in the Puranas when she used to seek protection from Brahma, came to be denoted by the word meaning originally a cow.

(२) चेति क्वचित् पाठः।

न किलानुययुस्तस्य राजानो रक्षितुर्यशः ।
व्यावृत्ता यत् परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥२७॥
द्वेष्योपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम् ।

मास इत्यर्थः क्रियार्थोपपदस्येत्यादिना यज्ञशस्याभ्यां चतुर्थी । एवम् उभौ सम्पदः विनिमयेन परस्परमादानप्रतिदानाभ्यां भुवनद्वयं दधतुः पुपुषतुः राजा यज्ञैरिन्द्रलोकम्, इन्द्रश्च उदकेन भूलोकं पुपोष इत्यर्थः । उक्तञ्च दण्डनीतौ, "राजा खर्वान् समाहृत्य कुर्यादिन्द्रमहोत्सवम् । प्रीणितो मेघवाहस्तु महतीं वृष्टिमावहेत्" इति ॥ २६ ॥

न किलेति । राजानः अन्ये नृपाः रक्षितुः भयेभ्यस्त्रातुः तस्य राज्ञः यशः न अनुययुः किल न अनुचक्रुः खलु । कुतः, यत् यस्मात् कारणात् तस्करता चौर्य्यं परस्वेभ्यः परधनेभ्यः स्वविषयमूलेभ्यः व्यावृत्ता सती श्रुतौ वाचकशब्दे स्थिता प्रवृत्ता। अपहार्य्यान्तराभावात् तस्करशब्द एव अपहृत इत्यर्थः । (१) अथवा "अत्यन्तासत्यपि(२) ह्यर्थे ज्ञानं शब्दः करोति हि" इति न्यायेन शब्दे स्थिता स्फुरिता नतु स्वरूपतोऽस्ति इत्यर्थः ॥ २७॥

द्वेष्य इति । शिष्टः जनः द्वेष्यः शत्रुः अपि आर्त्तस्य रोगिणः औषधं यथा औषधम् इव तस्य सम्मतः अनुमतः आसीत्, दुष्टः

---

(१) तस्मिन् राजनि वसुधां शासति विषयान्तराभावात् तस्करत्वजातिवाचकः तस्कर इति शब्द एव तस्करस्वेवि'धयीभूत आसीत् इति टीकाकृदभिमतो निर्गलितार्थः । वस्तुतस्तु लोके तस्कर इति शब्दस्य लोपानुपपत्तेः, पदान्तरोक्त एवार्थःसाधीयानिति प्रतिपद्यते ।

(२) अत्यन्तमर्थे शब्दः करोति हि । इत्यपि पाठान्तरं क्वचिद्दृश्यते ।

त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥ २८ ॥
तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथाहि सर्व्वे तस्यासन् परार्थैकफला गुणाः ॥२९॥
स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्व्वीं शशासैकपुरीमिव ॥ ३० ॥

जनः प्रियः अपि प्रेमास्पदीभूतः अपि, उरगक्षता सर्पदष्टा अङ्गुली इव, "छिन्द्याद् बाहुमपि दुष्टात्मनः" इति न्यायात्, त्याज्यः आसीत्। तस्य शिष्ट एव बन्धुः दुष्ट एव शत्रुः इत्यर्थः ॥ २८ ॥

तस्य परोपकारित्वमाह, तमिति। वेधा स्रष्टा। "स्रष्टा प्रजापतिर्वेधाः" इत्यमरः। तं दिलीपं समाधीयते अनेनेति समाधिः कारणसामग्री, महाभूतानां यः समाधिः तेन विदधे ससर्ज्ज नूनं ध्रुवम्, इत्युत्प्रेक्षा। तथाहि, तस्य राज्ञः सर्व्वे गुणाः रूपरसादिमहाभूतगुणवदेव परार्थः परप्रयोजनम् एव एकं मुख्यं फलं येषां ते तथोक्ताः आसन्। महाभूतगुणोपमानेन कारणगुणाः कार्य्ये संक्रामन्तीति न्यायः सूचितः ॥ २९ ॥

स इति। सः दिलीपः वेला समुद्रकूलानि। "वेला कूलेऽपि वारिधेः" इति विश्वः। ताः एव वप्रवलयाः प्राकारवेष्टनानि यस्याः ताम्। "स्याच्चयो वप्रमस्त्रियाम्। प्राकारो वरणः शालः प्राचीरं प्रान्तरो हतिः" इत्यमरः। परितः खातं परिखा दुर्गवेष्टनं। "खातं खेयन्तु परिखा" इत्यमरः। अन्येष्वपि दृश्यंत इत्यत्र अपिशब्दात् खनेर्डप्रत्ययः। अपरिखाः

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा। (१)
पत्नी सुदक्षिणेत्यासीदध्वरस्येव(२) दक्षिणा ॥३१॥
कलत्रवन्तमात्मानम् अवरोधे महत्यपि।

परिखाः सम्पद्यमानाः कृताः परिखीकृताः सागराः यस्याः ताम्। अभूततद्भावे चिः। अविद्यमानम् अन्यस्य राज्ञः शासनं यस्याः ताम् अनन्यशासनाम् उर्वीम्(३) एकपुरीम् इव शशास अनायासेन शासितवान् इत्यर्थः ॥ ३० ॥

तस्येति। तस्य राज्ञः मगधवंशे जाता मगधवंशजा। सप्तम्यां जनेर्डः इति डप्रत्ययः। एतेनाभिजात्यमुक्तम्। दाक्षिण्यं परच्छन्दानुवर्त्तनम्। "दक्षिणः सरलोदारपरच्छन्दानुवर्त्तिषु" इति शाश्वतः। तेन रूढं प्रसिद्धं। तेन नाम्ना, अध्वरस्य यज्ञस्य दक्षिणाख्या पत्नी इव सुदक्षिणा इति प्रसिद्धा पत्नी आसीत्। अत्र श्रुतिः, "यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरस" इति दक्षिणाया दाक्षिण्यं नाम ऋत्विजो दक्षिणत्वप्रापकत्वं, "ते दक्षन्ते दक्षिणां प्रतिगृह्णीति श्रुतेः" ॥ ३१ ॥

कलत्रवन्तमिति। वसुधाधिपः अवरोधे अन्तःपुरवर्गे महति सति अपि मनस्विन्या दृढचित्तया पतिचित्तानुवृत्त्यादिनिर्वहणक्षमया इत्यर्थः। तया सुदक्षिणया लक्ष्म्या च आत्मानं कलत्र-

1. "Magadha was the ancient name of southern Behar, or that part of Behar which is to the south of the Ganges, between Bengal and the Karmanasa, and watered by the lower Sona."

(२) ध्वरतेः कौटिल्यार्थकात् नञ्पूर्वकात् असुन्। यो हि न कुटिलः, सरलः, 'वाधादीन' इति यावत्, सोऽध्वरशब्देनाभिधीयते।

(३) उर्वी पृथ्वी उरोर्गुणवचनादीप्।

तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ॥३२॥
तस्यामात्मानुरूपायाम् आत्मजन्मसमुत्सुकः।
विलम्बितफलैः कालं स निनाय मनोरथैः ॥ ३३ ॥
सन्तानार्थाय विधये स्वभुजादवतारिता।
तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे(१) ॥ ३४ ॥
अथाभ्यर्च्य विधातारं प्रवतौ पुत्रकाम्यया।

वन्तं भार्यावन्तं मेने। "कलत्रं श्रोणिभार्ययोः" इत्यमरः। वसुधाधिप इत्यनेन वसुधया चेति गम्यते ॥ ३२ ॥

तस्यामिति। सः राजा आत्मानुरूपायां तस्यां आत्मनः जन्म यस्य असौ आत्मजन्मा पुत्रः तस्मिन् समुत्सुकः यद्वा आत्मनः जन्मनि पुत्ररूपेण उत्पत्तौ समुत्सुकः सन्। "आत्मा वै पुत्रनामासि" इति श्रुतेः। विलम्बितं फलं पुत्रप्राप्तिरूपं येषां तैः मनोरथैः कदा मे पुत्रो भवेत् इत्याशाभिः कालं निनाय यापयामास ॥ ३३ ॥

सन्तानेति। तेन द्वितीयेन सन्तानः अर्थः प्रयोजनं यस्य तस्मै सन्तानार्थाय विधये अनुष्ठानाय स्वभुजात् अवतारिता अवरोपिता जगतः लोकस्य गुर्वी धूः भारः सचिवेषु निचिक्षिपे निहिता ॥ ३४ ॥

अथेति। अथ धुरोऽवतारणानन्तरं पुत्रकाम्यया आत्मनः

---

(१) निपूर्वस्य क्षिपतीर्धात्वर्थस्यात् चामरोत्क्षिप्तैरपरं वितर्दितं न तु अवतारपूर्वं इः आदः दृश्यते।

तौ दम्पती(१)वसिष्ठस्य गुरोर्जग्मतुराश्रमम् ॥ ३५॥
स्निग्धगम्भीरनिर्घोषम् एकं स्यन्दनमास्थितौ ।
प्राहृषेण्यं पयोवाहं विद्युदैरावताविव(२) ॥ ३६ ॥

पुत्रेच्छया। काम्याच्चेति पुत्रशब्दात् काम्यच् प्रत्ययः। अप्रत्ययादिति पुत्रकाम्यधातोरकारप्रत्ययः, ततः टाप् तया। तौ दम्पती जायापती। राजदन्तादिषु जायाशब्दस्य दमिति निपातनात् साधुः। प्रयतौ पूतौ विधातारं ब्रह्माणम् अभ्यर्च्य। "स खलु पुत्रार्थिभिरुपास्यते" इति मान्त्रिकाः। गुरोः कुलगुरोः वसिष्ठस्य आश्रमं जग्मतुः पुत्रप्राप्त्युपायापेक्षया इति शेषः ॥ ३५ ॥

स्निग्धेति। स्निग्धः मधुरः गम्भीरः निर्घोषः यस्य तम् एकं स्यन्दनं रथं प्राहृषि भवः प्राहृषेण्यः। प्राहृष एण्य इति एण्यप्रत्ययः। तं प्राहृषेण्यं पयोवाहं मेघं विद्युदैरावती इव आस्थितौ आरूढौ जग्मतुः इति पूर्वेण सम्बन्धः। इराः आपः। "इरा भूवाक्सुरासु स्यात्" इत्यमरः। इरायान् समुद्रः तत्र भवः ऐरावतः अभ्रमातङ्गः। "ऐरावतोऽभ्रमातङ्गे रावणाभ्रमुवल्लभाः" इत्यमरः। "अभ्रमातङ्गत्वाद्धाभ्रस्थत्वादभ्ररूपत्वात्" इति क्षीरस्वामी। अत एव मेघारोहणं विद्युत्साहचर्यञ्च घटते। किञ्च

(१) यद्वा दमस्य शमस्य पत्नी अधिकारिणौ। कदाचित् यदि एकवचनमशोऽपि दृश्यते।

2. The elephant of Indra was produced from the ocean during its churning and is described as having his abode in the clouds and making love with Lightning.

मा भूदाश्रमपीड़ेति परिमेयपुरःसरौ।
अनुभावविशेषात्तु सेनापरिवृताविव ॥ ३७ ॥
सेव्यमानौ सुखस्पर्शैः शालनिर्य्यासगन्धिभिः।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥ ३८ ॥ (१)
मनोऽभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः।

विद्युत ऐरावतसाहचर्य्यादेव ऐरावती संज्ञा ऐरावतस्य स्त्री ऐरावतीति चीरस्वामी। तस्मात् सुष्ठूक्तं विद्युदैरावताविवेति। एकरथारोहणोक्त्या कार्य्यसिद्धियोजं दम्पत्योरत्यन्तसौमनस्यं सूचयति ॥ ३६ ॥

मा भूदिति। पुनः किम्भूतौ दम्पती ? आश्रमपीड़ा मा भूत् मा अस्विति हेतोः। माङि लुङित्यायोर्थे लुङ्, न माङ् योग इत्यड़ागमनिषेधः। परिमेयपुरःसरौ परिमितपरिचरौ अनुभावविशेषात्तु तेजोविशेषात् सेनापरिवृतौ इव स्थितौ ॥३७॥

सेव्यमानाविति। पुनः कथम्भूतौ ? सुखः शीतत्वात् प्रियः स्पर्शः येषां तैः शालनिर्य्यासगन्धिभिः सर्जतरुनिस्यन्दनगन्धवद्भिः। "शालः सर्जतरुः स्मृतः" इति शाश्वतः। उत्किरन्ति विक्षिपन्ति इति उत्किराः इगुपधेत्यादिना किरतेः कप्रत्ययः। पुष्परेणूनाम् उत्किराः तैः आधूताः मान्द्यात् ईषत् कम्पिताः वनराजयः यैः तैः वातैः सेव्यमानौ ॥ ३८ ॥

मन इति। रथनेमिस्वनोन्मुखैः मेघध्वनिग्रहया उन्नमित-

(१) श्रेयसौन्यमादाय्यं वायौ गुणपदं कवयो वर्णयन्तीति प्रसिद्धिः।

षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः ३९॥
परस्परार्पितसादृश्यम् अदूरोज्झितवर्त्मसु ।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनावद्धदृष्टिषु ॥ ४० ॥

मुखैः इत्यर्थः, शिखण्डिभिः मयूरैः द्विधा भिन्नाः (१) शुद्धविकृतभेदेन आविष्कृतावस्थायां श्रुताश्रुतभेदेन वा षड्जः द्विविधः तस्मादृश्यात् केका अपि द्विधा भिन्ना इत्युच्यते, अतएवाह षड्जसंवादिनीरिति, षड्भ्यः स्थानेभ्यः जातः षड्जः । तदुक्तम्, "नासा कण्ठमुरस्तालुजिह्वादन्तांश्च संस्पृशन् । षड्भ्यः संजायते यस्मात् तस्मात् षड्ज इति स्मृतः ।" स च तन्त्रीकण्ठजन्या स्वरविशेषः । "निषादर्षभगान्धारषड्जमध्यमधैवताः । पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोरसिस्थिताः स्वराः" इत्यमरः । षड्जेन संवादिनीः सदृशीः । तदुक्तं मातङ्गेन, "षड्जेन मयूरो वदति" इति । मनोऽभिरामाः मनसः प्रियाः के मूर्ध्नि कायन्ति ध्वनन्ति इति केकाः मयूरवाण्यः । "केका वाणी मयूरस्य" इत्यमरः । ताः केकाः शृण्वन्ती इति श्लोकार्थः ॥ ३९ ॥

परस्परेति । विषयात् अदूरं समीपं यथा भवन्ति तथा उज्झितं वर्त्म यैः तेषु स्यन्दनावद्धदृष्टिषु स्यन्दने रथे आबद्धा आसक्तिता दृष्टिः नेत्रं यैः तेषु । "दृग्दृष्टिनेत्रलोचनचक्षुर्नयनाम्बकेक्षणाक्षीणि" इति धनायुधः । कौतुकवशाद्व्यासक्तदृष्टिषु इत्यर्थः । मृग्यश्च मृगाश्च । पुमान् स्त्रियेत्येकशेषः । तेषां द्वन्द्वेषु मिथुनेषु । "स्त्रीपुंसौ मिथुनं द्वन्द्वम्" इत्यमरः । पर-

(१) शुद्धविकृतभेदेन इति दिनकरः ।

श्रेणीबन्धादितन्वद्भिः अस्तम्भां तोरणस्रजम्।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥ ४१ ॥
पवनस्यानुकूलत्वात् प्रार्थनासिद्धिशंसिनः।
रजोभिस्तुरगोत्कीर्णैः अस्पृष्टालकवेष्टनौ ॥ ४२ ॥

सरारुणां सादृश्यं पश्यन्तौ। द्वन्द्वशब्दसामर्थ्यात् मृगीषु सुदक्षिणादृष्टिसादृश्यं दिलीपः, दिलीपादृष्टिसादृश्यं मृगीषु सुदक्षिणा, इत्येवं विवेक्तव्यम् ॥ ४० ॥

श्रेणीति। श्रेणीबन्धात् पंक्तिबन्धनात् हेतोः अस्तम्भाम् आधारस्तम्भरहितां तोरणं बहिर्द्वारम्। "तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः। तत्र या स्रक् विरच्यते तां तोरणस्रजं वितन्वद्भिः कुर्वद्भिः इव इत्यर्थः। उत्प्रेक्षाव्यञ्जकेवशब्दप्रयोगाभावेऽपि गम्योत्प्रेक्षेयम्(१)। कलनिर्ह्रादैः अव्यक्तमधुरध्वनिभिः सारसैः पक्षिविशेषैः करणैः क्वचित् उन्नमिताननौ। "सारसो मैथुनी कामी गोनर्दः पुष्करात्मजः" इति यादवः ॥ ४१ ॥

पवनस्येति। प्रार्थनासिद्धिशंसिनः अनुकूलत्वात् एव मनोरथसिद्धिसूचकस्य पवनस्य अनुकूलत्वात् गन्तव्यदिगभिमुखत्वात्, तुरगोत्कीर्णैः रजोभिः अस्पृष्टाः अलकाः देव्याः, वेष्टनम् उष्णीषं यस्य राज्ञः, ययोः तौ तथोक्तौ। "शिरसा वेष्टनशोभिना सुतः" इति वक्ष्यति ॥ ४२ ॥

---

(१) तदुक्तं साहित्यदर्पणे। "भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना। वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता। वाच्येवादिमयोर्मे स्यादम्भोगे परा पुनः" इति।

सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् ।
आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणम् ॥४३॥
ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम् ।
अमोघाः प्रतिगृह्णन्तौ अर्घ्यानुपदमाशिषः ॥ ४४ ॥
हैयङ्गवीनमादाय घोषवद्भानुपस्थितान् ।

सरसीष्विति । सरसीषु वीचिविक्षोभशीतलम् ऊर्म्मिसङ्घट्टनेन शीतलं स्वनिःश्वासम् अनुकर्त्तुं शीलमस्येति स्वनिःश्वासानुकारिणम्, एतेन तयोरुत्कृष्टस्त्रीपुंसजातीयत्वमुक्तम् । अरविन्दानाम् आमोदम् (गन्धम्) उपजिघ्रन्तौ घ्राणेन गृह्णन्तौ ॥४३॥

ग्रामेष्विति । आत्मविसृष्टेषु स्वदत्तेषु यूपः नाम संस्कृतपशुबन्धनाय दारुविशेषः, यूपाः एव चिह्नानि येषां तेषु ग्रामेषु अमोघाः सफलाः यज्वनां विधिनेष्टवताम् । "यज्वा तु विधिनेष्टवान्" इत्यमरः । सुयजोर्ङ्वनिविति ङ्वनिप्प्रत्ययः । आशिषः आशीर्वादान् अर्घः पूजाविधिः तदर्थं द्रव्यम् अर्घ्यम् । पादार्घाभ्याञ्चेति यत्प्रत्ययः । "षट् तु विष्वर्घमर्घार्हं पाद्यं पादाय वारिणि" इत्यमरः । अर्घ्यमनु अनुपदम् अन्वक् अर्घ्यस्वीकारानन्तरम् इत्यर्थः । प्रतिगृह्णन्तौ स्वीकुर्वन्तौ । पदस्य पश्चात् अनुपदम् । पश्चादर्थेऽव्ययीभावः । "अन्वगन्वचमनुगेऽनुपदं क्लीवमव्ययम्" इत्यमरः ॥ ४४ ॥

हैयङ्गवीनमिति । ह्यस्तन-गोदोहोद्भवं घृतं हैयङ्गवीनम् । ह्यः पूर्व्वेद्युर्भवम् । "तत्तु, हैयङ्गवीनं यत् स्त्रीगोदोहोद्भवं

नामधेयानि पृच्छन्तौ वनानां मार्गशालिनाम्॥४५॥
काप्यभिख्या तयोरासीत् व्रजतोः शुद्धवेषयोः।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव॥ ४६॥
तत्तद्भूमिपतिः पत्ये दर्शयन् प्रियदर्शनः।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः॥४७॥

घृतम्" इत्यमरः। हैयङ्गवीनं संज्ञायामिति निपातः। तत् सद्योघृतम् आदाय उपस्थितान् घोषवृद्धान्। "घोष आभीरपल्ली स्यात्" इत्यमरः। वन्यानां मार्गशालिनां नामधेयानि पृच्छन्तौ। दुह्याचित्यादिना पृच्छतेर्द्विकर्मकत्वम्। कुंचकम्॥४५॥

कापीति। व्रजतोः गच्छतोः शुद्धवेषयोः उज्ज्वलनेपथ्ययोः तयोः सदक्षिणादिलीपयोः हिमनिर्मुक्तयोः चित्राचन्द्रमसोः इव योगे सति का अपि अनिर्वाच्या अभिख्या शोभा आसीत्। "अभिख्या नामशोभयोः" इत्यमरः। आतश्चोपसर्गे इत्यङ्प्रत्ययः। चित्रा(१) नक्षत्रविशेषः गिगिरापगमे चैत्रां चित्रापूर्णचन्द्रमसोरिवेत्यर्थः॥ ४६॥

तत्तदिति। प्रियं दर्शनं स्वकर्मकं यस्य असौ प्रियदर्शनः दर्शनीयः इत्यर्थः। भूमिपतिः पत्ये तत् तत् अद्भुतं वस्तु दर्शयन् लङ्घितम् अतिवाहितम् अपि अध्वानं न बुबुधे न ज्ञातवान्। बुधः सौम्यः (२) उपमा उपमानं यस्य इति विग्रहः।

1· The name of a lunar mansion spica virginis.

(१) शोभमानं चन्द्रस्य योगम् युक्तः इति शोभः बुधश्च इत्यर्थः।

स दुष्प्रापयशाः प्रापत् आश्रमं श्रान्तवाहनः ।
सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥ ४८ ॥
वनान्तरादुपाहृत्तैः समित्कुशफलाहरैः ।
पूर्य्यमाणमदृश्याग्नि प्रत्युद्यातैस्तपस्विभिः ॥ ४९ ॥

इदंविशेषणं तत्तद्दर्शयन्नित्यमुपयोगितयैवास्य स्फाटत्वसूचनार्थम् ॥ ४७ ॥

स इति । दुष्प्रापयशाः दुष्प्रापम् अन्यदुर्लभं यशः यस्य सः तथोक्तः, श्रान्तवाहनः दूरोपगमनात् क्लान्तयुग्यः, महिष्याः सखा महिषीसखः । राजाहःसखिभ्यष्टच् इति टच्प्रत्ययः । सहायान्तरनिरपेक्ष इति भावः । सः राजा सायं सायंकाले संयमिनः नियमवतः तस्य महर्षेः वसिष्ठस्य आश्रमं प्रापत् प्राप । पुषादित्वात् अङ् ॥ ४८ ॥

तमाश्रमं विशिनष्टि वनान्तरादिति । वनान्तरात् अन्यस्मात् वनात् उपाहृत्तैः प्रत्याहृत्तैः समिधश्च कुशांश्च फलानि च आहर्त्तुं शीलं येषाम् इति समित्कुशफलाहराः तैः आङि ताच्छील्ये इति हरतेराङ्पूर्वात् अच्प्रत्ययः । अदृश्यैः दर्शनायोग्यैः अग्निभिः वैतानिकैः प्रत्युद्याताः प्रत्युद्गताः तैः तपस्विभिः पूर्य्यमाणम् । प्रोष्यागच्छतामाहिताग्नीनामग्नयः प्रत्युद्यान्तीति श्रुतेः । यथाह, "कामं पितरं प्रोषितं पुत्राः प्रत्याधावन्ति एवमेतमग्नयः प्रत्याधावन्ति समग्रकलान् दारूनिवाहरन्"(१) इति ॥ ४९ ॥

---

[1] The ascetics like fathers feed the fires with wood gathered

आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः।
अपत्यैरिव (१) नीवारभागधेयोचितैर्मृगैः ॥ ५० ॥
सेकान्ते मुनिकन्याभिः तत्क्षणोज्झितवल्कलम्।
विश्वासाय विहङ्गानाम् आलवालाम्बुपायिनाम् ॥५१॥
आतपात्ययसंक्षिप्तनीवारासु निषादिभिः।

आकीर्णमिति। नीवाराणां भागः एव भागधेयः अंशः, रूपनामभागेभ्यो धेयप्रत्ययो वक्तव्य इति सूत्रात् स्वाभिधेये धेयप्रत्ययः। तस्य उचितैः अत एव उटजानां पर्णशालानां द्वाररोधिभिः द्वाररोधकैः मृगैः ऋषिपत्नीनाम् अपत्यैः इव आकीर्णं व्याप्तम् ॥ ५० ॥

सेकान्ते इति। सेकान्ते वृक्षमूलसेचनावसाने मुनिकन्याभिः सेक्त्रीभिः आलवालेषु जलाधारप्रदेशेषु यत् अम्बु तत्पायिनाम्। "स्यादालवालमावालमावापः" इत्यमरः। विहङ्गानां पक्षिणां विश्वासाय विश्रम्भाय। "समौ विश्वासविस्रम्भौ" इत्यमरः। तत्क्षणे सेकक्षणे उज्झिताः वृक्षकाः क्षुद्रवृक्षाः यस्मिन् तम्। क्षुद्रार्थे कप्रत्ययः ॥ ५१ ॥

आतपेति। आतपस्य अत्यये अपगमे सति संक्षिप्ताः राशीकृताः नीवाराः वृणधान्यानि यासु तासु। "नीवारास्तृणधा-

in the forest and are welcomed by them as children welcome their fathers when they return home from sojourn furnished with good provisions.

(१) कुत्सं न पतति अपत्यं (अ+पत+य) यद्वा अपशब्दात् अपत्यत्वेन सिद्धं। अपभवति कुत्सादुद्भवतीति अपत्यमिति अमात्यादिपदवत् सिद्धमिति भरतः।

मृगैर्वर्त्तितरोमन्थम् उटजाङ्गनभूमिषु ॥ ५२ ॥
अभ्युत्थिताग्निपिशुनैः अतिथीनाश्रमोन्मुखान् ।
पुनानं पवनोद्भूतैर्धूमैराहुतिगन्धिभिः ॥ ५३ ॥
अथ यन्तारमादिश्य धुर्य्यान् विश्रामयेति सः ।
तामवारोहयत् पत्नीं रथादवततार च ॥ ५४ ॥

व्यानि" इत्यमरः । उटजानां पर्णशालानाम् अङ्गनभूमिषु चत्वर-भागेषु चत्वरस्थानेषु वा "पर्णशालोटजोऽस्त्रियाम्" इति, "अङ्गनं चत्वराजिरे" इति च अमरः । निषादिभिः उपविष्टैः मृगैः वर्त्तितः निष्पादितः रोमन्थः चर्वितचर्वणं यस्मिन् आश्रमे तम् ॥ ५२ ॥

अभ्युत्थितेति । अभ्युत्थिताः प्रज्वलिताः होमयोग्याः इत्यर्थः । "समिद्धेऽग्नावाहुतीर्जुहोति" इति वचनात् । तेषाम् अग्नीनां पिशुनैः सूचकैः पवनोद्भूतैः आहुतिगन्धः येषाम् अस्तीति आहुतिगन्धिनः तैः धूमैः आश्रमोन्मुखान् अतिथीन् पुनानं पवित्रीकुर्वाणम् ॥ कर्मक ॥ ५३ ॥

अथेति । अथ आश्रमप्राप्त्यनन्तरं सः राजा यन्तारं सारथिं धुरं वहन्ति धुर्याः युग्याः । धुरोयड्ढकाविति यत्प्रत्ययः । "धूर्वहे धुर्यधौरेयधुरीणाः सधुरन्धराः" इत्यमरः । धुर्यान् रथाश्वान् विश्रामय विनीतश्रमान् कुरु इति आदिश्य आज्ञाप्य तां पत्नीं रथात् अवारोहयत् अवतारितवान् स्वयञ्च अवत-तार । विश्रमयेति क्वचित्पाठे जनीजृष्क्नसुरञ्जोऽमन्ताश्च इति मित् णिच् ।

तस्मै सभ्याः सभार्य्याय गोप्त्रे गुप्ततमेन्द्रियाः।
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥ ५५ ॥
विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम्।
अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम् ॥ ५६ ॥

इति ह्रस्वः। दीर्घपाठे मितां ह्रस्व इति सूत्रे वा चित्तविरागे इत्यतोवेत्यनुवर्त्त्य व्यवस्थितविभाषाश्रयणात् ह्रस्वाभाव इति हृत्तिकारः ॥ ५४ ॥

तस्मै इति। सभायां साधवः सभ्याः। सभायां यत् इति यप्रत्ययः। गुप्ततमेन्द्रियाः अत्यन्तनियमितेन्द्रियाः मुनयः सभार्य्याय गोप्त्रे रक्षकाय नयः शास्त्रम् एव चक्षुः तत्त्वावेदकं प्रमाणं यस्य तस्मै नयचक्षुषे अत एव अर्हते प्रशस्ताय पूज्याय इत्यर्थः। अर्हः प्रशंसायामिति शतृप्रत्ययः। तस्मै राज्ञे अर्हणां पूजां चक्रुः। "पूजानमस्यापचितिः सपर्य्यार्चार्हणाः समाः" इत्यमरः ॥ ५५ ॥

विधेरिति। स राजा सायन्तनस्य सायम्भवस्य। सायञ्चिरम्-इत्यादिना ट्युल्प्रत्ययः। विधेः जपहोमाद्यनुष्ठानस्य अन्ते अवसाने अरुन्धत्या अन्वासितं पश्चात् उपवेशनेन उपसेवितम्। कर्म्मणि क्तः, उपसर्गवशात् सकर्मकत्वम्। अन्वास्ये नामित्यादिवदुपपद्यते। तपोनिधिं वसिष्ठं स्वाहया स्वाहादेव्या। "अथा स्त्रायी स्वाहा च हुतभुक्प्रिया" इत्यमरः। अन्वासितं हविर्भुजन् इव ददर्श। "समित्पुष्पकुशान्यम्बुमृदन्नाप्तपाणिकः। जपं होमञ्च कुर्व्वाणो नाभिवाद्यो द्विजो भवेत्॥" इति अनुष्ठा-

तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी ।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥ ५७ ॥
तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् ।
पप्रच्छ कुशलं राज्ञो राजाश्रममुनिं मुनिः ॥ ५८ ॥

नस्य मध्ये अभिवादननिषेधाद्विधेरन्ते ददर्शेत्युक्तम् । अन्वासितस्यापि पतिव्रताधर्मत्वे नोक्तं न तु कर्माङ्गत्वेन, विधेरन्ते इति कर्मणः समाप्त्यभिधानात् ॥ ५६ ॥

तयोरिति । मागधी मगधराजपुत्री राज्ञो सुदक्षिणा राजा च तयोः अरुन्धतीवसिष्ठयोः पादान् जगृहतुः । "पादः पदाङ्घ्रिरणोऽस्त्रियाम्" इत्यमरः । पादग्रहणमभिवादनम् । गुरुपत्नी गुरुस्त्री कर्त्तारौ सा च स च तौ सुदक्षिणादिलीपौ कर्म्मभूतौ प्रीत्या हर्षेण प्रतिननन्दतुः आशीर्व्वादादिभिः सम्भावयाञ्चक्रतुः इत्यर्थः ॥ ५७ ॥

तमिति । मुनिः अतिथ्यर्थम् आतिथ्यम् । अतिथेर्ञ्य इति ष्यञ्प्रत्ययः । आतिथ्यस्य क्रिया तया शान्तः रथक्षोभेण यः परिश्रमः सः यस्य सः तं तयोक्तं राज्यम् एव आश्रमः तत्र मुनिं मुनितुल्यम् इत्यर्थः । तं दिलीपं राज्ये कुशलं पप्रच्छ । पृच्छनेषु द्विकर्म्मकत्वमित्युक्तम् । यद्यपि राज्यशब्दः पुरोहितादिष्वन्तर्गतत्वाद्राजकर्म्मवचनः(१)तथाप्यत्र समाङ्गवचनः "उपपदं मतिङ्गिर्यं मतस्वङ्गेषु" इति उत्तरविरोधात् । तथाह मनुः,

(१). "पत्न्यन्तपुरोहितादिभ्यो यक्" इति सूत्रेण राजशब्दात् राज्ञो कर्म इत्यर्थे यक् । तथाप्यत्र समाप्त्यादर्थीत्यं, समाङ्गत्वः कथ्यते इति ।

अथाथर्वनिधेस्तस्य(१) विजितारिपुरः पुरः।
अर्थ्यामर्थपतिर्वाचम् आददे वदतां वरः ॥ ५९ ॥
उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे।

"स्वाम्यमात्यपुरं राष्ट्रं कोषदण्डौ तथा सुहृत्। सप्तैतानि समस्तानि लोकेऽस्मिन् राज्यमुच्यते" इति। तत्र, "ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्। वैश्यं चेमं समागम्य शूद्रमारोग्यमेव च ॥" इति मनुवचने सत्यपि तस्य राज्ञो महानुभावत्वात् ब्राह्मणोचितः कुशलप्रश्न एव कृत इत्यनुसन्धेयम् अत एवोक्तं राज्यायमुनिमिति ॥ ५८ ॥

अथेति। अथ प्रश्नानन्तरं विजितारिपुरः विजितशत्रुनगरः वदतां वक्तॄणां वरः श्रेष्ठः। यतश्च निर्द्धारणमिति षष्ठी। अर्थपतिः राजा अथर्वणः अथर्ववेदस्य निधेः तस्य मुनेः पुरः अग्रे अर्थ्याम् अर्थात् अनपेताम्। "धर्म्मपथ्यर्थन्यायादनपेत" इति यत्प्रत्ययः। वाचम् आददे वक्तुम् उपक्रान्तवान् इत्यर्थः। अथर्वनिधेरित्यनेन पुरोहितत्वाभिज्ञत्वात् प्रकृतकार्य्यनिर्व्वाहकत्वं मुनेरस्तीति सूच्यते। यथाह कामन्दकः, "त्रय्याञ्च दण्डनीत्याञ्च कुशलः स्यात् पुरोहितः। अथर्वविहितं कुर्य्यात् नित्यं शान्तिकपौष्टिकम्"। इति ॥ ५९ ॥

उपपन्नमिति। हे गुरो सप्तसु अङ्गेषु स्वाम्यमात्यादिषु।

(१) अथर्वनिधेः अथर्ववेदाभिज्ञस्य; अथर्वनिधिपदेन दुरितोपशमननिमित्तशान्तिकपौष्टिकप्रयोगत्वं योज्यते इति दिनकरः। तथाच मितावरायां।

पुरोहितञ्च कुर्वीत दैवज्ञमुदितोदितम्।
दण्डनीत्याञ्च कुशलं अथर्वाभिहितेषु च॥

दैवीनां मानुषीणाञ्च प्रतिहर्त्ता त्वमापदाम् ॥ ६० ॥
तव मन्त्रकृतो मन्त्रैः दूरात् प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्याभिदः शराः ॥ ६१ ॥

"स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च । सप्ताङ्गानि", इत्यमरः। शिवं कुशलम् उपपन्नं ननु युक्तम् एव। ननु अवधारणे। "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यमरः। कथम् ? इत्यत्राह, यस्य मे दैवीनां दैवेभ्यः आगतानां दुर्भिक्षादीनां, मानुषीणां मनुष्येभ्यः आगतानां चौरभयादीनाम्। उभयत्रापि तत आगत इत्यण्, टिड्ढाणञित्यादिना ङीप्। आपदां व्यसनानां त्वं प्रतिहर्त्ता वारयिता असि। अत्राह कामन्दकः, "इताग्नौ जलं व्याधिः दुर्भिक्षं मरणं तथा। इति पञ्चविधं दैवं मानुषं व्यसनं ततः। आयुक्तकेभ्य(१)चौरेभ्यः परेभ्यो राजवल्लभात्। पृथिवीपतिलोभाच्च नराणां पञ्चधा मतम्" ॥६०॥

तत्र मानुषापद्व्यतीकारमाह, तवेति। दूरात् परोक्षे एव प्रशमितारिभिः, मन्त्रान् कृतवान् मन्त्रकृत् "सुकर्म्मपापमन्त्रपुण्येषु कृञ" इति क्विप्। तस्य मन्त्रकृतः मन्त्राणां स्रष्टुः प्रयोक्तुः वा तव मन्त्रैः कर्त्तृभिः दृष्टं प्रत्यक्षं यत् लक्ष्यं तन्मात्रं भिन्दन्ति इति दृष्टलक्ष्याभिदः मे शराः प्रत्यादिश्यन्ते इव, वयमेव समर्थाः किमेभिः पिष्टपेषकैरिति निराक्रियन्ते इव इत्युत्प्रेक्षा। "प्रत्यादेशो निराकृतिः" इत्यमरः। त्वन्मन्त्रसामर्थ्यादेव नः पौरुषं फलतीति भावः ॥ ६१ ॥

(१) 'आयुक्तकेभ्यः मन्त्रिभ्यः, कर्माधिकेभ्यः'।

हविरावर्ज्जितं होतः त्वया विधिवदग्निषु।
वृष्टिर्भवति शस्यानाम् अवग्रहविशोषिणाम्॥ ६२॥
पुरुषायुषजीविनः निरातङ्का(१) निरीतयः।
यन्मदीयाः प्रजास्तस्य हेतुस्तद्ब्रह्मवर्चसम्॥ ६३॥

सम्प्रति दैविकापत्प्रतीकारमाह, हविरिति। हे होतः! त्वया विधिवत् अग्निषु आवर्ज्जितं प्रक्षिप्तं हविः आज्यादिकं कर्त्तृ अवग्रहः वर्षप्रतिबन्धः। अवे ग्रहो वर्षप्रतिबन्धे इति अच् प्रत्ययः। "वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ" इत्यमरः। तेन विशोषिणां विशुष्यतां शस्यानां वृष्टिः भवति वृष्टिरूपेण शस्यान्युपजीवयतीति भावः। अत्र मनुः, "अग्नौ प्रास्ताहुतिः सम्यक् आदित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः।" इति॥ ६२॥

पुरुषेति। आयुः जीवितकालः पुरुषस्य आयुः पुरुषायुषं वर्षशतम् इत्यर्थः। "शतायुर्वै पुरुषः" इति श्रुतेः। अचतुरादिसूत्रेण अच्प्रत्ययान्तो निपातः। मदीयाः प्रजाः पुरुषायुषं जीवन्ति इति पुरुषायुषजीविनः निरातङ्काः निर्भयाः। "आतङ्को भयमायङ्का" इति हलायुधः। निरीतयः अतिवृष्ट्यादिरहिताः इति यत्, तस्य सर्व्वस्य तद्ब्रह्मवर्चसं तव व्रताध्ययनसम्पत्तिः एव हेतुः। "व्रताध्ययनसम्पत्तिः इत्येतत् ब्रह्मवर्चसम्" इति हलायुधः। ब्रह्मणः वर्चः ब्रह्मवर्चसम्। "ब्रह्महस्तिभ्यां वर्चस इति अच्प्रत्ययः। "अतिवृष्टिरनावृष्टिः

(१) पादपूरणात् तपतेः शतरीवर्णादिनी यत्।

त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना ।
सानुबन्धाः कथं न स्युः सम्पदो मे निरापदः ॥६४॥
किन्तु वध्वां तवैतस्याम् अदृष्टसदृशप्रजम् ।
न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥ ६५ ॥
नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ।

मूषिकाः शलभाः शुकाः(१) । अत्यासन्नाय राजानः पड़ेता ईतयः स्मृताः" । इति कामन्दकः ॥ ६३ ॥

त्वयेति । ब्रह्मा योनिः कारणं यस्य तेन ब्रह्मपुंवेण गुरुणा त्वया एवम् उक्तप्रकारेण चिन्त्यमानस्य अनुध्यायमानस्य अत एव निरापदः व्यसनहीनस्य मे सम्पदः सानुबन्धाः अनुस्यूताः अविच्छिन्नाः इति यावत् कथं न स्युः ? स्युरेव इत्यर्थः ॥ ६४ ॥

सम्पदि आगमनप्रयोजनमाह, किन्त्विति । किन्तु तव एतस्यां वध्वां स्नुषायाम् । "वधूर्जाया स्नुषा स्त्री च" इत्यमरः । अदृष्टा सदृशी अनुरूपा प्रजा येन तं मां सद्वीपा अपि रत्नानि(२) सूयते इति रत्नसूः अपि । सस्सूङ्भ्यां क्विप् । मेदिनी न अवति न प्रीणाति । अवधातुः रक्षणगतिप्रीत्याद्यर्थेषु 'उपदेशात् अत्र प्रीणने । रत्नसूरपीत्यनेन सर्वं रत्नेभ्यः पुत्ररत्नमेव श्राघ्यमिति सूचितम् ॥ ६५ ॥

तदेव प्रतिपादयति, नूनमिति । मत्तः परं मदनन्तरम् ।

(१) पक्षा इति वा पाठः ।

(२) रत्नानि जातिशब्दरूपाणि रत्नम् । तदुक्तं जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते इति ।

न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥ ६६ ॥
मत्परं दुर्लभं मत्वा नूनमावर्ज्जितं मया ।
पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते ॥ ६७ ॥
सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः(१) ॥६८॥

पञ्चम्यास्तसिल्। पिण्डविच्छेददर्शिनः पिण्डदानविच्छेदम् उत्प्रेक्षमाणाः वंशोद्भवाः वंश्याः पितरः, स्वधा इत्यव्ययं पिण्डभोज्ये वर्त्तते, तस्य संग्रहे तत्पराः आसक्ताः सन्तः श्राद्धे पिण्डकर्म्मणि। "पिण्डदानं निवापः स्यात् श्राद्धं तत्कर्म शास्त्रतः" इत्यमरः। प्रकामभुजः पर्य्याप्तभोजिनः न भवन्ति नूनं सत्यम्। "कामं प्रकामं पर्य्याप्तम्" इत्यमरः। निर्धना ह्यापद्गतं कियदपि संगृह्णन्तीति भावः ॥ ६६ ॥

मत्परमिति। मत्परं मदनन्तम्। अन्यारादित्यादिना पञ्चमी। दुर्लभं दुर्लभ्यं मत्वा मया श्रावर्ज्जितं दत्तं पयः पूर्वैः पितृभिः स्वनिःश्वासैः दुःखजैः कवोष्णम् ईषदुष्णं यथा तथा उपभुज्यते नूनमिति तर्के। कवोष्णमिति कुत्सिदस्य कवादेशः। "कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति" इत्यमरः ॥ ६७ ॥

सोऽहमिति। इज्या यागः। व्रजयजोर्भावे क्यपिति क्यप्प्रत्ययः। तया विशुद्धात्मा विशुद्धचेतनः प्रजालोपेन सन्तत्यभावेन निमीलितः क्षतनिमीलनः सः अहं लोक्यते इति लोकः

(१) "मेरुः मदचिषीकुर्वन् सूर्यं ये यत्र पश्यन्ति, सात्र तेषां प्राची, तेषां च सामभाग एव मेरुः। अतः सर्व्वेषां सर्व्वदा मेरुरन्तर एव। दक्षिण'भागे च द्वीपा-

लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम् ।
सन्ततिः शुद्धवंश्या हि परत्रेह च शर्म्मणे ॥ ६८ ॥

न लोक्यते इति अलोकः लोकश्च अलोकश्च अत्र स्तः इति, लोकश्चासौ अलोकश्चेति वा लोकालोकः चक्रवालः अचलः इव । लोकालोकश्चक्रवालः इत्यमरः । प्रकाशते इति प्रकाशश्च देवर्षिविमोचनात्, न प्रकाशते इति अप्रकाशश्च पितृणाविमोचनात् । यचाद्यच् । अस्तीति शेषः । लोकालोकोऽपि अन्तःसूर्य्यसम्पर्कात् बहिस्तमोव्याप्तया च प्रकाशश्चाप्रकाशश्चेति मन्तव्यम् ॥ ६८ ॥

ननु तपोदानादिसम्पन्नस्य किमपत्यैरित्यत्राह, लोकान्तरेति । समुद्भवति अस्मादिति समुद्भवः कारणं तपोदाने समुद्भवः यस्य तत् तपोदानसमुद्भवं यत् पुण्यं तत् लोकान्तरे परलोके सुखं सुखकरं, शुद्धवंशे भवा शुद्धवंश्या सन्ततिः हि परत्र परलोके इह च लोके शर्म्मणे सुखाय "शर्म्म शातसुखानि च" इत्यमरः । भवतीति शेषः ॥ ६८ ॥

लोकालोकः । तस्मादुत्तरस्यां दिशि सदा रात्रिः दक्षिणस्यां च सदा दिनम्" इति । See Wilson's Vishnupurana Vol. III. page 243. But Wilson remarks.—

"Beyond the sea of fresh water is the mountain-belt called Lokaloka the circular boundary between the world and void space. It is so termed, because the world is separated by it, from that which is not world; for which it was placed by Iswara, on the limit of the three worlds; and its height and breadth are such that the rays of the heavenly luminaries from the sun to the polar star, which spread over the regions within the mountain, cannot penetrate beyond it. See Wilson's Vishnupurana Vol II p. 205.

तया हीनं विधातर्मां(१) कथं पश्यन् न दूयसे।
सिक्तं स्वयमिव स्नेहाद् वन्ध्यमाम्रमवृक्षकम् ॥७०॥
असह्यपीड़ं भगवन् ऋणमन्त्यमवेहि मे।
अरुन्तुदमिवालानम् अनिर्वाणस्य दन्तिनः ॥ ७१ ॥

तयेति। हे विधातः स्रष्टः तया सन्ततया हीनम् अनपत्यम् मां स्नेहात् प्रेम्ना स्वयम् एव सिक्तं जलसेकेन वर्द्धितं वन्ध्यम् अफलम्। "वन्ध्योऽफलोऽवकेशी च" इत्यमरः। आम्रमस्य वृक्षकं वृक्षपोतम् (२) इव पश्यन् कथं न दूयसे न परितप्यसे। विधातरित्यनेन संमर्थोऽप्युपेक्षसे इति गम्यते ॥७०॥

असह्येति। हे भगवन् मे मम अन्त्यम् ऋणं पैठकम् ऋणम् अनिर्वाणस्य मज्जनरहितस्य। "निर्वाणं निर्हृतौ मोक्षे विनाशे गजमज्जने" इति यादवः। दन्तिनः गजस्य अरुः मर्म्म तुदतीति अरुन्तुदं मर्म्मस्पृक्। "व्रणोऽस्त्रियामीषंसरुः" इति "अरुन्तुदस्तु मर्म्मस्पृक्" इति च अमरः। विध्वरुषोस्तुद इति खश्प्रत्ययः, अरुर्द्विषदित्यादिना सुमागमः। आलानं बन्धनस्तम्भम् इव। "आलानं बन्धनस्तम्भे" इत्यमरः। असह्या सोढुम् अशक्या पीड़ा दुःखं यस्मिन् तत् अवेहि दुःसहदुःखजनकं विद्धि इत्यर्थः। निर्वाणोत्थानमयनानि त्रीणि गजकर्म्माणि इति पालकाव्ये। "ऋणं देवस्य यागेन ऋषीणां दानकर्म्मणा। सन्ततया पितॄलोकानां शोधयित्वा परिव्रजेत्" ॥७१॥

(१) अकारः प्लवत्वात् प्रक्षेपित्वाच्च "विधातः" इत्युक्तम्।

(२) वृक्षोपमामिति क्वचित् पाठः।

तस्मान्मुच्ये यथा तात (१) संविधातुं तथार्हसि ।
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ॥७२॥
इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ।
क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ॥ ७३ ॥
सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम् ।
भाविनात्मा भुवो भर्तुः अथैनं प्रत्यबोधयत् ॥ ७४ ॥

तस्मादिति । हे तात तस्मात् पैङ्गलकात् ऋणात् यथा मुच्ये मुक्तो भवामि । कर्तृकर्मणि लट् । तथा संविधातुं कर्तुम् अर्हसि, हि यस्मात् कारणात् इक्ष्वाकूणां इक्ष्वाकुवंश्यानाम् । तद्राजत्वात् बहुष्वणो लुक् । दुरापे दुष्प्राप्ये अर्थे सिद्धयः त्वदधीनाः त्वदायत्ताः इक्ष्वाकूणामिति शेषे षष्ठी,(२) न लोकेत्यादिना कर्मयोगे षष्ठीनिषेधात् ॥ ७२ ॥

इतीति । इति राज्ञा विज्ञापितः ऋषिः ध्यानेन स्तिमिते लोचने यस्य सः ध्यानस्तिमितलोचनः निश्चलाक्षः सन् क्षणमात्रं सुप्तमीनः ह्रदः इव तस्थौ ॥ ७३ ॥

सोऽपश्यदिति । सः मुनिः प्रणिधानेन चित्तैकाग्र्येण भाविनात्मा शुद्धान्तःकरणः भुवो भर्तुः नृपस्य सन्ततेः स्तम्भकारणं सन्तानप्रतिबन्धकारणम् अपश्यत्, (३) अथ अनन्तरम् एनं नृपं

पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः।
आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥७५॥
धर्मलोपभयाद्राज्ञीम् ऋतुस्नातामिमां स्मरन्।
प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः ॥७६॥

प्रत्यबोधयत् स्वदृष्टं ज्ञापितवान् इत्यर्थः। एनमिति गतिबुद्धी-त्यादिना ज्ञप्तिकर्तुः कर्म त्वम् ॥ ७४ ॥

पुरेति। पुरा पूर्वं शक्रम् इन्द्रम् उपस्थाय संसेव्य उर्वीं प्रति भुवम् उद्दिश्य यास्यतः गमिष्यतः तव पथि कल्पतरुच्छायाम् आश्रिता सुरभिः कामधेनुः आसीत् तव स्थिता इत्यर्थः ॥ ७५ ॥

ततः किमित्याह, धर्मलोपेति। ऋतुः पुष्पं रजः इति यावत्। "ऋतुः स्त्रीकुसुमेऽपि च" इत्यमरः। ऋतुना निमित्तेन स्नाताम् इमां (पुरोवर्त्तिनीम्) राज्ञीं सुदक्षिणां धर्मस्य ऋत्वभिगमनलक्षणस्य लोपात् भ्रंशात् यत् भयं तस्मात् स्मरन् ध्यायन्। "मृदङ्गं दैवतं विप्रं घृतं मधु चतुष्पथम्। प्रदक्षिणानि कुर्वीत विद्यातांश्च वनस्पतीन्" इति शास्त्रात् प्रदक्षिणक्रियार्हायां प्रदक्षिणकरणयोग्यायां तस्यां धेन्वां त्वं साधु प्रदक्षिणादि-सत्कारं न आचरः न आचरितवान् असि। व्यासङ्गा हि विस्मरन्तीति भावः। ऋतुस्नानाभिगमने मनुः "ऋतुकालाभि-गामी स्यात् स्वदारनिरतः सदा" इति। अकरणे दोषमाह

"भावितात्मा" इति विशेषणेन, सुतेन सिद्धस्य भावितात्मकरणत्वं प्रति कारणविशेषस्या शास्त्रप्रकत्वात्, दृष्टे तु तस्मात्तत्कारणत्वदर्शनं प्रति प्रतिबन्धदर्शनस्य कारणस्यात्-प्रसक्तत्वादिति द्रष्टव्यम्। भावितात्मा आत्मचिन्तनरत इति यावत्।

अवजानासि मां यस्मात् अतस्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥७७॥
स शापो न त्वया राजन् न च सारथिना श्रुतः ।
नदत्याकाशगङ्गायाः(१)स्रोतस्युद्दामदिग्गजे ॥७८॥

पराशरः, "ऋतुस्नातान्तु यो भार्यां स्वस्थः सन्नोपगच्छति ।
बालगोघ्नापराधेन विध्यते नात्र संशयः ॥" इति ॥ ७६॥

अवजानासीति । यस्मात् कारणात् माम् अवजानासि तिरस्करोषि अतः कारणात् मत्प्रसूतिं मम सन्ततिम् अनाराध्य असेवयित्वा ते तव प्रजा न भविष्यतीति सा सुरभिः त्वां शशाप । शप आक्रोशे ॥ ७७ ॥

कथं तदस्माभिर्न श्रुतमित्याह, स शाप इति । हे राजन् स शापः त्वया न श्रुतः, सारथिना च न श्रुतः । श्रु श्रवणे । हेतुमाह, क्रीड़ार्थम् आगताः उद्दामानः दानैः उद्धताः दिग्गजाः यस्मिन् तथोक्ते आकाशगङ्गायाः मन्दाकिन्याः स्रोतसि प्रवाहे नदति सति ॥ ७८ ॥

---

(1) From the third region of the atmosphere which is the seat of Visnu, the river Ganges takes its rise from his foot, Dhruva receives and sustains her on his head; and thence the seven Rishis practise the exercises of austerity in her waters. The orb of the moon is encompassed by her waters, which issuing from it, alights on the summit of Meru and thence flows to the four quarters of the earth for its purification. The situation of the source of the Ganges of heaven identifies it with the milky-way. See Wilson's V. Purana vol. II. p. 272.

ईप्सितं तदवज्ञानात् विद्धि सार्गलमात्मनः।
प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥ ७९ ॥
हविषे दीर्घसत्रस्य(१) सा चेदानीं प्रचेतसः।
भुजङ्गपिहितद्वारं पातालमधितिष्ठति ॥ ८० ॥

अस्तु प्रस्तुते किमायातमित्यत्राह, ईप्सितमिति। तदवज्ञानात् तस्याः धेनोः अवज्ञानात् अपमानात् आत्मनः स्वस्य आप्तुम् इष्टम् ईप्सितं मनोरथम्। आप्नोतेः सनन्तात् क्तः, ईकारश्च। सार्गलं सप्रतिबन्धं विद्धि जानीहि। तथाहि, पूज्यपूजायाः व्यतिक्रमः अतिक्रमणं श्रेयः प्रतिबध्नाति ॥ ७९ ॥

तर्हि गत्वा तामाराधयामि, सा वा कथञ्चिदागमिष्यतीत्याशा न कर्त्तव्येत्याह, हविष इति। सा च सुरभिः इदानीं दीर्घं सत्रं चिरकालसाध्यो यागविशेषः यस्य तस्य प्रचेतसः(वरुणस्य) हविषे दध्याज्यादिहविरर्थं भुजङ्गपिहितद्वारं भुजङ्गावरुद्धद्वारं ततः दुष्प्रवेशं पातालम् अधितिष्ठति पाताले तिष्ठति इत्यर्थः। अधिशीङ्स्थासां कर्म्मेति कर्म्मत्वम् ॥ ८० ॥

(1) A Satra means a sacrifice which may be accomplished in one day, or in a thousand years. But from this general opinion, Katyayana dissents and argues that, human life according to the vedic doctrine "शतायुर्वैपुरुषः" consists on an average of a hundred years and that, it is impossible to prolong a sacrifice for a thousand years. Hence he concludes that, a year in this instance means a day, so that a sacrifice can, at most, extend over a period of a thousand days, but no farther.

"बहवो दीयते यत्र हव्यन्ति प्राप्तिनीषवः।
अनेनो बहवो यत्र तत् सत्रमभिधीयते" इति।

सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः ।
आराधय सपत्नीकः प्रीता कामदुघा हि सा ॥८१॥
इति वादिन एवास्य होतुराहुतिसाधनम् ।
अनिन्द्या नन्दिनी नाम धेनुरावव्रते वनात् ॥८२॥
ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला ।
बिभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम् ॥८३॥

तर्हि का गतिरित्यत आह, सुतामिति । तस्याः सुरभेः इयं तदीया, तां सुतां सुरभेः प्रतिनिधिं कृत्वा शुचिः शुद्धः, सह पत्न्या वर्त्तते इति सपत्नीकः सन् । नयृतश्चेति कप् प्रत्ययः, आराधय, हि यस्मात् कारणात् सा प्रीता तुष्टा सती कामान् दोग्धीति कामदुघा भवति । दुहः कप् घश्चेति कप् प्रत्ययः, घादेश्च ॥ ८१ ॥

इतीति । इति वादिनः वदतः एव होतुः हवनशीलस्य, वषट्टिति वषट्प्रत्ययः, अस्य मुनेः आहुतीनां साधनं कारणं नन्दयतीति व्युत्पत्त्या नन्दिनी नाम अनिन्द्या अगर्ह्या, प्रशस्ता धेनुः वनात् आववृते प्रत्यागता । "अव्याप्तेपि भविष्यत्याः कार्यसिद्धेर्हि लक्षणम्" इति भावः (१) ॥८२॥

सम्प्रति धेनुं विशिनष्टि, ललाटेति । पल्लववत् स्निग्धा (२) चासौ पाटला च । सन्ध्यायामप्येतद्विशेषणं योज्यम् । ललाटे उदयः यस्य सः ललाटोदयः तम्, आभुग्नम् ईषद्वक्रम् । "आविद्धं

1. See Canto 10, stanza 9. of this poem.

(१) हेतोरभावस्य विशेषणत्वविवक्षायां समानाधिकरणसमासः ।

भुवं कोष्णेन कुण्डोघ्नी मेध्येनावभृथादपि(१)।
प्रस्रवेनाभिवर्षन्ती वत्सालोकप्रवर्त्तिना ॥ ८४ ॥
रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गावमन्तिकात्।
तीर्थाभिषेकजां शुद्धिम् आदधाना महीक्षितः ॥८५॥

कुटिलं भुग्नं वेल्लितं वक्रमित्यपि" इत्यमरः। उदितवेति निष्ठातस्य नत्वम्। श्वेतरोमाणि एव अङ्गः तं बिभ्रती नवं शकिनं बिभ्रती सन्ध्या इव स्थिता ॥ ८३ ॥

भुवमिति। कोष्णेन किञ्चित् उष्णेन। कवश्चोष्णे इति चकारात् कादेयः। अवभृथात् अपि अवभृथस्नानात् अपि मेध्येन पवित्रेण। "पूतं पवित्रं मेध्यञ्च" इत्यमरः। वत्सस्य आलोकेन प्रदर्शनेन प्रवर्त्तिना प्रवहता प्रस्रवेन क्षीराभिस्यन्देन भुवम् अभिवर्षन्ती सिञ्चन्ती, कुण्डम् इव उधः आपीनं यस्याः सा कुण्डोघ्नी। "उधस्तु क्लीवमापीनम्" इत्यमरः। उधसोऽनङित्यनङादेशः। बहुव्रीहेरुधसोङीप् इति ङीप् ॥८४॥

रज इति। खुरोद्धूतैः अन्तिकात् समीपे गात्रं स्पृशद्भिः। दूरान्तिकार्थेभ्यो द्वितीया चेति चकारात् पञ्चमी। रजसां कणैः महीं क्षियति इति महीक्षित् तस्य तीर्थाभिषेकेण जातां तीर्थाभिषेकजां शुद्धिम् आदधाना कुर्वाणा। एतेन वायव्यं स्नानमुक्तम्। उक्तञ्च मनुना, "आग्नेयं भस्मना स्नानम् अवगाह्यन्तु वारुणम्। आपोहिष्टेति च ब्राह्मं वायव्यं गोरजःकृतम्।" इति ॥ ८५ ॥

(१) मेध्यतेऽनेनेति मेध्यं दानाय यथं, यतः पवित्रवाचकः।

तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।
याजयामास संतानवन्ध्यप्रार्थनं पुनः ॥ ८६ ॥
अदूरवर्त्तिनीं सिद्धिं राजन् विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव यत् ॥८७॥
वन्यवृत्तिरिमां शश्वत् आत्मानुगमनेन गाम् ।
विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ॥ ८८ ॥

तामिति । निमित्तज्ञः शकुनज्ञः तपोनिधिः वसिष्ठः पुण्यं दर्शनं यस्याः तां, तां धेनुं दृष्ट्वा आशंसितं मनोरथः । नपुंसके भावे क्तः । तत्र अवन्ध्यं सफलं प्रार्थनं यस्य तम् अवन्ध्यमनोरथम् इत्यर्थः । याजयितुं योग्यं याज्यं पार्थिवं पुनः अब्रवीत् ॥ ८६ ॥

अदूरेति । हे राजन् आत्मनः कार्य्यस्य सिद्धिम् अदूरवर्त्तिनीं शीघ्रभाविनीं विगणय विद्धि, यत् यस्मात् कारणात् कल्याणी मङ्गलमूर्त्तिः । बह्वादिभ्यश्चेति ङीप् । इयं धेनुः नाम्नि कीर्त्तिते कथिते सति एव उपस्थिता ॥ ८७ ॥

वन्येति । वने भवं वन्यं कन्दमूलादिकं वृत्तिः आहारः यस्य तथाभूतः सन् इमां गां शश्वत् सदा आप्रसादात् अविच्छेदेन इत्यर्थः । आत्मनः तव कर्त्तुः अनुगमनेन अनुसरणेन अभ्यसनेन अनुष्ठातुः अभ्यासेन विद्याम् इव प्रसादयितुं प्रसन्नां कर्त्तुम् अर्हसि ॥ ८८ ॥

प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः।
निषण्णायां निषीदास्यां पीताम्भसि पिवेरपः ॥८९॥
वधूर्भक्तिमती चैनाम् अर्चितां आतपोवनात्।
प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ॥९०॥
इत्याप्रसादादस्यास्तु परिचर्यापरो भव।
अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् ॥९१॥

गवानुसरणप्रकारमाह, प्रस्थितेति। अस्यां नन्दिन्यां प्रस्थितायां प्रतिष्ठेथाः प्रयाहि। "समवप्रविभ्यः स्थः" इत्यात्मनेपदम्। स्थितायां निवृत्तगतिकायां स्थितिम् आचरेः स्थितिं कुरु तिष्ठेत्यर्थः। निषण्णायाम् उपविष्टायां निषीद उपविश। विध्यर्थे लोट्। पीतम् अम्भः यया तस्यां पीताम्भसि सत्याम् अपः पिवेः पिव ॥८८॥

वधूरिति। वधूः जाया च (तवेति शेषः) भक्तिमती प्रयता सती गन्धादिभिः अर्चितां एनां गां प्रातः आ तपोवनात् तपोवनपर्यन्तम्। आङ्मर्यादायां यदव्ययञ्चैतत्। अन्वेतु अनुगच्छतु सायम् अपि प्रत्युद्व्रजेत् प्रत्युद्गच्छेत्। (अत्रापि आतपोवनादिति वक्तव्यम्)। विध्यर्थे लिङ् ॥९०॥

इतीति। इत्यनेन प्रकारेण त्वम् आ प्रसादात् प्रसादपर्यन्तम्। आङ्मर्यादाभिविध्योरित्यस्य वैभाषिकत्वात् असमासत्वम्। अस्याः धेनोः परिचर्यापरः शुश्रूषापरः भव, ते तव अविघ्नं विघ्नस्य अभावः अस्तु। अव्ययं विभक्तीत्यादिना अर्थाभावेऽव्ययी-

तथेति प्रतिजग्राह प्रीतिमान् सपरिग्रहः ।
आदेशं देशकालज्ञः शिष्यः शासितुरानतः ॥ ९२ ॥
अथ प्रदोषे दोषज्ञः संवेशाय विशाम्पतिम्(१) ।
सूनुः सूनृतवाक् स्रष्टुः विससर्ज्जोदितश्रियम् ॥९३॥

भावः । पितेव पुत्रिणां सत्पुत्रवताम् । प्रशंसायामिनिप्रत्ययः । धुरि अग्रे स्थेयाः तिष्ठेः । आशीरर्थे लिङ्, एर्लिङीत्याकारस्यैकारादेशः । त्वत्सदृशो भवत्पुत्रोऽस्त्वितिभावः ॥ ९१ ॥

तथेति । देशकालज्ञः देशः अग्निसन्निधिः, कालः अग्निहोत्रावसानसमयः विशिष्टदेशकालोत्पन्नमार्षं ज्ञानमव्याहतम् इति जानन् अत एव प्रीतिमान् शिष्यः अन्तेवासी राजा सपरिग्रहः सपत्नीकः । "पत्नीपरिजनादानमूलघायाः परिग्रहाः" इत्यमरः । आनतः विनयनम्रः सन् शासितुः गुरोः आदेशम् आज्ञां तथेति प्रतिजग्राह स्वीचकार ॥ ९२ ॥

अथेति । अथ प्रदोषे रात्रौ दोषज्ञः विद्वान् । "विद्वान् विपश्चिद् दोषज्ञः" इत्यमरः । सूनृतवाक् सत्यप्रियवाक् । "प्रियं सत्यञ्च सूनृतम्" इति हलायुधः । स्रष्टुः सूनुः ब्रह्मपुत्रः मुनिः । अनेन प्रकृतकार्यनिर्वाहकत्वं सूचयति । उदितश्रियं(२) विश्वा-

(1) In vedic hymns the epithet विशांपति, or विश्पति, is applied to the god of fire signifying a nourisher of all creatures, especially of sacrificers, as is found in "अग्ने नीहस्व विश्पतिर्दुरोणे" &c Ri 1 26 7 and again in the hymn "विश्वासां त्वा विशां पतिं हवामहे" & Ri v 22 8

(२) प्रीतिमत्त्वात् विशेषितशीभनिश्चय' ।

सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः ।
कल्पवित् कल्पयामास वन्यामेवास्य संविधाम् ॥९४॥
निर्दिष्टां कुलपतिना(१)स पर्णशालाम्
अध्यास्य प्रयतपरिग्रहद्वितीयः ।

म्पतिं मनुजेश्वरम् । "द्वौ विशौ वैश्यमनुजौ" इत्यमरः । संवेशाय निद्रायै । "स्याद्विद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि" इत्यमरः । विससर्ज आज्ञापयामास ॥ ९३ ॥

सत्यामपीति । कल्पवित् व्रतप्रयोगाभिज्ञः मुनिः तपःसिद्धौ सत्याम् अपि तपसा एव राजयोग्याहारसम्पादनसामर्थ्ये सत्यपि इत्यर्थः । नियमापेक्षया तदाप्रभृति एव व्रतचर्य्यापेक्षया अस्य राज्ञः वन्याम् एव संविधीयते अनयेति संविधां कुशादिग्रयन-सामग्रीम् । आतश्चोपसर्ग इति कप्रत्ययः । अकर्त्तरि च कारके संज्ञायामिति कर्म्मण्यर्थत्वम् । कल्पयामास सम्पादयामास ॥९४॥

निर्दिष्टामिति । स राजा कुलपतिना मुनिकुलेश्वरेण वसिष्ठेन निर्दिष्टां पर्णशालाम् अध्यास्य अधिष्ठानं कृत्वा इत्यर्थः । अधिशीङ्स्थासामिति आधारस्य कर्म्मत्वं कर्म्मणि द्वितीया । प्रयतः नियतः परिग्रहः पत्नी द्वितीयः यस्येति सः तथोक्तः, कुशानां शयने संविष्टः सुप्तः सन् तस्य वसिष्ठस्य शिष्याणाम् अध्ययनेन अपररात्रे वेदपाठेन निवेदितम् अवसानं यस्याः तां

---

(१) "मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् ।
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः" इति ।

तच्छिष्याध्ययननिवेदितावसानां
संविष्टः कुशशयने निशां निनाय ॥ ९५ ॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ वसिष्ठाश्रमगमनो नाम प्रथमः सर्गः ।

निशां निनाय गमयामास। अपररात्रे अध्ययने मनुः, "निशान्ते न परियान्तः ब्रह्माधीत्य पुनः स्वपेत्" । "न चापररात्रमधीत्य पुनः स्वपेत्" इति गौतमय । ग्रहर्षिणोक्तमेतत्। तदुक्तम्, "श्रौत्रोगस्निदमयतिः ग्रहर्षिणीयम्" ॥ ९५ ॥

इति श्रीमल्लिनाथसूरिविरचितायां रघुवंशटीकायां सञ्जीवनीसमाख्यायां प्रथमः सर्गः ।

द्वितीयः सर्गः ।

अथ प्रजानामधिपः प्रभाते
जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिवद्धवत्सां
यशोधनो धेनुमृषेर्मुमोच ॥ १ ॥

आर्याशु रागीभवदङ्गवल्लीमासेव दासीकृतदुग्धसिन्धुम् ।
मन्दस्मितैर्निन्दितशारदेन्दुं वन्देऽरविन्दाननसुन्दरि त्वाम् ॥

अथेति । अथ नियानयनानन्तरं यशोधनः प्रजानाम् अधिपः प्रजेश्वरः प्रभाते प्रातःकाले जायया सुदक्षिणया प्रतिग्राहिते स्वीकारिते गन्धमाल्ये यया सा जायाप्रतिग्राहितगन्धमाल्या तां तथोक्तां पीतं पानम् अस्यास्तीति पीतः पीतवान् इत्यर्थः । अर्श आदिभ्योऽजिति अच्प्रत्ययः । "पीता गावो भुक्ता ब्राह्मणाः" इति महाभाष्ये दर्शनात् । पीतः प्रतिवद्धः वत्सः यस्याः ताम् ऋषेः धेनुं वनाय वनं गन्तुम् । क्रियार्थोपपदेत्यादिना चतुर्थी । मुमोच मुक्तवान् । जायापदसामर्थ्यात् सुदक्षिणायाः पुत्रजननयोग्यत्वमनुसन्धेयम् । तथाहि श्रुतिः, "पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम् । तस्यां पुनर्नवो भूत्वा दशमे मासि जायते । तज्जाया जाया भवति यदस्यां जायते पुनः" इति ।

तच्छिष्याध्ययननिवेदितावसानां
संविष्टः कुशशयने निशां निनाय ॥ ९५ ॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ वसिष्ठाश्रमगमनो नाम प्रथमः सर्गः ।

निशां निनाय गमयामास। अपररात्रे अध्ययने मनुः, "निशान्ते न परिश्रान्तः ब्रह्माधीत्य पुनः स्वपेत्"। "न चापररात्रमधीत्य पुनः स्वपेत्" इति गौतमश्च। प्रहर्षिणीवृत्तमेतत्। तदुक्तम्, "म्रौभ्नौगस्त्रिदशयतिः प्रहर्षिणीयम्" ॥ ९५ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशमहाटीकायां सञ्जीवनीसमाख्यायां प्रथमः सर्गः ।

द्वितीयः सर्गः ।

अथ प्रजानामधिपः प्रभाते
जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिवद्धवत्सां
यशोधनो धेनुमृषेर्मुमोच ॥ १ ॥

आगाश्च रागीभवदङ्गवल्लीभासैव दासीकृतदुग्धसिन्धुम् ।
मन्दस्मितेनिन्दितशारदेन्दुं वन्देऽरविन्दाननसुन्दरि त्वाम् ॥

अथेति । अथ नियानयनानन्तरं यशोधनः प्रजानाम् अधिपः प्रजेश्वरः प्रभाते प्रातःकाले जायया सुदक्षिणया प्रतिग्राहिते स्वीकारिते गन्धमाल्ये यया सा जायाप्रतिग्राहितगन्धमाल्या तां तयोक्तां पीतं पानम् अस्यास्तीति पीतः पीतवान् इत्यर्थः । अर्श आदिभ्योऽजिति अच्प्रत्ययः । "पीता गावो भुक्ता ब्राह्मणाः" इति महाभाष्ये दर्शनात् । पीतः प्रतिवद्धः वत्सः यस्याः ताम् ऋषेः धेनुं वनाय वनं गन्तुम् । क्रियार्थोपपदेत्यादिना चतुर्थी । मुमोच मुक्तवान् । जायापदसामर्थ्यात् सुदक्षिणायाः पुत्रजननयोग्यत्वमनुसन्धेयम् । तथाहि श्रुतिः, "पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम् । तस्यां पुनर्नवो भूत्वा दशमे मासि जायते । तज्जाया जाया भवति यदस्यां जायते पुनः" इति ।

निवर्त्त्य राजा दयितां दयालुः
तां सौरभेयीं सुरभिर्यशोभिः ।
पयोधरीभूतचतुःसमुद्रां
जुगोप गोरूपधरामिवोर्वीम् ॥ २ ॥

श्रुतिच्छुषमेवार्थमनुसरति तथा सापि गोखुरच्छुषमेव मार्गमनुससार इत्यर्थः । धर्म्म पत्नीत्यत्र अश्वघासादिवत् तादर्थ्ये षष्ठीसमासः प्रकृतिविकाराभावात् (१) । पांशुलपयप्रभृत्तावप्यपांशुलानामिति विरोधालङ्कारो ध्वन्यते ॥ २ ॥

निवर्त्येति । दयालुः कारुणिकः । "स्यात् दयालुः कारुणिकः" इत्यमरः । सृहिगृहीत्यादिना आलुच्प्रत्ययः । यशोभिः सुरभिः मनोज्ञः । "सुरभिः स्यान्मनोज्ञेऽपि" इति विश्वः । राजा तां दयितां निवर्त्य सौरभेयीं कामधेनुसुतां नन्दिनीं, धरन्तीति धराः, पचाद्यच् । पयसां धराः पयोधराः स्तनाः । "स्त्रीस्तनौ द्वौ पयोधरौ" इत्यमरः । अपयोधराः पयोधराः सम्पद्यमानाः पयोधरीभूताः । अभूततद्भावे च्विः, कुगतिप्रादय इति समासः । पयोधरीभूताः चत्वारः समुद्राः यस्याः ताम् । "अनेकमन्यपदार्थे" इत्यनेकपदार्थग्रहणसामर्थ्यात् त्रिपदो बहुव्रीहिः । गोरूपधराम् उर्वीम् इव जुगोप ररक्ष, भूरक्षणप्रयत्नेनेव ररक्ष इति भावः । धेनुपक्षे पयसा दुग्धेन अधरीभूताः चत्वारः समुद्राः यस्याः तां तथोक्तां दुग्धतिरस्कृतसागराम् इत्यर्थः (२) ॥ २ ॥

(१) यूपदारु इत्यादिवदत्र प्रकृतिविकृतिभावो न सम्भवति । See पाणिनि (२ । 1) Professor Tarkavachaspati's 2d. Edition of सिद्धान्तकौमुदी p 342.
(२) पयोधरीभूतचतुःसमुद्रादित्यत्र समासप्रदर्शनम् ।

व्रताय तेनानुचरेण धेनोः
न्यषेधि शेषोऽप्यनुयायिवर्गः ।
न चान्यतस्तस्य शरीररक्षा
स्ववीर्य्यगुप्ता हि मनोः प्रसूतिः ॥ ४ ॥
आस्वादवद्भिः कवलैस्तृणानां
कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः(१) स तस्याः
सम्राट् समाराधनतत्परोभूत् ॥ ५ ॥

व्रतायेति । व्रताय धेनोः अनुचरेण नतु जीवनाय इति भावः । तेन दिलीपेन शेषः अवशिष्टोऽपि अनुयायिवर्गः अनुचरवर्गः न्यषेधि निवर्त्तितः । शेषत्वं सुदक्षिणापेक्षया । कथं तर्हि आत्मरक्षणम् ? अत आह, न चेति । तस्य दिलीपस्य शरीररक्षा च अन्यतः पुरुषान्तरात् न । कुतः ? हि यस्मात् कारणात् मनोः प्रसूयते इति प्रसूतिः सन्ततिः स्ववीर्य्यगुप्ता स्ववीर्य्येणैव रक्षिता । न हि स्वनिर्वाहकस्य परापेक्षा इति भावः ॥ ४ ॥

आस्वादवद्भिरिति । सम्राट् मण्डलेश्वरः । "यजेत राजसूयेन मण्डलस्येश्वरश्च यः । आप्नोति यत्राज्ञया राज्ञः स सम्राट्" इत्यमरः । स राजा आस्वादवद्भिः रसवद्भिः स्वादयुक्तैः इत्यर्थः तृणानां कवलैः ग्रासैः "ग्रासस्तु कवलार्थकः" इत्यमरः । कण्डू-

(१) "स + ऐर स्वैर स्वेच्छागत ।

स्थितः स्थितामुच्चलितः प्रयातां
निषेदुषीमासनबन्धधीरः।
जलाभिलाषी जलमाददानां
छायेव तां भूपतिरन्वगच्छत् ॥ ६ ॥
स न्यस्तचिह्नामपि राजलक्ष्मीं
तेजोविशेषानुमितां दधानः।

यत्नैः खर्जनैः दंशानां वनमक्षिकानां निवारणैः। "दंशस्तु वनमक्षिका" इत्यमरः। अव्याहतैः अप्रतिहतैः स्वैरगतैः स्वच्छन्दगमनैव तस्याः धेन्वाः समाराधनतत्परः शुश्रूषासक्तः अभूत्। तदेव परं प्रधानं यस्य इति तत्परः। "तत्परौ प्रसितासक्तौ" इत्यमरः ॥ ५ ॥

स्थित इति। भूपतिः तां गां स्थितां सतीं स्थितः सन्, स्थितिः ऊर्द्ध्वावस्थानम्। प्रयातां प्रस्थिताम् उच्चलितः प्रस्थितः, निषेदुषीं निषण्णाम् उपविष्टाम् इत्यर्थः, "भाषायां सदवसश्रुवः" इति क्वसुप्रत्ययः, उगितश्चेति ङीप्, आसनबन्धे उपवेशने धीरः स्थितः उपविष्टः सन् इत्यर्थः, जलम् आददानां पिबन्तीं जलाभिलाषी पिबन् इत्यर्थः, इयं छाया (प्रतिबिम्बम्) इव अन्वगच्छत् अनुसृतवान् ॥ ६ ॥

स इति। न्यस्तानि परिहृतानि चिह्नानि छत्रचामरादीनि यस्याः तां तथाभूतां अपि तेजोविशेषेण प्रभावातिशयेन अनुमितां सर्वथा राजा एवायं भवेत् इति कल्पितां राजलक्ष्मीं

आसीदनाविष्कृतदानराजिः
अन्तर्मदावस्थ इव द्विपेन्द्रः (१) ॥ ७ ॥
लताप्रतानोद्ग्रथितैः स केशैः
अधिज्यधन्वा विचचार दावम् ।
रक्षापदेशान्मुनिहोमधेनोः
वन्यान् विनेष्यन्निव दुष्टसत्वान् ॥ ८ ॥

दधानः सः राजा अनाविष्कृतदानराजिः बहिरप्रकटितमदरेखः अन्तर्गता मदावस्था यस्य सः अन्तर्मदावस्थः तथाभूतः द्विपेन्द्रः इव आसीत् ॥ ७ ॥

लतेति । लतानां वल्लीनां प्रतानैः कुटिलतन्तुभिः उद्ग्रथिताः उन्नमय्य ग्रथिताः ये केशाः तैः उपलक्षितः । इत्थंभूतलक्षणे तृतीया । स राजा अधिज्यम् आरोपितमौर्वीकं धनुः यस्य सः अधिज्यधन्वा सन् । धनुषश्चेत्यनङादेशः । मुनिहोमधेनोः रक्षापदेशात् रक्षणव्याजात् वन्यान् वने भवान् दुष्टसत्वान् दुष्टजन्तून् । "द्रव्यासुव्यवसायेषु सत्वमस्त्री तु जन्तुषु" इत्यमरः । विनेष्यन् शिक्षयिष्यन् इव दावं वनम् । "वने च वनवह्नौ च दवो दाव इष्यते" इति यादवः । विचचार वने चचार इत्यर्थः । "देशकालाध्वगन्तव्या कर्मसंज्ञा सकर्मणाम्" इति दावस्य कर्मत्वम् ॥ ८ ॥

---

(१) "मदो मदी मदरेति मदीर्घयेति जातयः ।
अनयः कल्पिता ताश्च मदीऽन्तमदरश्च च" ॥ इति वल्लभेन उद्धृतम् ।

विसृष्टपार्श्वानुचरस्य तस्य
पार्श्वं द्रुमाः पाशभृता समस्य।
उदीरयामासुरिवोन्मदानाम्
आलोकशब्दं(१)वयसां विरावैः ॥ ९ ॥
मरुत्प्रयुक्ताश्च मरुत्सखाभं
तमर्च्यमाराद्भिवर्त्तमानम्।

विसृष्टेत्यादिभिः षड्भिः श्लोकैस्तस्य महामहिमतया द्रुमादयोऽपि राजोपचारं चक्रुरित्याह, विसृष्टेति। विसृष्टाः पार्श्वानुचराः पार्श्ववर्त्तिनो जनाः येन तस्य पाशभृता वरुणेन समस्य तुल्यस्य। "प्रचेता वरुणः पाशी" इत्यमरः। अनुभावोऽनेन सूचितः। तस्य राज्ञः पार्श्वयोः द्रुमाः उन्मदानाम् उत्कटमदानां वयसां खगानाम्। "खगवाल्यादिनोर्वयः" इत्यमरः। विरावैः शब्दैः आलोकस्य शब्दं वाचकम् आलोकय इति शब्दं जयशब्दम् इत्यर्थः। "आलोको जयशब्दः स्यात्" इति विश्वः। उदीरयामासुरिव अयदन्निव, इत्युत्प्रेक्षा ॥९॥

मरुदिति। मरुत्प्रयुक्ताः वायुना प्रेरिताः वालसता आरात् समीपे अभिवर्त्तमानम्। "आरात् दूरसमीपयोः" इत्यमरः। मरुतः वायोः सखा मरुत्सखः अग्निः स इव आभातीति मरुत्सखाभः। आतयोपसर्ग इति कप्रत्ययः। तं अर्घ्यं पूज्यं दिलीपं

---

(१) आलोकस्य शब्दस्य शब्दं वाचकमदत्तं। अत्र जोरेवालोकशब्दः।" इत्य अय महाराज स्वामिन् शादमनन्तरार्हसीति आलोकशब्द इति वक्ष्यः।

अवाकिरन् वालल्लताः प्रसूनैः
आचारलाजैरिव(१) पौरकन्याः ॥ १० ॥
धनुर्भृतोऽप्यस्य(२) दयार्द्रभावम्
आख्यातमन्तःकरणैर्विभक्तैः ।
विलोकयन्त्यो वपुरापुरक्ष्णां
प्रकामविस्तारफलं हरिण्याः ॥ ११ ॥

प्रसूनैः पुष्पैः पौरकन्याः पौराश्च ताः कन्याः आचारार्थैः लाजैः आचारलाजैः इव अवाकिरन् तस्योपरि विचिक्षिपुरित्यर्थः । सखा हि सखायमागतमुपचरति इति भावः ॥ १० ॥

धनुर्भृत इति । धनुर्भृतोऽपि अस्य राज्ञः, एतेन भयसम्भावना दर्शिता, तथापि निर्भीकैः अन्तःकरणैः कर्तृभिः दयया कृपारसेन आर्द्रः भावः अभिप्रायः यस्य तत् दयार्द्रभावं तत् आख्यातं दयार्द्रभावमेतदित्याख्यातम् इत्यर्थः ।(३)"भावः सत्त्वस्वभावाभिप्रायचेष्टाजन्मसु" इत्यमरः । तथाविधं वपुः विलोकयन्त्यः हरिण्यः अक्ष्णां प्रकामविस्तारस्य अत्यन्तविशालतायाः फलम् आपुः । "विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुञ्च" इति न्यायेन स्वान्तःकरणवृत्तिप्रामाण्यादेव विश्रब्धं दृष्टवत्यः इत्यर्थः ॥ ११ ॥

---

(१) पुरप्रवेशे हि राज्ञा कुमारीभिः (लाजै.) अवकीर्यन्ते इत्याचार इति वल्लभः ।

(२) धनति हिनस्ति अनेनेति धनुः । धनतेः हिंसार्थकत्वं वेदे प्रसिद्धं ।

(३) "यस्मादपि भयहेतुं वस्तु वा हृदि जायते ।
दृष्ट्वा भूमिपतयेऽद्य सा दया परिकीर्तिता" ॥ इति दयालक्षणम् ।

स कीचकैर्मारुतपूर्णरन्ध्रैः
कूजद्भिरापादितवंशकृत्यम्।
शुश्राव कुञ्जेषु यशः स्वमुच्चैः
उद्गीयमानं वनदेवताभिः(१)॥ १२॥
पृक्तास्तुषारैर्गिरिनिर्झराणाम्
अनोकहा कम्पितपुष्पगन्धी(२)।

स इति। स दिलीपः मारुतपूर्णरन्ध्रैः अत एव कूजद्भिः स्वनद्भिः कीचकैः वेणुविशेषैः। "वेणवः कीचकास्ते स्युः ये स्वनन्त्यनिलोद्धताः" इत्यमरः। वंशः शुषिरवाद्यविशेषः। "वंशादिकन्तु शुषिरम्" इत्यमरः। आपादितं सम्पादितं वंशस्य कृत्यं कार्य्यं यस्मिन् कर्म्मणि तत् तथा, कुञ्जेषु लतागृहेषु। "निकुञ्जकुञ्जौ वा क्लीवे लतादिपिहितोदरे" इत्यमरः। वनदेवताभिः उद्गीयमानम् उच्चैः गीयमानं स्वं यशः शुश्राव श्रुतवान्॥१२॥

पृक्ता इति। गिरिषु निर्झराणां वारिप्रवाहाणाम्। "वारिप्रवाहो निर्झरो झरः" इत्यमरः। तुषारैः सीकरैः। "तुषारो

---

(१) Compare—यः पूरयन् कीचकरन्ध्रभागान् हरोमुखोत्थेन समीरणेन। उद्गास्यतामिच्छति किन्नराद्यां तानप्रदायित्वमिवोपगन्तुम्।
कुमारसम्भवम्, प्रथमः सर्गः।

अस्य व्याख्याने मल्लिनाथ आह—उदगास्यतां देवयोनित्वात् उच्चैः गास्यतामेव गानं करिष्यतां। उक्तञ्च नारदेन षड्ज मध्यमगामानौ द्वौ गायन्ति मानवाः। तत्र गान्धारग्रामानं स लभ्यो देवयोनिभिः। तथा "गाता यं यं स्वरं गच्छेत् तं तं वंशेन गापयेत्" इति भरतः। ग्रामो नाम स्वरसमूहवर्त्तकः रागस्थितिमूर्च्छादिहेतुः षड्जादिग्रामा वंशवाद्यसाध्यः प्रधानभूतः स्वरविशेषः।

(२) अनसः प्रकटस्य सर्वं संज्ञि इति कप—ङ। इत्ये।

तमातपक्लान्तमनातपत्रम्
आचारपूतं (१) पवनः सिषेवे ॥ १३ ॥
शशाम हृष्टापि विना दवाग्निः
आसीत् विशेषा फलपुष्पहृद्भिः ।
जनं न सत्वेष्वधिको बबाधे
तस्मिन् वनं गोप्तरि गाहमाने ॥ १४ ॥

हिमसीकरी" इति शाश्वतः । पृक्ताः संपृक्ताः अनोकहानां हृद्या-
णाम् आकम्पितानि ईषत्कम्पितानि पुष्पाणि तेषां यः गन्धः सः
अस्यास्तीति आकम्पितपुष्पगन्धी ईषत् कम्पितपुष्पगन्धवान् एवं
शीतः मन्दः सुरभिः पवनः वायुः अनातपत्रं व्रतार्थं परिहृत-
च्छत्रम् अत एव आतपक्लान्तम् आचारेण पूतं शुद्धं तं नृपं
सिषेवे । आचारपूतत्वात् स राजा जगत्पावनस्यापि सेव्य
आसीत् इति भावः ॥ १३ ॥

शशामेति । गोप्तरि तस्मिन् राज्ञि वनं गाहमाने प्रविशति
सति हृद्या विना अपि दवाग्निः वनाग्निः । "दवदावौ वना-
नले" इति हैमः । शशाम । फलानां पुष्पाणाञ्च हृत्तिः, विशि-
ष्यते इति विशेषा अतिशयिता आसीत् । कर्मार्थे घञ्प्रत्ययः ।
सत्वेषु जन्तुषु मध्ये । "यतश्च निर्धारणम्" इति सप्तमी । अधिकः
प्रबलः व्याघ्रादिः जनं दुर्बलं हरिणादिकं न बबाधे ॥ १४ ॥

---

(१) आचारे परमो धर्मः श्रुत्युक्तः स्मार्त एव च ।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः ॥ मनु । १ । १०८ ।

संचारपूतानि दिगन्तराणि
कृत्वा दिनान्ते निलयाय गन्तुम्।
प्रचक्रमे पल्लवरागताम्रा
प्रभा पतङ्गस्य मुनेश्च धेनुः॥ १५॥
तां देवतापित्रतिथिक्रियार्थाम् (१)
अन्वक् ययौ मध्यमलोकपालः।
बभौ च सा तेन सतां मतेन
श्रद्धेव साक्षाद्विधिनोपपन्ना॥ १६॥

संचारपूतानीति। पल्लवस्य रागः वर्णः पल्लवरागः। "रागोऽनुरक्तौ माङ्गल्ये क्लेशादौ लोहितादिषु" इति यादवः। स इव ताम्रा पल्लवरागताम्रा पतङ्गस्य सूर्यस्य प्रभा कान्तिः। "पतङ्गः पक्षिसूर्ययोः" इति यादवः। मुनेः धेनुश्च दिगन्तराणि दिशान् अवकाशान्(२)। "अनन्तरमवकाशावधिपरिधानान्तरविभेदतादर्थ्ये" इत्यमरः। संचारेण पूतानि शुद्धानि कृत्वा दिनान्तेसायंकाले निलयाय अग्निमयाय धेनुपक्षे आलयाय गन्तुं प्रचक्रमे॥ १५॥

तामिति। मध्यमलोकपालः भूपालः देवतापित्रतिथीनां क्रियाः यागयाद्दानानि ताः एव अर्थः प्रयोजनं यस्याः तां

स पल्वलोत्तीर्णवराहयूथा-
न्यावासवृक्षोन्मुखबर्हिणानि।
ययौ मृगाध्यासितशाद्वलानि
श्यामायमानानि(१) वनानि पश्यन्॥ १७॥

धेनुम् अन्वक् अनुपदं ययौ। "अन्वग्न्वच्चमनुगेऽनुपदं क्लीवमव्ययम्" इत्यमरः। सतां मतेन सद्भिः मान्येन। मतिबुद्धीत्यादिना वर्त्तमाने क्तः, क्तस्य च वर्त्तमान इति षष्ठी। तेन राज्ञा उपपन्ना युक्ता सा धेनुः सतां मतेन विधिना अनुष्ठानेन उपपन्ना युक्ता साधात्मत्यक्षा यज्ञा (२) आस्तिकबुद्धिः इव बभौ च॥ १६॥

स इति। स राजा पल्वलेभ्यः अल्पजलाशयेभ्यः उत्तीर्णानि निर्गतानि वराहाणां यूथानि कुलानि येषु तानि बर्हाणि एषां सन्तीति बर्हिणाः मयूराः। "मयूरो बर्हिणो बर्ही" इत्यमरः। फलवर्हाभ्यामिनच्प्रत्ययो वक्तव्यः। आवासवृक्षाणाम् उन्मुखाः बर्हिणाः येषु तानि, श्यामायमानानि वराहबर्हिणादिमलिनित्वा अश्यामानि श्यामानि भवन्तीति श्यामायमानानि। मोहितादिडाज्भ्यः क्यषिति क्यषप्रत्ययः, वा क्यष इत्याचनेपदे शानच्। मृगैः अध्यासिताः अधिष्ठिताः शाद्वलाः येषु तानि। शादाः शष्पाणि एषु देशेषु सन्तीति शाद्वलाः शष्पश्यामदेशाः।

(१) बर्हिःस्थलमलात् चलतिशादतिर्मरेण श्यामश्चीभवति इत्यर्थः। यत् पुनः वराहमयूरादीनां अनिर्दिश्या श्यामत्वं टीकाकारेण आपातं तत्र हेतोर्नोक्तम् तत्र चलु "अदोषदर्शनात्" इति न्यायात्तथोक्तमिति अनुसन्धेयम्।

(२) आत्मार्थं इष्टविशेषः यज्ञा।

आपीनभारोद्वहनप्रयत्नात्
गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः ।
उभावलञ्चक्रतुरञ्चिताभ्यां(१)
तपोवनाभ्यर्त्तिपथं गताभ्याम् ॥ १८ ॥
वसिष्ठधेनोरनुयायिनं तम्(२)
आवर्त्तमानं वनिता वनान्तात् ।

"शाद्वलः शादहरिते" इत्यमरः । "शादः कर्दमशय्ययोः" इति विश्वः । नड़शादाड्वलजिति ड्वलच्प्रत्ययः । वनानि पश्यन् ययौ ॥ १७ ॥

आपीनेति । गृष्टिः सकृत्प्रसूता गौः । "गृष्टिः सकृत् प्रसूता गौः" इति हलायुधः । नरेन्द्रस्य उभौ यथाक्रमम् आपीनम् उधः । "उधस् क्लीवमापीनम्" इत्यमरः । आपीनस्य भारोद्वहने प्रयत्नात् प्रयासात् वपुषः गुरुत्वात् आधिक्याच्च अञ्चिताभ्यां चारुभ्यां गताभ्यां गमनाभ्यां तपोवनात् आभ्यर्त्तेः पन्थाः तं तपोवनाभ्यर्त्तिपथम् । ऋक्पूरित्यादिना समासान्तः अप्रत्ययः । अलञ्चक्रतुः भूषितवन्तौ ॥ १८ ॥

वसिष्ठेति । वसिष्ठधेनोः अनुयायिनम् अनुचरं वनान्तात्

---

(१) आङ्पूर्वात् प्यायतेः क्तः । अञ्चिते पूजिते मनोज्ञे इति यावत् । पूजार्थकादञ्चतेः कर्त्तरि क्तः ।

(२) वसुरपि: शिवं सत्यीगात् वसिष्ठः, तदा वने चरन्ति वासं गावोऽस्यां सरेषु दारुनिमित्तम्, अतः वसिष्ठत्वात् वासात् अधिगद्वाभ्यां सत्यात् वसिष्ठ इति वसिष्ठः ।
"ऋषिरोऽपि वरिष्ठोऽपि वने वासं गवेषयि ।
वसिष्ठत्वाच्च वासाच्च वसिष्ठ इति विद्धि माम् ।" इति महाभारते ।

पपौ निमेषालसपक्ष्मपङ्क्तिः
उपोषिताभ्यामिव लोचनाभ्याम् ॥ १९ ॥
पुरस्कृता वर्त्मनि पार्थिवेन
प्रत्युद्गता पार्थिवधर्म्मपत्न्या ।
तदन्तरे सा विरराज धेनुः(१)
दिनक्षपामध्यगतेव सन्ध्या(२) ॥ २० ॥

आवर्त्तमानं प्रत्यागतं तं दिलीपं वनिता सुदक्षिणा निमेषेषु अलसा मन्दा पक्ष्मणां पङ्क्तिः यस्याः सा निर्निमेषा सती इत्यर्थः लोचनाभ्यां करणाभ्याम् उपोषिताभ्याम् इव उपवासः भोजननिवृत्तिः तद्वद्यां इव । वसतेः कर्त्तरि क्तः । पपौ । यथोपोषितः अतितृष्णया जलमधिकं पिपासति तद्वदतितृष्णया अधिकं व्यलोकयत् इत्यर्थः ॥ १९ ॥

पुरस्कृतेति । वर्त्मनि पार्थिवेन पृथिव्याः ईश्वरेण । तस्येश्वर इत्यण्प्रत्ययः । पुरस्कृता पतः कृता धर्म्मस्य पत्नी धर्म्मार्थपत्नी इत्यर्थः । अम्बयासादिवत् तादर्थ्ये षष्ठीसमासः । पार्थिवस्य धर्म्मपत्न्या प्रत्युद्गता सा धेनुः तदन्तरे तयोः दम्पत्योः मध्ये दिनक्षपयोः दिनरात्रयोः मध्यगता सन्ध्या इव रराज ॥ २० ॥

---

(१) मल्लिनाथी "पत्न्यरागतया" "पक्षदक्षिणपार्श्वया" इति पदेन वर्णयते। तदनुसारेण सम्प्रदाय एव उपेक्षणीयः।

(२) "मौक्तिकमेकं तु संख्याने यत्स्यात् तूर्णप्रतिसरे ,
तत्स्यात् सन्ध्या वि सामान्यरात्र्योर्मध्यंदिनेऽपि च ।" इति मेदिनीकोशः।

गुरोः सदारस्य निपीड्य पादौ
समाप्य सान्ध्यञ्च विधिं दिलीपः ।
दोहावसाने पुनरेव दोग्ध्रीं
भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥ २३ ॥
तामन्तिकन्यस्तबलिप्रदीपाम्
अन्वास्य गोप्ता गृहिणीसहायः ।
क्रमेण सुप्तामनु संविवेश
सुप्तोत्थितां(१) प्रातरनूदतिष्ठत् ॥ २४ ॥

गुरोरिति । भुजोच्छिन्नरिपुः दिलीपः सदारस्य दारैः अरुन्धत्या सह वर्त्तमानस्य गुरोः उभयोरपि इत्यर्थः । "भार्य्या जायाय पुंभूम्नि दाराः" इत्यमरः । पादौ निपीड्य अभिवन्द्य सान्ध्यं सन्ध्यायां विहितं विधिम् अनुष्ठानं च समाप्य दोहावसाने निषण्णाम् आसीनां दोग्ध्रीं दोहनशीलाम् । त्रचिति त्रन्प्रत्ययः । धेनुम् एव पुनः भेजे सेवितवान् । दोग्ध्रीमिति निरूपपदप्रयोगात् कामधेनुत्वं गम्यते ॥ २३ ॥

तामिति । गोप्ता रक्षकः गृहिणीसहायः पत्नीद्वितीयः सन् उभावपि इत्यर्थः अन्तिके न्यस्ताः बलयः प्रदीपाश्च यस्याः तां तयोक्तां तां निषण्णां धेनुम् अन्वास्य अनूपविश्य क्रमेण सुप्ताम् अनु अनन्तरं संविवेश सुष्वाप, प्रातः सुप्तोत्थिताम् अनु उदतिष्ठत् उत्थितवान् । अत्र अनुशब्देन [illegible]

(१) पादौ इत्या पदादुत्थिता सुप्तोत्थिता । "अन्य च पूर्व आदि" इत्यनेन

इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्त्तेः।
सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥ २५ ॥
अनोदुरात्मानुचरस्य भावं
जिज्ञासमाना मुनिहोमधेनुः।

यौर्वापर्य्यमुच्यते, क्रमशब्देन धेनुव्यापारांगामेव इति अपौनरुक्त्यम्। कर्म्म प्रवचनीययुक्त इति द्वितीया ॥ २४ ॥

इत्थमिति। इत्थम् अनेन प्रकारेण प्रजार्थं सन्तानाय महिष्या समम् अभिषिक्तपत्न्या सह। "कृताभिषेका महिषी" इत्यमरः। व्रतं धारयतः, महनीया पूज्या कीर्त्तिः यस्य तस्य दीनानाम् उद्धरणं दैन्यविमोचनं तत्र उचितस्य परिचितस्य तस्य नृपस्य त्रयः गुणाः आवृत्तयः येषां तानि त्रिगुणानि त्रिरावृत्तानि सप्तदिनानि एकविंशतिदिनानि व्यतीयुः ॥ २५ ॥

अन्येद्युरिति। अन्येद्युः अन्यस्मिन् दिने द्वाविंशे दिने। सद्यः परुत्परारीत्यादिना निपातनात् अव्ययम्। "अद्यान्वद्य पूर्व्वेद्युरीत्यादौ पूर्वोत्तरापरात्। तथाधरान्यान्यतरेतरात्पूर्वेद्युरादयः" इत्यमरः। मुनिहोमधेनुः आत्मानुचरस्य भावम् अभिप्रायं दृढभक्तित्वम्। "भावोऽभिप्राय आशयः" इति यादवः। जिज्ञासमाना ज्ञातुमिच्छन्ती। "ज्ञाश्रुस्मृदृशां सनः" इत्यात्मनेपदे शानच्। प्रपतति अस्मिन् इति प्रपातः पतनप्रदेशः गङ्गायाः प्रपातः तस्य अन्ते समीपे निरूढानि जातानि शष्पाणि बालतृणानि

गङ्गाप्रपातान्तनिरूढशष्पं
गौरीगुरोर्गह्वरमाविवेश ॥ २६ ॥
सा दुष्प्रधर्षा मनसापि हिंस्रैः
दृत्यद्रिशोभाप्रहितेक्षणेन ।
अलक्षिताभ्युत्पतनो नृपेण
प्रसह्य सिंहः(१)किल तां चकर्ष ॥ २७ ॥
तदीयमाक्रन्दितमार्त्तसाधोः
गुहानिबद्धप्रतिशब्ददीर्घम् ।
रश्मिष्विवादाय नगेन्द्रसत्तां
निवर्त्तयामास नृपस्य दृष्टिम् ॥ २८ ॥

ढानि यस्मिन् तत् । "शष्पं बालतृणं घासः" इत्यमरः । गौरीः गुरोः पार्वतीपितुः गह्वरं गुहाम् आविवेश ॥ २६ ॥

सेति । सा धेनुः हिंस्रैः व्याघ्रादिभिः मनसा अपि दुष्प्रधर्षा दुर्धर्षा इति हेतोः अद्रिशोभायां प्रहितेक्षणेन दत्तदृष्टिना नृपेण अलक्षितम् अभ्युत्पतनम् आभिमुख्येन उत्पतनं यस्य सः सिंहः तां धेनुं प्रसह्य हठात् । "प्रसह्य तु हठार्थकम्" इत्यमरः । चकर्ष, किलेत्यलीके ॥ २७ ॥

तदीयमिति । गुहानिबद्धेन प्रतिशब्देन प्रतिध्वनिना दीर्घं तस्याः इदं तदीयम् आक्रन्दितम् आर्त्तघोषणम् आर्त्तेषु आपन्नेषु साधोः हितकारिणः नृपस्य नगेन्द्रसत्तां दृष्टिं रश्मिषु

(१) सिंहः—सिंह—षष्, वर्णविपर्ययः ।

सं पाटलायां गवि तस्थिवांसं
धनुर्धरः केशरिणं (१) ददर्श।
अधित्यकायामिव धातुमय्यां
लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥ २९ ॥
ततो मृगेन्द्रस्य मृगेन्द्रगामी
वधाय वध्यस्य शरं शरण्यः।

प्रग्रहेषु। "किरणप्रग्रहौ रश्मौ" इत्यमरः। आदाय इव गृहीत्वा इव निवर्त्तयामास ॥ २८ ॥

स इति। धनुर्धरः स नृपः पाटलायां रक्तवर्णायां गवि तस्थिवांसं स्थितम्। क्वसुश्चेति क्वसुप्रत्ययः। केशरिणं सिंहं सानुमतः अद्रेः धातोः गैरिकस्य विकारः धातुमयी तस्याम् अधित्यकायाम् ऊर्द्धभूमौ। "उपत्यकाद्रेरासन्ना भूमिरूर्द्धमधित्यका" इत्यमरः। उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन्प्रत्ययः। प्रफुल्लः विकसितः तम्। फुल्ल विकसने इति धातोः पचाद्यच्। लोध्राख्यं द्रुमम् इव ददर्श। प्रफुल्लतमिति तकारपाठे ञि फला विशरणे इति धातोः कर्त्तरि क्तः, उत्परस्यात इत्युकारादेशः ॥ २९ ॥

तत इति। ततः सिंहदर्शनानन्तरं मृगेन्द्रगामी सिंहगामी शरण्यं रक्षणम्। "शरण्यं रक्षणे गृहे" इति यादवः। शरण्ये साधुः शरण्यः। तत्र साधुरिति यत्प्रत्ययः। प्रसभेन बलात्कारेण

(१) "केशरिपदेन प्रफुल्लत्वात् साम्यम्" इति दिनकरः।

जाताभिषङ्गो नृपतिर्निषङ्गात्
उद्धर्त्तुमैच्छत् प्रसभोद्धृतारिः ॥ २० ॥
वामेतरस्तस्य करः प्रहर्त्तुः
नखप्रभाभूषितकङ्कपत्रे (१) ।
सक्ताङ्गुलिः सायकपुङ्ख एव
चित्रार्पितारम्भ इवावतस्थे ॥ २१ ॥
बाहुप्रतिष्टम्भविवृद्धमन्युः
अभ्यर्णमागस्कृतमस्पृशद्भिः ।

उद्धृताः अरयः येन सः नृपतिः राजा जाताभिषङ्गः जातपराभवः सन् । "अभिषङ्गः पराभवः" इत्यमरः । वध्यस्य वधार्हस्य । दण्डादिभ्यो यदिति यत्प्रत्ययः । मृगेन्द्रस्य वधाय निषङ्गात् तूणीरात् । "तूणीपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः" इत्यमरः । शरम् उद्धर्त्तुम् ऐच्छत् ॥ २० ॥

वामेति । प्रहर्त्तुः तस्य वामेतरः दक्षिणः करः नखप्रभाभिः भूषितानि विच्छुरितानि कङ्कस्य पक्षिविशेषस्य पत्राणि (पक्षाः) यस्य तस्मिन् । "कङ्कः पक्षिविशेषे स्यात् गुप्ताकारे युधिष्ठिरे" इति विश्वः । सायकस्य पुङ्खे एव कर्त्तर्य्याख्ये मूलप्रदेशे । "कर्त्तरी पुङ्खे" इति यादवः । सक्ताङ्गुलिः सन् चित्रार्पितारम्भः चित्रलिखितशरोद्धरणोद्योगः इव अवतस्थे ॥ २१ ॥

बाहुरिति । बाहोः प्रतिष्टम्भेन प्रतिबन्धेन । "प्रतिबन्धः

(१) अस्यार्द्धस्य प्रतिबद्धमार्गे पुङ्खे कङ्कपक्षाणि बध्यन्ते इति प्रसिद्धिः ॥

राजा स्वतेजोभिरदह्यतान्तः
भोगीव मन्त्रौषधिरुद्धवीर्य्यः ॥ ३२ ॥
तमार्य्यगृह्यं निगृहीतधेनुः
मनुष्यवाचा मनुवंशकेतुम्।
विस्मापयन् विस्मितमात्महत्तौ
सिंहोरुसत्वं निजगाद सिंहः ॥ ३३ ॥

प्रतिष्टम्भः" इत्यमरः। विहतमन्युः प्रहतरोषः राजा मन्त्रौषधिभ्यां रुद्धवीर्य्यः प्रतिबद्धशक्तिः भोगी सर्प इव। "भोगी राजभुजङ्गयोः" इति यादवः। अभ्यर्णम् अन्तिकम्। "उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम्" इत्यमरः। आगस्कृतम्(१) अपराधकारिणम् असृग्धरैः स्वतेजोभिः अन्तः अदह्यत। "अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपि" इति यादवः ॥ ३२ ॥

तमिति। निगृहीता पीड़िता धेनुः येन स सिंहः आर्य्याणां सतां गृह्यं पक्षम्। पदाखैरिवाह्यापचेषु चेति क्यप्। मनुवंशस्य केतुं चिह्नं केतुवत् व्यावर्त्तकम् (२)। सिंह इव उरुसत्त्वः महाबलः तम्, आत्मनः हत्तौ बाहुस्तम्भरूपे व्यापारे अभूतपूर्वत्वात् विस्मितम्। कर्त्तरि क्तः। तं दिलीपं मनुष्यवाचा करणेन पुनः विस्मापयन् विस्मयम् आवर्य्यं प्रापयन् निजगाद। स्मिङीषदसन इति धातोर्णिचि हृदो आयादेशे

(१) आगः अपराधं करोतीति आगस्कृत् तं तथोक्तम्। (२) व्यावर्त्तकं व्यावर्त्तकारकं इतरेभ्यो राजवंशेभ्यः मनुवंशस्य विशेषीतूकर्षकारकमित्यर्थः।

अलं महीपाल तव श्रमेण
प्रयुक्तमप्यस्त्रमितो द्वया स्यात् ।
न पादपोन्मूलनशक्ति रंहः
शिलोच्चये मूर्च्छति मारुतस्य ॥ ३४ ॥
कैलासगौरं(१)वृषमारुरुक्षोः
पादार्पणानुग्रहपूतपृष्ठम् ।

शत्रप्रत्यये च सति विस्मापयन्निति रूपं सिद्धम् । विस्मापयन्निति पाठे पुगागममात्रं वक्तव्यं तच्च चिन्त्यं नित्यं स्मयतेरिति हेतुभयविवक्षायामेवेति भीमसेनोहैतुभय इत्याक्षनेपदे विस्मापयमान इति स्यात् तस्मात् मनुष्यवाचा विस्मापयन्निति रूपं सिद्धं करणविवक्षायां न कश्चित् दोषः ॥ ३३ ॥

अलमिति । हे महीपाल तव श्रमेण अलं साध्याभावात् श्रमो न कर्त्तव्यः इत्यर्थः । अत्र गम्यमानसाधनक्रियापेक्षया श्रमस्य करणत्वात् तृतीया । उक्तञ्च, न्यासोद्योते "न केवलं श्रूयमाणैव क्रिया निमित्तं करणभावस्य अपि तर्हि गम्यमानापि" इति । "अलं भूषणपर्याप्तिशक्तिवारणवाचकम्" इत्यमरः । इतः अस्मिन् मयि । सार्व्वविभक्तिकस्तसिः । प्रयुक्तम् अपि अस्त्रं द्वया स्यात् । तथाहि, पादपोन्मूलने शक्तिः यस्य तत् तथोक्तं मारुतस्य रंहः वेगः शिलोच्चये पर्व्वते न मूर्च्छति न प्रसरति ॥ ३४ ॥

कैलासमिति । कैलास इव गौरः शुभ्रः तम् । "चामी-

(१) कैलासवत् उन्नतं च भवति ।

अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम्(१) ॥ ३५ ॥
अमुं पुरः पश्यसि देवदारुं
पुत्रीकृतोऽसौ वृषभध्वजेन।
यो हेमकुम्भस्तननिःसृतानां
स्कन्दस्य मातुः पयसां रसज्ञः ॥ ३६ ॥

करश्च शुभ्रश्च गौरमाङ्गुर्मनीषिणः" इति शाश्वतः। वृषं वृषभम् आरुरुक्षोः आरोढ़ुम् इच्छोः स्वस्योपरि पदं निधाय वृषमारोहति इत्यर्थः। अष्टौ मूर्त्तयः यस्य सः तस्य अष्टमूर्त्तेः शिवस्य पादार्पणं पादन्यासः तत् एव अनुग्रहः प्रसादः तेन पूतं पृष्ठं यस्य तं तथोक्तं निकुम्भमित्रं कुम्भोदरं नाम किङ्करं माम् अवेहि विद्धि। "पृथिवी सलिलं तेजो वायुराकाशमेव च। सूर्याचन्द्रमसौ सोमयाजी चेत्यष्टमूर्त्तयः" इति यादवः ॥ ३५ ॥

अमुमिति। पुरः अग्रतः अमुं देवदारुं पश्यसि इति काकुः (२)। असौ देवदारुः वृषभः ध्वजे यस्य सः तेन शिवेन पुत्रीकृतः पुत्रत्वेन स्वीकृतः। अभूततद्भावे च्विः। यः देवदारुः

(१) निकुम्भेन पार्वतीवाहनेन सिंहेन तुल्यः तमिति वक्तुमः। यद्वा निकुम्भस्य कुम्भकर्णपुत्रस्य मित्रमिति भद्रः। But according to Kasikhanda, Siva and Parvati, desirous of occupying Kasi, which Divodasa (a king of the lunar dynasty) possessed, sent Nikumbha, one of the Ganas of the former, to lead the prince to the adoption of Buddhist doctrines; in consequence of which, he was expelled from the sacred city. See V. P. Book I V chap VIII.

(२) भोक्तर्भोग्यादिभिः भिन्नकर्तृभिः काकुः।

कण्डूयमानेन कटं कदाचित्
वन्यद्विपेनोन्मथिता त्वगस्य ।
अथैनमद्रेस्तनया शुशोच
सेनानिमालीढमिवासुरास्त्रैः ॥ ३७ ॥
तदाप्रभृत्येव वनद्विपानां
त्रासार्थमस्मिन्नहमद्रिकुक्षौ ।

स्कन्दस्य मातुः गौर्याः हेम्नः कुम्भः एवः स्तनः तस्मात् निःसृतानां पयसाम् अम्बूनां रसज्ञः स्वादज्ञः । स्कन्दपक्षे हेमकुम्भः इव स्तनः इति विग्रहः । पयसां क्षीराणाम् । "पयः क्षीरं पयोऽम्बु च" इत्यमरः । स्कन्दसमानप्रेमास्पदम् इति भावः ॥ ३६ ॥

कण्डूयमानेनेति । कदाचित् कटं करीषं कण्डूयमानेन कर्षता । कण्ड्वादिभ्यो यगिति यक्, ततः शानच् । वन्यद्विपेन अस्य देवदारोः त्वक् उन्मथिता । अथ अद्रेः तनया गौरी असुरास्त्रैः आलीढं व्याप्तं, सेनां नयतीति सेनानीः स्कन्दः । "पार्वतीनन्दनः स्कन्दः सेनानीः" इत्यमरः । सत्सु-द्विषेत्यादिना क्विप् । तम् इव एनं देवदारुं शुशोच ॥ ३७ ॥

तदेति । तदा तत्कालः प्रभृतिः आदिः यस्मिन् कर्म्मणि(१) तत् तथा तदाप्रभृति एव वनद्विपानां त्रासार्थं भयार्थं शूलभृता शिवेन अद्रेः समीपम् आगताः प्राप्ताः सत्त्वाः प्राणिनः वृत्तिः यस्मिन् तत् । "अद्रेः समीप उत्सङ्गे चिह्ने स्थानापराधयोः"

(१) यदा समर्थस्य दा प्रत्ययस्य अवयवानुपपत्तेः सप्तम्या प्रथमैकत्वं प्रथमैकवचनमात् ।

व्यापारितः शूलभृता विधाय
सिंहत्वमङ्गागतसत्ववृत्ति ॥ ३८ ॥
तस्यालमेषा क्षुधितस्य तृप्तौ
प्रदिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे
सुरद्विषश्चान्द्रमसी सुधेव (१) ॥ ३९ ॥
स त्वं निवर्त्तस्व विहाय लज्जां
गुरोर्भवान् दर्शितशिष्यभक्तिः ।

इति केशवः । सिंहत्वं विधाय अस्मिन् अद्रिकुक्षौ गुहायाम् अहं व्यापारितः नियुक्तः ॥ ३८ ॥

तस्येति । परमेश्वरेण प्रदिष्टः निर्दिष्टः कालः भोजनवेला यस्याः सा उपस्थिता प्राप्ता एषा गोरूपा शोणितपारणा रुधिरस्य व्रतान्तभोजनं सुरद्विषः राहोः चन्द्रमसः इयं चान्द्रमसी सुधा इव क्षुधितस्य बुभुक्षितस्य तस्य अङ्गागतसत्ववृत्तेः मे मम सिंहस्य तृप्तौ अलं पर्य्याप्ता । नमःस्वस्तीत्यादिना चतुर्थी ॥३९॥

स इति । स एवम् उपायशून्यः त्वं लज्जां विहाय निवर्त्तस्व । भवान् त्वं गुरोः दर्शिता प्रकाशिता शिष्यस्य कर्त्तव्या भक्तिः येन सः तथोक्तः असि । ननु गुरुधनं विनाश्य कथं तत्समीपं गच्छेयमत आह शस्त्रेणेति । यत् रक्ष्यं धनं शस्त्रेण आयुधेन । "शस्त्रमायुधलोहयोः" इत्यमरः । अनया रक्षा

(१) 'कथं कथंचं क्षुधितस्य मे इमां उपस्थिता इति मल्लिनाथेन व्याख्यातं ।'

शस्त्रेण रक्ष्यं यदशक्यरक्षं
न तद्यशः शस्त्रभृतां क्षिणोति ॥ ४० ॥
इति प्रगल्भं पुरुषाधिराजः
मृगाधिराजस्य वचो निशम्य ।
प्रत्याहृतास्त्रो गिरिशप्रभावात्
आत्मन्यवज्ञां शिथिलीचकार ॥ ४१ ॥
प्रत्यब्रवीच्चैनमिषुप्रयोगे
तत्पूर्वभङ्गे वितथप्रयत्नः ।

यस्य तत् अशक्यरक्षं रक्षितुमशक्यम् इत्यर्थः तत् रक्ष्यं नष्टम् अपि शस्त्रभृतां यशः न क्षिणोति न हिनस्ति अशक्यार्थेष्वप्रतिविधानं न दोषाय इति भावः ॥ ४० ॥

इतीति । पुरुषाणाम् अधिराजः नृपः इति प्रगल्भं मृगाधिराजस्य वचः निशम्य श्रुत्वा गिरिशस्य ईश्वरस्य प्रभावात् प्रत्याहृतास्त्रः कुण्ठितास्त्रः सन् आत्मनि विषये अवज्ञाम् अपमानं शिथिलीचकार तत्याज इत्यर्थः अवज्ञातोऽहमिति निर्वेदं न प्राप इत्यर्थः । समानेषु हि क्षत्रियाणामभिमानी न सर्वेश्वरं प्रति इति भावः ॥ ४१ ॥

प्रतीति । स एव पूर्वः प्रथमः भङ्गः प्रतिबन्धः यस्य तस्मिन् तत्पूर्वभङ्गे इषुप्रयोगे वितथप्रयत्नः विफलप्रयासः अतएव मध्यं कुक्षिं सुमुक्षन् मोक्तुम् इच्छन् अम्बकं लोचनम् । "दृग्दृष्टिनेत्रलोचनचक्षुर्नयनाम्बकेक्षणाक्षीणि" इति हलायुधः ।

जड़ीकृतस्त्र्यम्बकवीक्षणेन
वज्रं मुमुक्षन्निव वज्रपाणिः ॥ ४२ ॥
संरुद्धचेष्टस्य मृगेन्द्र कामं
हास्यं वचस्तद्यदहं विवक्षुः।
अन्तर्गतं प्राणभृतां हि वेद
सर्व्वं भवान् भावमतोऽभिधास्ये ॥ ४३ ॥

त्रीणि अम्बकानि यस्य सः त्र्यम्बकः हरः तस्य वीक्षणेन जड़ीकृतः निष्पन्दीकृतः वज्रं पाणौ यस्य सः वज्रपाणिः इन्द्रः। प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः इति वक्तव्यमिति पाणेः सप्तम्यन्तस्योत्तरनिपातः। स इव स्थितः नृपः एनं सिंहं प्रत्यब्रवीच्च। "वाहुं सवज्रं मक्रस्य कृन्तस्यास्तभयत् प्रभुः" इति महाभारते ॥ ४२ ॥

संरुद्धेति। हे मृगेन्द्र संरुद्धचेष्टस्य प्रतिवद्धव्यापारस्य मम तत् वचः वाक्यं कामं हास्यं परिहसनीयं यत् वचः सः त्वं मदीयेनेत्यादिकम् अहं विवक्षुः वक्तुम् इच्छुः अस्मि। तर्हि तूष्णीं स्थीयतामित्यागङ्क्य ईश्वरकिङ्करत्वात् सर्व्वज्ञं त्वां प्रति न हास्यमित्याह, अन्तरिति। हि यतः भवान् प्राणभृताम् अन्तर्गतं हृदतं वाग्वृत्त्या वहिरप्रकाशितम् एव सर्व्वं भावं वेद वेत्ति। विदो लटो वेति णलादेशः। अतः अहम् अभिधास्ये वक्ष्यामि, वच इति प्रकृतं कर्म्म सम्बध्यते। अन्ये त्वीदृग्वचनमाकर्ण्य सम्भावितार्थमेतदित्युपहसन्ति अतस्तु मौनमेव भूषणं। त्वं तु

मान्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रत्यवहारहेतुः ।
गुरोरपीदं धनमाहिताग्नेः (१)
नश्यत् पुरस्तादनुपेक्षणीयम् ॥ ४४ ॥
स त्वं मदीयेन शरीरवृत्तिं
देहेन निर्वर्त्तयितुं प्रसीद ।

वाङ्मनसयोरेकविध एवायमिति जानासि अतोऽभिधास्ये यद्वचोऽहं वियतुः इत्यर्थः ॥ ४३ ॥

मान्य इति । प्रत्यवहारः प्रलयः । स्थावराणां तरुगुल्मादीनां जङ्गमानां मनुष्यादीनां सर्गस्थितिप्रत्यवहारेषु हेतुः सः ईश्वरः मे मम मान्यः पूज्यः अलङ्घ्यशासनः इत्यर्थः । शासनञ्च सिंहत्वमङ्गागतसत्ववृत्तीत्युक्तरूपम् । तर्हि विसृज्य गम्यतां नेत्याह, गुरोरपीति । पुरस्तात् अग्रे नश्यत् इदम् आहिताग्नेः गुरोः धनम् अपि गोरूपम् अनुपेक्षणीयम् । आहिताग्नेरिति विशेषणेनानुपेक्षाकारणं हविःसाधनत्वं सूचयति ॥ ४४ ॥

स इति । सः अङ्गागतसत्ववृत्तिः त्वं मदीयेन देहेन शरीरस्य वृत्तिं जीवनं निवर्त्तयितुं सम्पादयितुं प्रसीद । दिनाव-

(१) "पाणिग्रहणादि गृह्यं परिचरेत् स्वयं यद्यपि वा गुरुः कुमार्यस्ते वासी वा" इति नियमेन पाणिग्रहणादारभ्य येनाग्निराहितः स एवाहिताग्निः । तथाचोक्तं—"यौऽग्नीनादधाति विवाहाग्निं गृह्यं इति मन्यते । अन्नं तस्य न भोक्तव्यं श्राद्धपाकीहि सः स्मृतः" इति अत्र कल्पान्तरमपि दृश्यते तथाहि "अपि वैवाहिकी येन न गृहीतः प्रमादिना । पितर्येव परते तेन गृहीतव्यः प्रयत्नतः" इति ।

दिनावसानोत्सुकबालवत्सा
विसृज्यतां धेनुरियं महर्षेः ॥ ४५ ॥
अथान्धकारं गिरिगह्वराणां
दंष्ट्रामयूखैः शकलानि कुर्व्वन्।
भूयः स भूतेश्वरपार्श्ववर्त्ती
किञ्चिद्विहस्यार्थपतिं बभाषे ॥ ४६ ॥
एकातपत्रं जगतः प्रभुत्वं
नवं वयः कान्तमिदं वपुश्च।
अल्पस्य हेतोर्बहु हातुमिच्छन्
विचारमूढः प्रतिभासि मे त्वम् ॥ ४७ ॥

सायं उत्सुकः माता समागमिष्यतीत्युत्कण्ठितः बालवत्सः यस्याः सा महर्षेः इयं धेनुः विसृज्यताम् ॥ ४५ ॥

अथेति। अथ भूतेश्वरस्य पार्श्ववर्त्ती अनुचरः स सिंहः गिरेः गह्वराणां गुहानाम्। "देवखातबिले गुहा गह्वरम्" इत्यमरः। अन्धकारं ध्वान्तं दंष्ट्रामयूखैः शकलानि खण्डानि कुर्व्वन् निरस्यन् इत्यर्थः, किञ्चित् विहस्य अर्थपतिं नृपं भूयः बभाषे। हासकारणम् अल्पस्य हेतोर्बहु हातुमिच्छन्निति वक्ष्यमाणं द्रष्टव्यम् ॥ ४६ ॥

एकेति। एकातपत्रम् एकच्छत्रं जगतः प्रभुत्वं स्वामित्वं, नवं वयः यौवनम्, इदं कान्तं रम्यं वपुश्च, इत्येवं बहु अल्पस्य हेतोः अल्पेन कारणेन अल्पफलाय इत्यर्थः। "षष्ठी हेतु-

भूतानुकम्पा तव चेदियं गौः
एका भवेत् स्वस्तिमती त्वदन्ते ।
जीवन् पुनः शश्वदुपप्लवेभ्यः
प्रजाः प्रजानाथ पितेव पासि ॥ ४८ ॥
अथैकधेनोरपराधचण्डात्
गुरोः कृशानुप्रतिमाद्बिभेषि ।

प्रयोगे" इति षष्ठी । हातुं त्यक्तुम् इच्छन् त्वं विचारे कार्याकार्यविमर्शे मूढः मूर्खः मे मम प्रतिभासि ॥ ४७ ॥

भूतेति । तव भूतेषु अनुकम्पा-कृपा चेत् । "कृपा दयाऽनुकम्पा स्यात्" इत्यमरः । कृपैव वर्त्तते चेत् इत्यर्थः, तर्हि त्वदन्ते तव नाशे सति इयम् एका गौः स्वस्ति चेमम् अस्याः अस्तीति स्वस्तिमती भवेत् जीवेत् इत्यर्थः । "स्वस्त्यग्नीःचेमपुण्यादौ" इत्यमरः । हे प्रजानाथ जीवन् पुनः पिता इव प्रजाः उपप्लवेभ्यः विघ्नेभ्यः शश्वत् सदा । "पुनःसदार्थयोः शश्वत्" इत्यमरः । पासि रक्षसि । स्वप्राणव्ययेनैकधेनुरक्षणाद्धरं जीविनैव शश्वदखिलजगद्घातम् इत्यर्थः ॥ ४८ ॥

न धर्मलोपादियं प्रवृत्तिः किन्तु गुरुभयादित्यत आह, अथेति । अथेति पक्षान्तरे अथवा एका एव धेनुः यस्य तस्मात् । अयं कोपकारणोपन्यास इति श्रेयम् । अत एव अपराधे गवोपेक्षालक्षणे सति चण्डात् अतिकोपनात् । "चण्डस्त्यत्यन्तकोपनः" इत्यमरः । अत एव कृशानुः अग्निः प्रतिमा उपमा

शक्योऽस्य मन्युर्भवता विनेतुं
गाः कोटिशः स्पर्शयता घटोध्नीः ॥ ४९ ॥
तद्वच्च कल्याणपरम्पराणां
भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नम्
पदमैन्द्रमाहुः ॥ ५० ॥

यस्य तस्मात् अग्निकल्पात् गुरोः विभेषि इति काकुः । भीत्यर्थानां भयहेतुरित्यपादानात् पञ्चमी । अल्पवित्तस्य धनहानिः अतिदुःसहा इति भावः । अस्य गुरोः मन्युः क्रोधः । "मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः । घटाः इव उधांसि यासां ताः घटोध्नीः । उधसोऽनङित्यनङादेशः, बहुव्रीहेरुधसोङीषिति ङीष् । कोटिशः गाः स्पर्शयता प्रतिपादयता । "विद्याणनं वितरणं स्पर्शनं प्रतिपादनम्" इत्यमरः । भवता विनेतुम् अपनेतुं शक्यः ॥ ४९ ॥

तदिति । तत् तस्मात् कारणात् कल्याणपरम्पराणां भोक्तारम् । कर्मणि षष्ठी । ऊर्जः बलम् अस्य अस्तीति ऊर्जस्वलम् । ज्योत्स्नातमिस्रेत्यादिना वलच्प्रत्ययान्तो निपातः । आत्मदेहं रक्षं । ननु गामुपेक्ष्य आत्मदेहरक्षणे स्वर्गहानिः स्यात्, नेत्याह, महीतलेति । ऋद्धं समृद्धं राज्यं महीतलस्पर्शनमात्रेण भूतलसम्बन्धमात्रेण भिन्नम् ऐन्द्रम् इन्द्रसम्बन्धि पदं स्थानम् आहुः स्वर्गान्न भिद्यते इत्यर्थः ॥ ५० ॥

एतावदुक्त्वा विरते मृगेन्द्रे
प्रतिस्वनेनास्य गुहागतेन ।
शिलोच्चयोऽपि क्षितिपालमुच्चैः
प्रीत्या तमेवार्थमभाषतेव ॥ ५१ ॥
निशम्य देवानुचरस्य वाचं
मनुष्यदेवः पुनरप्युवाच ।
धेन्वा तदध्यासितकातराक्ष्या(१)
निरीक्ष्यमाणः सुतरां दयालुः ॥ ५२ ॥

एतावदिति । मृगेन्द्रे (सिंहे) एतावत् उक्त्वा विरते सति गुहागतेन अस्य सिंहस्य प्रतिस्वनेन (प्रतिध्वनिना) शिलोच्चयः शैलोऽपि प्रीत्या तम् एव अर्थं क्षितिपालम् उच्चैः अभाषत इव इत्युत्प्रेक्षा । भाषिरयं ब्रुविसमानार्थत्वात् द्विकर्मकः, ब्रुविशु द्विकर्मकेषु पठितः । तदुक्तम्, "दुहियाचिरुधिप्रच्छिभिक्षिचिक्षि-मुषयोगनिमित्तमपूर्वविधौ । ब्रुविशासिगुणेन च यत् सचते तदकीर्त्तितमाचरितं कविना" इति ॥ ५१ ॥

निशम्येति । देवानुचरस्य ईश्वरकिङ्करस्य सिंहस्य वाचं निशम्य मनुष्यदेवः राजा पुनः अपि उवाच । किम्भूतः सन्, तेन सिंहेन यत् अध्यासितं व्याक्रमणम् । नपुंसके भावे क्तः ।

(१) "तदध्यासनकातराक्ष्या" इति वल्लभेन पठितम् । "तस्य सिंहस्य अध्यासनं तेन कातरे अक्षिणी यस्याः सा तया सिंहाक्रमणेन क्षुभितनेत्रया" इति वल्लभः । तदध्यासिता चासावेव कातराक्षी इति मल्लिः ।

चतात् किल त्रायत इत्युदग्रः (१)
चत्रस्य शब्दो भुवनेषु रूढः।
राज्येन किं तद्विपरीतवृत्तेः
प्राणैरुपक्रोशमलीमसैर्वा ॥ ५३ ॥

तेन कातरे अक्षिणी यस्याः तया। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षजिति षच्" पिन्नौरादिभ्यश्चेति ङीप्। किं वा वक्ष्यतीति भीत्यैवं स्थितया इत्यर्थः, पत्या निरीक्ष्यमाणः अत एव सुतरां (अत्यर्थं) दयालुः सन्। सुतरामित्यत्र द्विवचनविभज्योत्यादिना सुशब्दात् तरप्, किमेत्तिङव्ययेत्यादिना आम्प्रत्ययः, तद्धितश्चासर्व्वविभक्तिरित्यव्ययसंज्ञा ॥ ५२ ॥

किमुवाचेत्याह, चतादिति। चद हिंसायामिति धातोः सम्पदादित्वात् क्विप्, गमादीनामिति वक्तव्यादनुनासिकलोपे तुगागमे च चदिति रूपं सिद्धम्। चतः नाशात् त्रायते इति चत्रः सुपीति योगविभागात् कः। तामेतां व्युत्पत्तिं कविरर्थतोऽनुक्रामति चतादित्यादिना। उदग्रः उन्नतः चत्रस्य चत्रवर्णस्य शब्दः वाचकः चत्रशब्दः इत्यर्थः, चतात् त्रायते इति

(१) The derivation of the word चत्र as given in the text is rather fanciful. The proper derivation seems to be from meaning strength; hence he, who is noted for deeds of strength, came also to be called चत्र or क्षत्रिय। In the following hymn the word चद is used in the sense of strength "नहि ते चदं, न सहो, न मन्यं ववयनामी पतयन्त आपुः।" Translate—"these birds, flying in the air, have not attained thy strength, nor thy power; nor are they up to thy wrath." Rig i.24.6.

कथं नु शक्योऽनुनयो महर्षेः
विश्राणनाच्चानघपयस्विनीनाम् ।
इमामनूनां (१) सुरभेरवेहि
रुद्रौजसा तु प्रहृतं त्वयास्याम् ॥ ५४ ॥

व्युत्पत्त्या भुवनेषु रूढः किल प्रसिद्धः खलु, नाखकर्णादिवत् केवलरूढः किन्तु पङ्कजादिवत् योगरूढः इत्यर्थः । ततः किमित्यत आह, तस्य चक्षुशब्दस्य विपरीतवृत्तेः विरुद्धव्यापारस्य चतः त्राणम् अकुर्वतः पुंसः राज्येन किम् । उपक्रोशमलीमसैः निन्दामलिनैः । "उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे" इत्यमरः । ज्योत्स्नातमिस्रेत्यादिना मलीमसशब्दो निपातितः । "मलीमसं तु मलिनं कश्मलं मलदूषितम्" इत्यमरः । प्राणैर्वा किं, निन्दितस्य सर्वं व्यर्थम् इत्यर्थः । एतेनैकातपत्रमित्यादिना श्लोकद्वयेनोक्तं प्रत्युक्तमिति वेदितव्यम् ॥ ५३ ॥

अथैकधेनोरित्यत्रोत्तरमाह, कथमिति । अनुनयः क्रोधापनयः (प्रसादनमित्यर्थः) । चकारो वाकारार्थः । महर्षेः अनुनयः वा अन्यासां पयस्विनीनां दोग्ध्रीणां गवां विश्राणनात् दानात् । "त्यागो वितरणं दानमुत्सर्जनविसर्जने । विश्राणनं वितरणम्" इत्यमरः । कथं नु शक्यः, न शक्यः इत्यर्थः । अत्र हेतुमाह, इमां गां सुरभेः कामधेनोः । पञ्चमी विभक्ति इति पञ्चमी । अनूनाम् अन्यूनाम् अवेहि जानीहि । तर्हि कथमस्याः परिभवोऽ-

(१), न ऊना न हीना अनूना तादृशी नाम् ।

सेयं स्वदेहार्पणनिष्क्रयेण(१)
न्याय्या मया मोचयितुं भवत्तः।
न पारणा स्याद्विहता तवैवं
भवेदलुप्तस्य मुनेः क्रियार्थः॥ ५५॥

भूदित्याह, रुद्रौजसेति। अस्यां गवि त्वया कर्त्रा प्रहृतं तु प्रहारस्तु। नपुंसके भावे क्तः। रुद्रौजसा ईश्वरसामर्थ्येन, न तु तव इत्यर्थः। सप्तम्यधिकरणे चेति सप्तमी॥ ५४॥

तर्हि किं चिकीर्षितमित्यवाह, सेयमिति। सा इयं गौः मया, निष्क्रीयते प्रत्याक्रियते अनेन, परगृहीतम् इति निष्क्रयः प्रतिगौर्यकम्। एरजिति अच्प्रत्ययः। स्वदेहार्पणम् एव निष्क्रयः, तेन भवत्तः त्वत्तः। पञ्चम्यास्तसिल्। मोचयितुं न्याय्या न्यायात् अनपेता युक्ता इत्यर्थः। धर्मपथ्यर्थेत्यादिना यत्प्रत्ययः। एवं सति तव पारणा भोजनं विहता न स्यात्, मुनेः क्रिया होमादिः(२)स एव अर्थः प्रयोजनं स च अलुप्तः भवेत्। स्वप्राणव्ययेनापि स्वामिगुरुधनं संरक्ष्यम् इति भावः॥ ५५॥

---

(१) स्वदेहार्पणं स्वार्पितस्वदेहः तदेव निष्क्रयः प्रतिमूल्यं तेन, "क्तादिहितौ भावौ द्रव्यवत् प्रकाशनते" इति नियमात्।

(२) होमस्य पञ्चयज्ञानामेनःपातित्वात् नित्यकर्मत्वेन न कथञ्चिदपि क्षापनीयत्वं। यदुक्तं— "ब्रह्मयज्ञो नृयज्ञश्च देवयज्ञश्च सप्तम।
पितृयज्ञोभूतयज्ञः पञ्च यज्ञाः प्रकीर्त्तिताः"। इति पद्मपुराणम्।
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं। होमो देवो बलिर्भौतो नृयज्ञोऽतिथिपूजनं। पञ्चैतान् यो महायज्ञान् न क्षापयति शक्तितः। स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते" इति। सूना मांसविक्रये।

भवानपीदं परवानवैति
महान् हि यत्नस्तव देवदारौ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे
विनाश्य रक्ष्यं स्वयमक्षतेन ॥ ५६ ॥
किमप्यहिंस्यस्तव चेन्मतोऽहं
यशःशरीरे भव मे दयालुः।

अथ भवानेव प्रमाणमित्याह, भवानिति। परवान् स्वामिपरतन्त्रः भवान् अपि। "परतन्त्रः पराधीनः परवान् नाथवानपि" इत्यमरः। इदं वक्ष्यमाणम् अवैति, भवता अनुभूयते एव इत्यर्थः। शेषे प्रथम इति प्रथमपुरुषः। किमित्यत आह, हि यस्मात् हेतोः। "हि हेताववधारणे" इत्यमरः। तव देवदारौ विषये महान् यत्नः महता यत्नेन रक्ष्यते इत्यर्थः। इदंशब्दोक्तमर्थं दर्शयति, स्थातुमिति। रक्ष्यं वस्तु विनाश्य विनाशं गमयित्वा स्वयम् अक्षतेन अव्रणेन, नियुक्तेन इति शेषः। नियोक्तुः स्वामिनः अग्रे स्थातुं शक्यं न हि ॥ ५६ ॥

सर्व्वथा चैतदप्रतिहार्य्यमित्याह, किमिति। किम् अपि किंवा अहं तव अहिंस्यः अवध्यः मतः चेत् तर्हि मे यशः एव शरीरं तस्मिन् दयालुः कारुणिकः भव। "स्याद्दयालुः कारुणिकः" इत्यमरः। ननु मुख्यमुपेक्ष्यामुख्यशरीरे कोऽभिनिवेशः, अत आह, एकान्तेति। मद्विधानां मादृशानां विवेकिनाम् एकान्तविध्वंसिषु अवश्यविनाशिषु भौतिकेषु पृथिव्यादिभूत-

एकान्तविध्वंसिषु मद्विधानां
पिण्डेष्वनास्था खलु भौतिकेषु ॥ ५७ ॥
सम्बन्धमाभाषणपूर्वमाहुः (१)
वृत्तः स नौ सङ्गतयोर्वनान्ते (२)
तद्भूतनाथानुग नार्हसि त्वं
सम्बन्धिनो मे प्रणयं विहन्तुम् ॥ ५८ ॥

विकारेषु पिण्डेषु शरीरेषु अनास्था खलु अनपेक्षा एव। "आस्था बालम्बनास्थानयत्नापेक्षासु कथ्यते" इति विश्वः ॥ ५७ ॥

सौहार्दादहमनुसरणीयोऽस्मीत्याह, सम्बन्धमिति। सम्बन्धं सख्यम् आभाषणम् आलापः पूर्वं कारणं यस्य तम् आहुः। "स्यादाभाषणमालापः" इत्यमरः। सः तादृक् सम्बन्धः वनान्ते सङ्गतयोः नौ आवयोः वृत्तः जातः तत् ततः हेतोः हे भूतनाथानुग शिवानुचर एतेन तस्य महत्त्वं सूचयति, अत एव सम्बन्धिनः मित्रस्य मे प्रणयं याच्ञाम्। "प्रणयास्त्वमी विश्रम्भयाच्ञामेमाणः" इत्यमरः। विहन्तुं न अर्हसि ॥ ५८ ॥

---

(१) Compare :- "यतः सतां सप्तपदीनमुच्यते"। इति कुमारसम्भवम् Canto v. As also "न त्वां करोम्यहं मख क्रोधतीव्रेण वह्निना। सतां सप्तपदं मैत्रमुषितोऽहं त्वया सह"॥ इति विष्णुपुराणम्।

(२) वनस्य भवं स्वरूपं वनान्तं वनमित्यर्थः, वनावसिते दृश्ये, स्वरूपे चान्तिकेऽपि चेति अभिधानात्।

तथेति गामुक्तवते दिलीपः
सद्यः प्रतिष्टम्भविमुक्तबाहुः ।
स न्यस्तशस्त्रो हरये स्वदेहम्
उपानयत् पिण्डमिवामिषस्य ॥ ५९ ॥
तस्मिन् क्षणे पालयितुः प्रजानाम्
उत्पश्यतः सिंहनिपातमुग्रम् ।
अधोमुखस्योपरि पुष्पवृष्टिः
पपात विद्याधरहस्तमुक्ता ॥ ६० ॥
उत्तिष्ठ वत्सेत्यमृतायमानं
वचो निशम्योत्थितमुत्थितः सन् ।

तथेति । तथा इति गाम् उक्तवते हरये सिंहाय । "कपौ सिंहे सुवर्णे च वर्णे विष्णौ हरिं विदुः" इति शाश्वतः । सद्यः तत्क्षणे प्रतिष्टम्भात् प्रतिबन्धात् विमुक्तः बाहुः यस्य स दिलीपः न्यस्तशस्त्रः त्यक्तायुधः सन् स्वदेहम् आमिषस्य मांसस्य । "पलले क्रव्यमामिषम्" इत्यमरः । पिण्डं कवलम् इव उपानयत् समर्पितवान् । एतेन निर्ममत्वमुक्तम् ॥ ५९ ॥

तस्मिन्निति । तस्मिन् क्षणे उग्रं सिंहनिपातम् उत्पश्यतः उत्प्रेक्षमाणस्य तर्कयतः अधोमुखस्य अधोमुखस्य । "स्यादवाङप्यधोमुखः" इत्यमरः । प्रजानां पालयितुः राज्ञः उपरि उपरिष्टात् । उपर्युपरिष्टादिति निपातः । विद्याधराणां देवयोनिविशेषाणां हस्तैः मुक्ता पुष्पवृष्टिः पपात ॥ ६० ॥

ददर्श राजा जननीमिव स्वां
गामग्रतः प्रस्रविणीं न सिंहम् ॥ ९१ ॥
तं विस्मितं धेनुरुवाच साधो
मायां मयोद्भाव्य परीक्षितोऽसि ।
ऋषिप्रभावान्मयि नान्तकोऽपि
प्रभुः प्रहर्त्तुं किमुतान्यहिंस्राः ॥ ९२ ॥
भक्त्या गुरौ मय्यनुकम्पया च
प्रीतास्मि ते पुत्र वरं वृणीष्व ।

उत्तिष्ठेति। राजा, अनृतमिव आचरतीति अनृतायमानं तत्। उपमानादाचार इति क्यङ्, ततः शानच्। उत्थितम् उत्पन्नं हे वत्स उत्तिष्ठ इति वचः निगद्य श्रुत्वा उत्थितः सन्। अर्तेः शटप्रत्ययः। अग्रतः अग्रे प्रस्रवः क्षीरस्रावः अस्ति यस्याः सा तां प्रस्रविणीं गां स्वां जननीम् इव ददर्श सिंहं न ददर्श ॥ ९१ ॥

तमिति। विस्मितम् आश्चर्यं गतम्। कर्त्तरि क्तः। तं दिलीपं धेनुः उवाच। किमित्यवाह, हे साधो मया मायाम् उद्भाव्य कल्पयित्वा परीक्षितः असि, ऋषिप्रभावात् मयि अन्तकः यमः अपि प्रहर्त्तुं न प्रभुः न समर्थः, अन्ये हिंस्राः घातुकाः। "गरारुर्घातुको हिंस्रः" इत्यमरः। नमिकम्पीत्यादिना रप्रत्ययः। किमुत सुष्ठु न प्रभवः इति योज्यम्। "बलवत् सुष्ठु किमुत स्वल्पतीव च निर्भरः" इत्यमरः ॥ ९२ ॥

न केवलानां पयसां प्रसूतिम्
अवेहि मां कामदुघां प्रसन्नाम् ॥ ६३ ॥
ततः समानीय स मानितार्थी
हस्तौ स्वहस्तार्जितवीरशब्दः ।
वंशस्य कर्त्तारमनन्तकीर्त्तिं
सुदक्षिणायां तनयं ययाचे ॥ ६४ ॥
सन्तानकामाय तथेति कामं
राज्ञे प्रतिश्रुत्य पयस्विनी सा ।

भक्तेति । हे पुत्र गुरौ भक्त्या मयि अनुकम्पया च ते तुभ्यं प्रीता अस्मि । क्रियाग्रहणमपि कर्त्तव्यमिति चतुर्थी । वरं देवेभ्यो वरणीयम् अर्थम् । "देवाद्दृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक् प्रिये" इत्यमरः । वृणीष्व स्वीकुरु । तथाहि, मां केवलानां पयसां प्रसूतिं कारणं न अवेहि न विद्धि किन्तु प्रसन्नां मां कामान् दोग्धीति कामदुघा ताम् अवेहि । दुहः कप् घश्चेति कप्प्रत्ययः ॥ ६३ ॥

तत इति । ततः मानितार्थी स्वहस्तार्जितः वीरः इति शब्दः येन सः । एतेनास्य 'दाढ्यं दैन्यराहित्यं चोक्तम् । स राजा हस्तौ समानीय सन्धाय अञ्जलिं बद्ध्वा इत्यर्थः वंशस्य कर्त्तारं प्रवर्त्तयितारम् अत एव रघुकुलमिति प्रसिद्धिः । अनन्तकीर्त्तिं चिरस्थायिनं तनयं सुदक्षिणायां ययाचे ॥ ६४ ॥

सन्तानेति । सा पयस्विनी गौः, सन्तानं कामयते इति

दुग्ध्वा पयः पत्रपुटे मदीयं
पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥ ६५ ॥
वत्सस्य होमार्थविधेश्च शेषम्
ऋषेरनुज्ञामधिगम्य मातः ।
औधस्यमिच्छामि तवोपभोक्तुं
षष्ठांशमुर्व्या इव रक्षितायाः ॥ ६६ ॥
इत्थं क्षितीशेन वसिष्ठधेनुः
विज्ञापिता प्रीततरा बभूव ।

सन्तानकामः । कर्मणि अण् । तस्मै राज्ञे तथेति काम्यते इति कामः वरः । कर्मार्थे घञ्प्रत्ययः । तं प्रतिश्रुत्य प्रतिज्ञाय हे पुत्र, मदीयं पयः पत्रपुटे पत्रनिर्मिते पात्रे दुग्ध्वा उपभुङ्क्ष्व पिब इति, उपयुङ्क्ष्व इति वा पाठः । तम् आदिदेश आज्ञापितवती ॥ ६५ ॥

वत्सस्येति । हे मातः वत्सस्य वत्सपीतस्य शेषं वत्सपीतावशिष्टम् इत्यर्थः, होमः एव अर्थः तस्य विधिः अनुष्ठानं तस्य शेषं होमावशिष्टम् इत्यर्थः । तव उधसि भवम् औधस्यं क्षीरम् । शरीरावयवाच्चेति यत्प्रत्ययः । रक्षितायाः उर्व्याः षष्ठांशं षष्ठभागम् इव ऋषेः अनुज्ञाम् अधिगम्य उपभोक्तुम् इच्छामि ॥ ६६ ॥

इत्थमिति । इत्थं क्षितीशेन विज्ञापिता वसिष्ठस्य धेनुः प्रीततरा पूर्वं शुश्रूषया प्रीता सम्प्रति एनया विज्ञापनया प्रीततरा अतिसन्तुष्टा बभूव, तदन्विता तेन दिलीपेन अन्विता

तद्न्विता हैमवताच्च कुक्षेः
प्रत्याययावाश्रममश्रमेण ॥ ६७ ॥
तस्याः प्रसन्नेन्दुमुखः प्रसादं
गुरुर्नृपाणां गुरवे निवेद्य ।
प्रहर्षचिह्नानुमितं प्रियायै
शशंस वाचा पुनरुक्तयेव ॥ ६८ ॥
स नन्दिनीस्तन्यमनिन्दितात्मा
सहत्सलो वत्सहुतावशेषम् ।
पपौ वसिष्ठेन कृताभ्यनुज्ञः
शुभ्रं यशो मूर्त्तमिवातितृष्णः ॥ ६९ ॥

हैमवतात् हिमवत्सम्बन्धिनः कुक्षेः गुहायाः सकाशात् अश्रमेण अनायासेन आश्रमं प्रत्याययौ आगता च ॥ ६७ ॥

तस्या इति । प्रसन्नेन्दुरिव मुखं यस्य सः नृपाणां गुरुः दिलीपः प्रहर्षचिह्नैः मुखरागादिभिः अनुमितम् ज्ञातं तस्याः धेनोः प्रसादम् अनुग्रहं प्रहर्षचिह्नैरेव ज्ञातत्वात् पुनरुक्तया इव वाचा गुरवे निवेद्य विज्ञाप्य पश्चात् प्रियायै शशंस। कथितस्यैव कथनं पुनरुक्तिः, न चेह तदस्ति किन्तु चिह्नैः कथितत्वात् पुनरुक्तयेव स्थितया इत्युत्प्रेक्षा ॥ ६८ ॥

स इति । अनिन्दितात्मा अगर्हितस्वभावः सत्सु वत्सलः प्रेमवान् सहत्सलः । वत्सांसाभ्यां कामबले इति सच्प्रत्ययः ।

प्रातर्यथोक्तव्रतपारणान्ते
प्रास्थानिकं स्वस्त्ययनं प्रयुज्य।
तौ दम्पती स्वां प्रति राजधानीं
प्रस्थापयामास वशी वसिष्ठः॥ ७०॥
प्रदक्षिणीकृत्य हुतं हुताशम्
अनन्तरं भर्तुरुभे सतीञ्च।
धेनुं सवत्साञ्च नृपः प्रतस्थे
सन्मङ्गलोदग्रतरप्रभावः(१)॥ ७१॥

वसिष्ठेन कृताभ्यनुज्ञः कृतानुमतिः स राजा वत्सस्य हुतस्य च अवशेषं पीतहुतावशिष्टं नन्दिन्याः स्तन्यं क्षीरं शुभ्रं मूर्त्तं परिच्छिन्नं यशः इव अतितृष्णः सन् पपौ॥ ६९॥

प्रातरिति। वशी वसिष्ठः प्रातः यथोक्तस्य पूर्वोक्तस्य व्रतस्य गोसेवारूपस्य अङ्गभूता या पारणा तस्याः अन्ते प्रास्थानिकं प्रस्थानकाले भवं तत्कालोचितम् इत्यर्थः। कालाठ्ठञिति ठञ्-प्रत्ययः। "यथाकथञ्चित् गुणहत्त्यापि काले वर्त्तमानात् तत्त्व-प्रत्यय इष्यते" इति वृत्तिकारः। ईयते प्राप्यते अनेनेति अयनं स्वस्त्ययनं शुभावहम् आशीर्वादं प्रयुज्य तौ दम्पती स्वां राज-धानीं पुरीं प्रति प्रस्थापयामास॥ ७०॥

प्रदक्षिणीकृत्येति। नृपः हुतं तर्पितम्। हुतम् अग्रा-

(१) सतां सङ्गलेन प्रीतवङ्गिगोब्राह्मणप्रदक्षिणीकरणेन महीयान् प्रभावो यस्य इति दिनकरः। सन्मङ्गलेन प्रस्थानकाले भवतूर्यैः पथिभिरन्यैश्च निमित्तैः भाविशुभसूच-नेन इति वङ्गभः।

श्रोत्राभिरामध्वनिना रथेन
स धर्मपत्नीसहितः सहिष्णुः ।
ययावनुद्घातसुखेन मार्गं
स्वेनेव पूर्णेन मनोरथेन ॥ ७२ ॥
तमाहितौत्सुक्यमदर्शनेन
प्रजाः प्रजार्थव्रतकर्शिताङ्गम् ।

तीति हुताग्यः अग्निः । कर्मणि अण् । तं भर्तुः मुनेः अनन्तरं प्रदक्षिणानन्तरम् इत्यर्थः । अरुन्धतीञ्च सवत्सां धेनुञ्च प्रदक्षिणीकृत्य । प्रगतो दक्षिणं प्रदक्षिणम् । तिष्ठद्गुप्रभृतीनि च इत्यव्ययीभावः, ततः च्विः । अप्रदक्षिणं प्रदक्षिणं सम्पद्यमानं कृत्वा प्रदक्षिणीकृत्य सद्भिः मङ्गलैः प्रदक्षिणादिभिः मङ्गलाचारैः उदग्रतरप्रभावः सन् प्रतस्थे ॥ ७१ ॥

श्रोत्रेति । धर्मपत्नीसहितः सहिष्णुः व्रतादिदुःखसहनशीलः स नृपः श्रोत्राभिरामध्वनिना कर्णाह्लादकरस्वनेन अनुद्घातः पाषाणादिप्रतिघातरहितः अत एव सुखयतीति सुखः तेन रथेन स्वेन पूर्णेन सफलेन मनोरथेन इव मार्गम् अध्वानं ययौ । मनोरथपक्षे अनुद्घातः प्रतिबन्धनिवृत्तिः ॥ ७२ ॥

तमिति । अदर्शनेन प्रवासनिमित्तेन आहितौत्सुक्यं जनितदर्शनोत्कण्ठं प्रजार्थेन सन्तानार्थेन व्रतेन नियमेन कर्शितं क्षीणीकृतम् अङ्गं यस्य तं नवोदयं नवाभ्युदयं प्रजाः दृष्टिम् अमृताप्लुतदृष्टिः अतिस्निग्धदृष्टिभिः नेत्रैः ओषधीनां नाथं सोमम्

नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिः
नवोदयं (१) नायमिवौषधीनाम् ॥ ७३ ॥
पुरन्दरश्रीः (२) पुरमुत्पताकं
प्रविश्य पौरैरभिनन्द्यमानः।
भुजे भुजङ्गेन्द्रसमानसारे
भूयः स भूमेर्धुरमाससञ्ज ॥ ७४ ॥

इव तं राजानं पपुः अलास्यया दृष्टया इत्यर्थः। चन्द्रपक्षे अदर्शनं कलाक्षयनिमित्तं प्रजार्थं लोकहितार्थं व्रतं देवताभ्यः कलादाननियमः। "तच्च सोमं पपुर्देवाः पर्य्यायेणानुपूर्वशः" इति व्यासः। उदयः आविर्भावः अन्यत् समानम् ॥ ७३ ॥

पुरन्दरेति। पुरः पुरीः असुराणां दारयतीति पुरन्दरः शक्रः। "पूःसर्व्वयोर्दारिसहोः" इति खच्प्रत्ययः, "वाचंयमपुरन्दरौच" इति सुमागमो निपातितः। तस्य श्रीरिव श्रीः यस्य स नृपः पौरैः अभिनन्द्यमानः उत्पताकम् उच्छ्रितध्वजम्। "पताका वैजयन्ती स्यात् केतनं ध्वजमस्त्रियाम्" इत्यमरः। पुरं प्रविश्य

(१) शस्यानां प्रधानसाधनतया ओषधिपतिपदेन सोमलतामिधीयते, तत्साहचर्य्यात् चन्द्रोऽपि इति भट्टरः। यद्वा नक्षत्रौषधीनां प्रकाशात् निशापतिरेव ओषधीनां नाथ इति कथ्यते इत्यनुसन्धेयं।

(२) ऋग्वेदमन्त्रेषु इन्द्रः पुरीषां पुरनामकत्वेन वर्ण्यते तथया—

"पुरां भिन्दुर्युवा कविरमितौजा अजायत। इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः"। Ri. IXI. 4.

Translate—"Indra was born to be the destroyer of Asura's towns, who is ever young, learned, of immense strength, the upholder of all ceremonies, the thunderbolt-holder and much praised".

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ।
नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः(१) ॥७५॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ नन्दिनी-वरप्रदानो नाम द्वितीयः सर्गः ।

भुजङ्गेन्द्रेण समानसारे तुल्यबले । "सारो बले स्थिरांशे च न्याय्ये क्लीवं वरे त्रिषु" इत्यमरः । भुजे भूयः भूमेः धुरम् आससञ्ज स्थापितवान् ॥ ७४ ॥

अथेति । अथ द्यौः सुरवर्त्म । "द्यौः स्वर्गसुरवर्त्मनोः" इति विश्वः । अत्रेः महर्षेः नयनयोः समुत्थम् उत्पन्नं नयन-समुत्थम् । "आतश्चोपसर्गे" इति कप्रत्ययः । ज्योतिः इव चन्द्र-मिव इत्यर्थः । "अत्रेश्चः स्यादत्रिनेत्रप्रसूतः" इति हलायुधः । चन्द्रस्यात्रिनेत्रोद्भूतत्वमुक्तं हरिवंशे, "नेत्राभ्यां वारि सुस्राव दग्धा द्योतयदिग्यः । तं गर्भं दग्धा हृष्टा दिशो देव्यो दधुस्ततः । समेत्य धारयामासुर्न च ताः समशक्नुवन् । स ताभ्यः महर्षेयाय दिग्भ्यो गर्भः प्रभान्वितः । पपात भासयन् लोकान्

(१) ब्रह्मादिस्थमाकाशमेव वरबल च ।
चन्द्रविम्बेऽमृतं चैव माया सिद्धं च आत्मनः ।
यस्मादेषां हृतैश्वर्या मायामौशिष्यिनो वयः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा" । इति मनुः । ७ । ७४ ।
"ब्रह्मान् प्रभुत्व मघवान् बलार्थं क्षोभं मदारेरबलाय विष्णुम् ।
चाहारबल च विदाधिनाथादादाय राज्ञः जिषते अरीन्" । इत्य बल्लभेन उद्धृतम्

शीतांशुः सर्व्वभावनः" इति। सुरसरित् गङ्गा वह्निना निष्ठूतं विक्षिप्तम्। क्ष्वोः शूड़नुनासिकेचेत्यनेन निपूर्वात् ष्ठीवतेर्वकारस्य जट्। "नुन्नुत्तास्तनिष्ठूताविद्धक्षिप्ते रिताः समाः" इत्यमरः। ऐशं तेजः स्कन्दम् इव। अत्र रामायणम्, "ते गत्वा पर्व्वतं राम कैलासं धातुमण्डितम्। अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः। देवकार्य्यमिदं देव समाधत्स्व हुताशन। शैलपुत्र्यां महातेजो गङ्गायां तेज उत्सृज। देवतानां प्रतिज्ञाय गङ्गामभ्येत्य पावकः। गर्भं धारय वै देवि देवतानामिदं प्रियम्। इत्येतद्वचनं श्रुत्वा दिव्यं रूपमधारयत्। स तस्या महिमां दृष्ट्वा समन्तादवकीर्य्य च। समन्ततस्तु तां देवीमभ्यसिञ्चत पावकः। सर्वस्रोतांसि पूर्णानि गङ्गाया रघुनन्दन" इति। राज्ञी सुदक्षिणा नरपतेः दिलीपस्य कुलभूत्यै(१)सन्ततिलक्षणायै गुरुभिः महद्भिः लोकपालानाम् अनुभावैः तेजोभिः अभिनिविष्टम् अनुप्रविष्टं गर्भम् आधत्त दधौ इत्यर्थः। अत्र मनुः, "अष्टानां लोकपालानां वपुर्धारयते नृपः" इति। अत्र आधत्तेत्यनेन स्त्रीत्वार्थकधारणमात्रमुच्यते, तथा मन्त्रे च दृश्यते, "यथेयं पृथिवी मह्युत्तानगर्भमादधे एवं त्वं गर्भमाधेहि दशमे मासि सूतये" इत्याश्वलायनानां सीमन्तमन्त्रे स्त्रीव्यापारधारणे आधानशब्दप्रयोगदर्शनादिति। मालिनीवृत्तमेतत्। तदुक्तम्, "ननमयययुतेयं मालिनी भोगिलोकैः" इति लक्षणात् ॥ ७५ ॥

इति श्रीमल्लीनाथोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशटीकायां सञ्जीवनीसमाख्यायां द्वितीयः सर्गः।

---

(१) सन्ततिलक्षणायै कुलसमृद्धये इत्यर्थः। "भूतिर्भवनि सम्पदि" इत्यमरः।

तृतीयः सर्गः ।

अथेप्सितं (१) भर्तुरुपस्थितोदयं
सखीजनोदीक्षणकौमुदीमुखम् ।
निदानमिक्ष्वाकुकुलस्य सन्ततेः
सुदक्षिणा दौर्हृदलक्षणं दधौ ॥ १ ॥

उपाधिगम्योऽप्यनुपाधिगम्यः समावलोक्योऽप्यसमावलोक्यः ।
भवोऽपि योऽभूदभवः शिवोऽयं जगत्यपायादपि नः स पायात्

राज्ञी गर्भमाधत्ते स्युक्तं, सम्प्रति गर्भलक्षणानि वर्णयितुं प्रस्तौति, अथेति । अथ गर्भधारणानन्तरं सुदक्षिणा उपस्थितोदयं(२)प्राप्तकालं भर्तुः दिलीपस्य ईप्सितं मनोरथम् । भावे क्तः । पुनः सखीजनस्य उदीक्षणानां दृष्टीनां कौमुदीमुखं चन्द्रिकाप्रादुर्भावम् । यद्वा, कौमुदी नाम दीपोत्सवतिथिः । तदुक्तं भविष्योत्तरे, "कौ मोदन्ते जना यस्यां तेनासौ कौमुदी मता" इति । तस्या मुखं प्रारम्भम् अतएव केचित् कौमुदीमहमिति पाठं पठन्ति । इक्ष्वाकुकुलस्य सन्ततेः अविच्छेदस्य निदानं मूलकारणम् । "निदानं त्वादिकारणम्" इत्यमरः । एवंविधं दौर्हृदलक्षणं गर्भचिह्नं वक्ष्यमाणं दधौ । स्वहृदयेन गर्भहृदयेन च

(१) भर्तुरीप्सितं स्वामिमनसिति यावत् ।

(२) उदेति अधिकमिति अधिकरणवाचि अच्प्रत्ययात् उदयशब्दः उदयकाले वर्तते । यद्वा भावपदा उदयपदेन उदयकाङ्क्षी बोध्यते ।

418

शरीरसादादसमग्रभूषणा
मुखेन सालक्ष्यत लोध्रपाण्डुना।
तनुप्रकाशेन विचेयतारका
प्रभातकल्पा शशिनेव शर्व्वरी ॥ २ ॥

द्विहृदया गर्भिणी। यथाह वाभटः, "माढजन्यस्य हृदयं मातुश्च हृदयञ्च यत्। सम्बद्धं तेन गर्भिण्याः श्रेष्ठं श्रद्धाभिमाननम्॥" इति। तत्सम्बन्धित्वाद्गर्भोदौर्हृदमित्युच्यते, सा च तद्योगात् दौर्हृदिनीति, तदुक्तं संग्रहे, "द्विहृदयां नारीं दौर्हृदिनीमाचक्षते" इति। अत्र दौर्हृदलक्षणस्येप्सितत्वेन कौमुदीमुखत्वेन चोपनिरूपणात् रूपकालङ्कारः। अस्मिन् सर्गे वंश्यस्थं वृत्तम्, "जतौ तु वंश्यस्थमुदीरितं जरौ" इति लक्षणात् ॥ १ ॥

सम्प्रति चामताख्यं गर्भलक्षणं वर्णयति, शरीरेति। शरीरस्य सादात् कार्श्यात् असमग्रभूषणा परिमिताभरणा लोध्रपुष्पेण इव पाण्डुना मुखेन उपलक्षिता सा सुदक्षिणा विचेयाः न्यूनाः तारकाः यस्यां सा तथोक्ता विरलनक्षत्रा इत्यर्थः। तनुप्रकाशेन अल्पकान्तिना शशिना उपलक्षिता ईषदसमाप्तप्रभाता प्रभातकल्पा प्रभातादीषदूना इत्यर्थः। "तसिलादिष्वाकृत्वसुचः" इति प्रभातशब्दस्य पुंवद्भावः। शर्व्वरी रात्रिः इव अलक्ष्यत। शरीरमादादि गर्भलक्षणमाह वाभटः, "चामता गरिमा कुक्षेः मूर्च्छा च्छर्दिररोचकम्। जृम्भा प्रसेकः सदनं रोमराज्याः प्रकाशनम्" इति ॥ २ ॥

418

तदाननं मृत्सुरभि चितीश्वरो
रहस्युपाघ्राय न तृप्तिमाययौ ।
करीव सिक्तं पृषतैः पयोमुचां
शुचिव्यपाये वनराजिपल्वलम् ॥ ३ ॥
दिवं मरुत्वानिव (२) भोक्ष्यते भुवं
दिगन्तविश्रान्तरथो हि तत्सुतः ।

तदिति । चितीश्वरः रहसि मृत्सुरभि मृदा (२) सुगन्धि तस्याः आननं तदाननं सुदक्षिणामुखम् उपाघ्राय तृप्तिं न आययौ । कः कमिव, शुचिव्यपाये ग्रीष्मावसाने । "शुचिः शुद्धेऽनुपहते शृङ्गाराषाढ़योः सिते । ग्रीष्मे हुतवहेऽपि स्यात् उपधौ शुक्लमन्त्रिणि" ॥ इति विश्वः । पयोमुचां मेघानां पृषतैः बिन्दुभिः । "पृषन्ति बिन्दुपृषताः" इत्यमरः । सिक्तम् उचितं वनराज्याः पल्वलम् उपाघ्राय करी गजः इव । अत्र करिवनराजिपल्वलानां कान्तकामिनीवदनसमाधिरनुसन्धेयः । गर्भिणीनां मृद्भक्षणं लोकप्रसिद्धमेव । एतेन दौहृदाख्यं गर्भलक्षणमुक्तम् ॥ ३ ॥

दौहृदलक्षणे मृद्भक्षणे हेत्वन्तरमुपेक्षते, दिवमिति । हि यस्मात् दिगन्तविश्रान्तरथः चक्रवर्ती तस्याः सुतः तत्सुतः, मरुत्वान् इन्द्रः । "इन्द्रो मरुत्वान् मघवा" इत्यमरः । दिवं स्वर्गम् इव भुवं भोक्ष्यते । भुजोऽनवने इत्यात्मनेपदम् । अतः प्रथमं

(१) मरुतः देवाः पाल्यत्वेन सन्ति यस्य इति मरुत्वान् मरुत्पतिर्देवराजः ।
(२) मृदा काचित्वेन इरभि । इदा मरुत्वारिक्षवर्णिकाम् इत्यभि ।

अंतोऽभिलाषि प्रथमं तथाविधे
मनो ववन्धानरसान् विलङ्घ्य सा ॥ ४ ॥
न मे क्रिया शंसति किञ्चिदीप्सितं
स्पृहावती वस्तुषु केषु मागधी।
इति स्म पृच्छत्यनुवेलमादृतः
प्रियासखीरुत्तरकोशलेश्वरः (१) ॥ ५ ॥

सा मुदक्षिणा तथाविधे भूविकारे मृद्रूपे अभिलष्यते इति अभिलाषः भोग्यवस्तु तस्मिन् कर्म्मणि घञ्प्रत्ययः। रस्यन्ते स्वाद्यन्ते इति रसाः भोग्यार्थाः। अन्ये च ते रसाश्च तान् विलङ्घ्य विहाय मनः ववन्ध निदधौ इत्यर्थः। दोहदहेतुकस्य मृद्भक्षणस्य पुत्रभूभोगसूचनार्थत्वमुक्तं भवति ॥ ४ ॥

नेति। मगधस्य राज्ञः अपत्यं स्त्री मागधी मुदक्षिणा। इञ् मगधकलिङ्गसूरमसादण् इत्यण्प्रत्ययः। क्रिया किञ्चित्

(1) In more ancient times, the name was applied to the country on the banks of the Sarayu, of which Ajodhya was the capital. In the Mahabharata, several Kosalas are referred to. The Puranas place the Kosala amongst the people on the back of the Vindhya. This is owing perhaps to the country of Kosala being divided into two provinces, Northern Kosala and Southern Kosala. The former comprehended the districts, now included under Oude, and the latter extended as far as the Vindhya mountain. See Wilson's Vishnupurana p 190 note 79. "कुशस्य कोशलाराज्यं पुरीचापि कुशस्थली। रम्या निवेशिता तेन विश्वपर्वतमालिनी ॥ उत्तरकोशलं राज्यं लवस्य च महात्मनः। यावस्ती श्रीकविख्याता, कुशवंशं निबोधत"। These two couplets from the Bayu purana, make the point clear. श्रावस्ती is called बुद्धपत्तन being holy in the estimation of the Buddhists and nearly in the site of Fyzabad in Oude.

तदाननं मृत्सुरभि चितीश्वरो
रहस्युपाघ्राय न तृप्तिमाययौ ।
करीव सिक्तं पृषतैः पयोमुचां
शुचिव्यपाये वनराजिपल्वलम् ॥ ३ ॥
दिवं मरुत्वानिव (२) भोक्ष्यते भुवं
दिगन्तविश्रान्तरथो हि तत्सुतः ।

तदिति । चितीश्वरः रहसि मृत्सुरभि मृदा (२) सुगन्धि तस्याः आननं तदाननं सुदक्षिणामुखम् उपाघ्राय तस्मिं न आययौ । कः कमिव, शुचिव्यपाये ग्रीष्मावसाने । "शुचिः शुद्धेऽनुपहते शृङ्गारापाढ़योः सिते । ग्रीष्मे हुतवहेऽपि स्यात् उपधौ शुद्धमन्विणि" ॥ इति विश्वः । पयोमुचां मेघानां पृषतैः विन्दुभिः । "पृषन्ति विन्दुपृषताः" इत्यमरः । सिक्तम् उचितं वनराज्याः पल्वलम् उपाघ्राय करी गजः इव । अत्र करिवनराजिपल्वलानां कान्तकामिनीवदनसमाधिरनुसन्धेयः । गर्भिणीनां मृद्भक्षणं लोकप्रसिद्धमेव । एतेन दौहृदाख्यं गर्भलक्षणमुक्तं ॥ ३ ॥

दौहृदलक्षणे मृद्भक्षणे हेत्वन्तरमुपपादयते, दिवमिति । हि यस्मात् दिगन्तविश्रान्तरथः चक्रवर्त्ती तस्याः सुतः तत्सुतः, मरुत्वान् इन्द्रः । "इन्द्रो मरुत्वान् मघवा" इत्यमरः । दिवं स्वर्गम् इव भुवं भोक्ष्यते । भुजोऽनवने इत्यात्मनेपदम् । अतः प्रथमं

(१) मरुतः देवाः पाल्यत्वेन सन्ति यस्य इति मरुत्वान् मरुत्पतिर्देवराजः ।
(२) मृदा मृत्तिकया सुरभि । यद्वा मृत्सारभिन्नसुगन्धिकारम् सुरभि ।

अंतोऽभिलाषे प्रथमं तथाविधे
मनो ववन्धानरसान् विलङ्घ्य सा ॥ ४ ॥
न मे क्रिया शंसति किञ्चिदीप्सितं
मृहावती वस्तुषु केषु मागधी।
इति स्म पृच्छत्यनुवेलमादृतः
प्रियासखीरुत्तरकोशलेश्वरः (१) ॥ ५ ॥

सा सुदक्षिणा तथाविधे भूविकारे मृद्रूपे अभिलष्यते इति अभिलाषः भोग्यवस्तु तस्मिन् कर्म्मणि घञ्प्रत्ययः। रस्यन्ते स्वाद्यन्ते इति रसाः भोग्यार्थाः। अन्ये च ते रसाश्च तान् विलङ्घ्य विहाय मनः ववन्ध निदधौ इत्यर्थः। दोहदहेतुकस्य मृद्भक्षणस्य पुत्रभूभोगसूचनार्थत्वमुत्प्रेक्षते ॥ ४ ॥

नेति। मगधस्य राज्ञः अपत्यं स्त्री मागधी सुदक्षिणा। ह्यञ् मगधकलिङ्गशूरसादण् इत्यण्प्रत्ययः। क्रिया किञ्चित्

(1) In more ancient times, the name was applied to the country on the banks of the Sarayu, of which Ajodhya was the capital. In the Mahabharata, several Kosalas are referred to. The Puranas place the Kosala amongst the people on the back of the Vindhya. This is owing perhaps to the country of Kosala being divided into two provinces, Northern Kosala and Southern Kosala. The former comprehended the districts, now included under Onde, and the latter extended as far as the Vindhya mountain. See Wilson's Vishnupurana p 190 note 79. "कुशस्य कोशलाराज्यं पुरीषापि कुशस्थली। रम्या निवेशिता तेन विश्वभुवं तमानुष॥ उत्तरकोशले राज्यं लवस्य च महात्मनः। श्रावस्ती धौकविख्याता, कुशवंशं निबोधत"। These two couplets from the Bayu purana, make the point clear. श्रावस्ती is called धर्मपत्तन being holy in the estimation of the Buddhists and nearly in the site of Fyzabad in Oude.

उपेत्य सा दोहददुःखशीलतां (१)
यदेव वव्रे तदपश्यदाहृतम्।
न हीप्सितस्य त्रिदिवेऽपि भूपतेः
अभूदनासाद्यमधिज्यधन्वनः॥ ६॥

किमपि ईप्सितम् इष्टं मे मह्यं न शंसति न आचष्टे, केषु वस्तुषु स्पृहावती इति अनुवेलम् अनुक्षणम् आहृतः (२) आहृतवान्, कर्त्तरि क्तः। "आहृतौ सादरार्चितौ" इत्यमरः। प्रियायाः सखीः सहचरीः उत्तरकोशलेश्वरः दिलीपः पृच्छतिस्म पप्रच्छ। "लट् स्मे" इत्यनेन भूतार्थे लट्। सखीनां विश्वस्तभूमित्वात् इति भावः॥ ५॥

उपेत्येति। दोहदं गर्भिणीमनोरथः। "दोहदं दौर्हृदं यज्ञा लालसञ्च समं स्मृतम्" इति हलायुधः। सा सुदक्षिणा दोहदेन गर्भिणीमनोरथेन दुःखशीलतां दुःखस्वभावताम् उपेत्य प्राप्य यत् वस्तु वव्रे आचकाङ्क्ष तत् आहृतम् आनीतं, भर्त्रा इति शेषः, अपश्यत् एव अलभत इत्यर्थः। कुतः हि यस्मात् अस्य भूपतेः त्रिदिवे अपि स्वर्गे अपि इष्टं वस्तु अनासाद्यम् अनवाप्यं न अभूत्। किं याच्ञया नेत्याह, अधिज्यधन्वन इति। न हि वीरपत्नीनामलभ्यं नाम किञ्चिदस्ति इति भावः। अत

(१) दीर्घं चाकर्षं ददातीति दोहदः। इति वाचस्पतिः।
The word is a Prakrita form of दौर्हृद। See William's Dic.

(२) आहृत, इत्यत्र अर्थं च अविवक्षातः अकर्मकं च आदियते; कर्त्तरि क्त। यद्वा आदृतमिति भावे क्तः, ततः अहं आदिलादत्वर्थे अणत्ययः।

क्रमेण निस्तीर्य्य च दोहदव्यथां
प्रवीयमानावयवा रराज सा ।
पुराणपत्रापगमादनन्तरं
लतेव सन्नद्धमनोज्ञपल्लवा ॥ ७ ॥
दिनेषु गच्छत्सु नितान्तपीवरं
तदीयमानीलमुखं स्तनद्वयम् ।
तिरस्चकार भ्रमराभिलीनयोः(१)
सुजातयोः पङ्कजकोशयोः श्रियम् ॥ ८ ॥

वाभटः, "पादशोफो विदाहोऽन्ते यदा च विविधात्मिका" इति। एतच्च पत्नीमनोरथपूरणाकरणे दृष्टदोषसम्भवात्; न तु राज्ञः स्त्रीलौल्यात्। तदुक्तम्, "देयमप्यहितं तस्यै हिताय, हितमल्पकम्। यदाविघाते गर्भस्य विकृतिर्युतिरेव वा" ॥ अन्यत्र च, "दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात्" इति ॥ ६ ॥

क्रमेणेति। सा सदक्षिणा क्रमेण दोहदव्यथाश्च निस्तीर्य प्रवीयमानावयवा पुष्यमाणावयवा सती पुराणपत्राणाम् अपगमात् नाशात् अनन्तरं सन्नद्धाः सञ्जाताः प्रत्यग्रत्वात् मनोज्ञाः पल्लवाः यस्याः सा लता इव रराज ॥ ७ ॥

लक्षणान्तरं वर्णयति, दिनेष्विति। दिनेषु दोहददिवसेषु

(१) शोभातीरकथं कृतात् समासान्तरं वक्तव्यं तथाहि—भ्रमरौ अभिलीनौ ययोस्ताद्दशयोः। भ्रमराभ्यां पद्मकुड्मलौ नाभिश्लिष्टौ, किन्तु तौ पद्मकुड्मलयोरुपरि समासीनौ इति टीकाकारकृतं व्याख्यानं न समीचीनतया प्रतिभाति।

निधानगर्भामिव सागराम्बरां
शमीमिवाभ्यन्तरलीनपावकाम्(१) ।
नदीमिवान्तःसलिलां सरस्वतीं(२)
नृपः ससत्वां महिषीमसनात ॥ ६ ॥

गच्छत्सु नितान्तपीवरम् अतिस्थूलम् आ समन्तात् नीले मुखे चूचुके यस्य तत् तदीयं स्तनद्वयं भ्रमरैः अभिलीनयोः अभिव्याप्तयोः सुजातयोः सुन्दरयोः पङ्कजकोशयोः पद्ममुकुलयोः श्रियं तिरस्कार । अत्र वाभटः, "अस्निष्टता (३) स्तनौ पीनौ श्वेतान्तौ कृष्णचूचुकौ" इति ॥ ८ ॥

निधानेति । नृपः ससत्वाम् आपन्नसत्वां गर्भिणीम् इत्यर्थः । "आपन्नसत्वा स्याद् गुर्विण्यन्तर्वत्नी च गर्भिणी" इत्यमरः । महिषीं निधानं निधिः गर्भे यस्याः तां सागराम्बरां समुद्रवसनां भूमिमिव इत्यर्थः । "भूतधात्री रत्नगर्भा विपुला सागराम्बरा" इति कोषः । अभ्यन्तरे लीनः पावकः यस्याः तां शमीम् इव । शमीतरौ वह्निरस्ति इत्यत्र लिङ्गं शमीगर्भादग्निं जनयतीति । अन्तःसलिलाम् अन्तर्गतजलां सरस्वतीं नदीम् इव

---

(१) यज्ञादिसाधनाय हि शमीकाष्ठात् घर्षणेन अग्निरुत्पाद्यते ।

(२) "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरं । तं ब्रह्मनिर्मितं देशं ब्रह्मावर्तं विदुर्बुधाः" इत्यत्र निर्दिष्टा नदी । "क्वेच्चदेवेषु सा चक्रशोष भूयः पुण्यप्रदेशेषूद्भवतीति पुराणवार्ता" इति वल्लभः । The modern Sarasvati or Kagar near Thanesvara which loses itself in the sandy desert.

(३) अस्निष्टता अघनिष्पन्नत्वं ।

प्रियानुरागस्य मनःसमुन्नतेः
भुजार्जितानाञ्च दिगन्तसम्पदाम्।
यथाक्रमं पुंसवनादिकाः(१) क्रियाः
धृतेश्च धीरः सदृशीर्व्यधत्त सः॥ १०॥

अमन्यत। एतेन गर्भस्य भाग्यवत्त्वतेजस्वित्वपावनत्वानि विवक्षितानि॥ ९॥

प्रियेति। धीरः स राजा प्रियायाम् अनुरागस्य स्नेहस्य मनसः समुन्नतेः औदार्य्यस्य भुजेन भुजबलेन करेण वा अर्जितानाम् न तु वाणिज्यादिना दिगन्तेषु सम्पदां धृतेः पुत्रो मे भविष्यतीति सन्तोषस्य च। "धृतिर्योगान्तरे धैर्य्ये धारणाध्वरतुष्टिषु" इति विश्वः। सदृशीः अनुरूपाः पुमान् सूयते अनेनेति पुंसवनं तत् आदिर्यासां ताः क्रियाः यथाक्रमं क्रममनतिक्रम्य व्यधत्त कृतवान्। आदिशब्देन अनवलोभनसीमन्तोन्नयनौ गृह्येते। अत्र मासि द्वितीये तृतीये वा पुंसवनं, यदाह "पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात्"(२) इति पारस्करः। "चतुर्थेऽनवलोभनम्"

---

(१) "यदि मासीयात्, तृतीये गर्भमासे तिथ्येषोपपितायाः (गर्भिण्याः), सक्थ्यवसायां गौ दंधनि द्वौ द्वौ मासौ यवञ्च दधिसक्तुभिः (अङ्गोन्नलिना) प्राश्नीयात्" इति पुंसवनं। अथास्ये मङ्गलागारद्वच्छायायां दक्षिणस्यां नासिकायां अजितामोषधीं (दुर्वां) नमःकरीतीति अनवलोभनं। नमःकरणं नासिकायां रससेचनं। पुमांसु सत्येन नावलुप्यते तदनवलोभनं। वर्णविकारौ द्रष्टव्यः। ऋषोदरादिलादिति वा ह्रस्वः। आश्वलायनव्याख्यायाम्। एतद्विस्तरस्तु गृह्यसूत्रे द्रष्टव्यः।

(२) पुंसा नक्षत्रेण तिथ्यङ्गसंयुक्तेनादिना।

सुरेन्द्रमात्राश्रितगर्भगौरवात्
प्रयत्नमुक्तासनया गृहागतः ।
तयोपचाराञ्जलिखिन्नहस्तया
ननन्द पारिप्लवनेत्रया नृपः ॥ ११ ॥
कुमारभृत्याकुशलैरनुष्ठिते
भिषग्भिरात्रेय गर्भभर्मणि ।

इति आश्वलायनः । "षष्ठेऽष्टमे वा सीमन्तः"(१) इति याज्ञवल्क्यः ॥ १० ॥

सुरेन्द्रमात्रेति । गृहागतः नृपः सुरेन्द्राणां लोकपालानां मात्राभिः अंशैः आश्रितस्य अनुप्रविष्टस्य गर्भस्य गौरवात् भारात् प्रयत्नेन मुक्तासनया आसनादुत्थितया इत्यर्थः । उपचारस्य अञ्जली अञ्जलिकरणे खिन्नहस्तया पारिप्लवनेत्रया तरलाक्ष्या । "चञ्चलं तरलं चैव पारिप्लवपरिप्लवे" इत्यमरः । तया सुदक्षिणया ननन्द । सुरेन्द्रमात्राश्रितेत्यत्र मनुः, "अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः" इति ॥ ११ ॥

कुमारेति । अथ कुमारभृत्या बालचिकित्सा । संज्ञायां समजनिषदेत्यादिना क्यप् । तस्यां कुशलैः कृतिभिः । "कृती कुशलः" इत्यमरः । आत्रेः हितैः भिषग्भिः वैद्यैः । "भिषग्वैद्यौ

---

(१) "षष्ठेऽष्टमे युग्मेन मासाद्गर्भेण च स्त्रिया मासस्य विभिषक्कर्मणि सीमन्तं व्यूहति भूर्भुवः स्वरोमिति विः"। मासाद्गर्भेण तरुणफलसंधानेन, मासस्य मासकोशीभा एतैरेकोनैः खलाटकेशयी: सन्धिमारभ्य कर्तुं सीमन्तं व्यूहति, सकेश मामूर्ध्वदेशात् केशान् पृथक् करोतीत्यर्थः इति नारायणः । सीमन्त. गर्भाधिके षष्ठे अष्टमे वा मासि कर्तव्य. संस्कारभेदः सीमन्तकेशात् मासकोशीभा पृथक् क्रियते यस्मिन्निति संस्कारस्य सीमन्त इति संज्ञा ।

पतिः प्रतीतः प्रसवोन्मुखीं प्रियां
ददर्श काले दिवमभितामिव ॥ १२ ॥
ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैः
असूर्य्यगैः सूचितभाग्यसम्पदम्(१)।

चिकित्सके" इत्यमरः। गर्भस्य भर्म्मणि भरणे। "भरणे पोषणे भर्म्म" इति हैमः। "भृतिर्भर्म्म" इति शाश्वतः। भृञो मनिच्प्रत्ययः। अनुष्ठिते क्षते सति काले दशमे मासि अन्यत्र ग्रीष्मावसाने प्रसवस्य गर्भमोचनस्य उन्मुखीम् आसन्नप्रसवाम् इत्यर्थः। "स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने" इत्यमरः। प्रियां भार्य्याम् अभ्राणि अस्याः सञ्जातानि अभ्रिता ताम्। "तदस्य सञ्जातं तारकादिभ्य इतच्" इति इतच्प्रत्ययः। दिवम् इव पतिः भर्त्ता प्रतीतः हृष्टः सन्। "ख्याते हृष्टे प्रतीतः" इत्यमरः। ददर्श दृष्टवान्। गर्भकर्म्मणीति पाठे गर्भाधान-प्रतीतावौचित्यभङ्गः ॥ १२ ॥

ग्रहैरिति। ततः शची इन्द्राणी समा। "पुलोमजा शचीन्द्राणी" इत्यमरः। सा सुदक्षिणा समये प्रसूतिकाले सति दशमे मासि इत्यर्थः। "दशमे मासि जायते" इति श्रुतेः। उच्चसंश्रयैः उच्चसंस्थैः तुङ्गस्थानगैः असूर्य्यगैः अनस्तमितैः कैश्चित् यथासम्भवं पञ्चभिः ग्रहैः सूचिता भाग्यसम्पत् यस्य तं पुत्रं चीर्णि प्रभावमन्त्रोत्साहात्मकानि साधनानि उत्पादकानि यस्याः

(१) एकेन (ग्रहेण) सुखी द्वाभ्यां धेर्यशालिभिर्धनुष्मयतुर्भिर्धनः पञ्चभिर्दैवतुल्यः इति दिनकरः।

असूत पुत्रं समये शचीसमा
विसाधना शक्तिरिवार्थमक्षयम् ॥ १२ ॥

सा विसाधना शक्तिः । "शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः" इत्यमरः। अक्षयम् अर्थम् इव असूत। "षुङ् प्राणिगर्भविमोचने" इत्यात्मनेपदिषु पठ्यते, तस्माज्जातोः कर्त्तरि लङ्। अत्रेदमनुसन्धेयम् । "अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः । दशभिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः"। इति सूर्य्यादीनां सप्तानां ग्रहाणां मेषवृषभादयो राशयः श्लोकोक्तक्रमविशिष्टाः, उच्चस्थानानि। स्वस्वतुङ्गांशैश्चया सप्तमस्थानानि च नीचानि। तत्रोच्चेष्वपि दशमादयोराशिविंशांशाः यथाक्रमम् उच्चेषु परमोच्चा नीचेषु परमनीचा इति जातकश्लोकार्थः। अत्रांशस्त्रिंशो भागः। यथाह नारदः,"त्रिंशद्भागात्मकं लग्नम्" इति । सूर्य्यप्रत्यासत्तिर्ग्रहाणामस्तमयो नाम। तदुक्तं लघुजातके, "रविणास्तमयो योगो वियोगस्तूदयो भवेत्" इति ते च स्वोच्चस्थाः फलन्ति नास्तगा नापि नीचगाः। तदुक्तं राजमृगाङ्के, "स्वोच्चे पूर्णं स्वर्क्षकेऽर्धं सुहृद्गे पादं द्विड्भेऽस्यं शभं खेचरेन्द्रः। नीचस्थायी नास्तगो वा न किञ्चित् पादं नूनं स्वर्विकीर्णं ददाति ॥" इति। तदिदमाह कविः, उच्चसंस्थैरसूर्य्यगैः इति च। एवं सति यस्य जन्मकाले पञ्चप्रभृतयो ग्रहाः स्वोच्चस्थाः स एव तुङ्गीभवति। तदुक्तं कूटस्थीये, "उत्कृष्टाः स्वोच्चगाः प्रकटकार्य्या राजप्रतिरूपकाश्च राजानः। एकद्वित्रिचतुर्जायस्तेऽतः परं दिव्याः"इति तदिदमाह पञ्चभिरिति ॥ १२ ॥

दिशः प्रसेदुर्मरुतो ववुः सुखाः
प्रदक्षिणार्चिर्हविरग्निराददे।
बभूव सर्व्वं शुभशंसि तत्क्षणं
भवो हि लोकाभ्युदयाय ताद्दशाम् ॥ १४ ॥
अरिष्टशय्यां परितो विसारिणा
सुजन्मनस्तस्य निजेन तेजसा।
निशीथदीपाः सहसा हतत्विषः
बभूवुरालेख्यसमर्पिता इव ॥ १५ ॥

दिश इति। तत्क्षणं तस्मिन् क्षणे। "कालाध्वनोरत्यन्तसंयोगे द्वितीया।" दिशः प्रसेदुः प्रसन्नाःबभूवुः, मरुतः वाताः सुखाः(१) मनोहराः ववुः (वान्ति स्म), अग्निः प्रदक्षिणार्चिः(२) सन् हविः आददे स्वीचकार, इत्थं सर्व्वं शुभशंसि शुभसूचकं बभूव। तथाहि, ताद्दशां रघुप्रकाराणांभवः जन्म लोकाभ्युदयायभवति इति शेषः, ततो देवा अपि सन्तुष्टाः इत्यर्थः ॥ १४ ॥

अरिष्टेति। "अरिष्टं सूतिकागृहम्" इत्यमरः। अरिष्टे सूतिकागृहे शय्यां तल्पं परितः अभितः। "परितःसमयानिकषाहाप्रतियोगेषु दृश्यते" इति द्वितीया। विसारिणा सुजन्मनः शोभनोत्पत्तेः। "जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः" इत्यमरः। तस्य शिशोः निजेन नैसर्गिकेण तेजसा सहसा

(१) शैत्यसौरभ्यमान्द्याख्यगुणत्रययुक्ताः इति यावत्।
(२) प्रगतं दक्षिणं प्रदक्षिणं अर्चिः यस्य सः।

जनाय शुद्धान्तचराय शंसते
कुमारजन्मामृतसम्मिताचरम् ।
अदेयमासीत् त्रयमेव भूपतेः
शशिप्रभं छत्रमुभे च चामरे ॥ १६ ॥
निवातपद्मस्तिमितेन चक्षुषा
नृपस्य कान्तं पिबतः सुताननम् ।

हतविषः क्षीणकान्तयः निशीथदीपाः अर्धरात्रप्रदीपाः । "रात्राह्नाहाः पुंसि" "अर्धरात्रनिशीथौ द्वौ" इत्यमरः । आलेख्यसमर्पिताः चित्रार्पिताः इव बभूवुः । निशीथशब्दो दीपानां प्रभावाधिक्यसम्भावनार्थः ॥ १५ ॥

जनायेति । भूपतेः दिलीपस्य अमृतसम्मिताचरम् अमृतसमानाचरम् । "सरूपसमसंमिताः" इत्याह दण्डी । कुमारजन्म पुत्रोत्पत्तिं शंसते कथयते शुद्धान्तचराय अन्तःपुरचारिणे जनाय त्रयम् एव अदेयम् आसीत् । किं तत् शशिप्रभम् उज्ज्वलं छत्रम्, उभे चामरे च । छत्रादीनां राज्ञः प्रधानाङ्गत्वात् इति भावः ॥ १६ ॥

निवातेति । निवातः निर्वातप्रदेशः । "निवातावात्रयावातौ" इत्यमरः । तत्र यत् पद्मं तद्वत् स्तिमितेन निष्पन्देन चक्षुषा नेत्रेण कान्तं सुन्दरं सुताननं पुत्रमुखं पिबतः तृष्णया पश्यतः नृपस्य गुरुः उत्कटः प्रहर्षः कर्त्तुं इन्दुदर्शनात् गुरुः महोदधेः पूरः जलौघः इव आत्मनि शरीरे न प्रबभूव स्थातुं

महोदधेः पूर इवेन्दुदर्शनात्
गुरुः प्रहर्षः प्रबभूव (१) नात्मनि ॥ १७ ॥
स जातकर्म्मण्यखिले(२) तपस्विना
तपोवनादेत्य पुरोधसा कृते।
दिलीपसूनुर्मणिराकरोद्भवः
प्रयुक्तसंस्कार इवाधिकं बभौ ॥ १८ ॥

न ययौ, अन्तः न माति स्म इति यावत्, नद्यल्पाधारे अधिकं मीयते इति भावः। यद्वा हर्षः आत्मनि स्वस्मिन् विषये न प्रबभूव आत्मानं नियन्तुं न ययौ किन्तु बहिर्निर्जगाम इत्यर्थः ॥ १७ ॥

स इति। स दिलीपसूनुः तपस्विना पुरोधसा पुरोहितेन "पुरोधास्तु पुरोहितः" इत्यमरः। ("पूर्वमन्त्रादस्मत्ययः पुरादेशश्च" इति ऋग्वेदव्याख्याने सायणाचार्यः।) वसिष्ठेन। तपस्वित्वात् तदनुष्ठितं कर्म्म सवीर्यं स्यात् इति भावः। तपोवनात् एत्य आगत्य अखिले समग्रे जातकर्म्मणि जातस्य कर्त्तव्यसंस्कारविशेषे कृते सति, प्रयुक्तः संस्कारः शाणोल्लेखनादिः यस्य सः तथोक्तः आकरोद्भवः खनिप्रभवः। "खनिः स्त्रियामाकरः स्यात्"

(१) Compare "भवत्सभावनीयाय परिणीयाय मूर्द्धते। अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे॥" कुमारसम्भवम्। ६ सर्गः।

(२) "कुमारं जातं पुरान्तःपुरवृद्धात् सर्पिर्मधुनी हिरण्यनिकषं हिरण्येन" (समर्प्य पिता) प्राशयेत्; ततस्तत् कर्णयोरुपनिधाय कुमारस्य मेधाजननार्थं सविद्-वरमन्त्रविभीकुमारादीन् प्राशयेत्, ततश्च कुमारस्य नाम कुर्यात् "यशो भव पराक्रमेव"

सुखश्रवा मङ्गलतूर्य्यनिस्वनाः
प्रमोदनृत्यैः सह वारयोषिताम् ।
न केवलं सद्मनि मागधीपतेः
पथि व्यजृम्भन्त दिवौकसामपि(१) ॥ १९ ॥
न संयतस्तस्य बभूव रक्षितुः
विसर्ज्जयेद् यं सुतजन्महर्षितः (२)

इत्यमरः। मणिः इव, अधिकं बभौ (अत्यर्थं दिदीपे) वसिष्ठमन्त्रप्रभावात् तेजिष्ठोऽभूत् इत्यर्थः। अत्र मनुः, "प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म्म विधीयते" इति ॥ १८ ॥

सुखश्रवा इति। सुखः सुखकरः श्रवः श्रवणं येषां ते सुखश्रवाः श्रुतिसुखाः इत्यर्थः मङ्गलतूर्य्यनिस्वना मङ्गलवाद्यध्वनयः वारयोषितां वेश्यानाम्। "वारस्त्री गणिका वेश्या रूपाजीवा" इत्यमरः। प्रमोदनृत्यैः हर्षनर्त्तनैः सह मागधीपतेः दिलीपस्य सद्मनि केवलं गृहे एव न व्यजृम्भन्त, किन्तु द्यौः(१) ओकः येषां ते दिवौकसः देवाः। पृषोदरादित्वात् साधु। तेषां पथि आकाशेऽपि व्यजृम्भन्त। तस्य देवांशत्वात् देवोपकारित्वाच्च देवदुन्दुभयोऽपि नेदुः इति भावः ॥ १९ ॥

नेति। रक्षितुः सम्यक्पालनशीलस्य तस्य दिलीपस्य अतएव

(१) यद्वा दिवं स्वर्गं, ओकः गृहं (वासस्थानं) येषामिति दिवौकसाम्। दिवं स्वर्गेऽरौषे च इति विश्वप्रकाशनिर्देशात् अकारान्तदिवशब्दस्य सम्भवात् पृषोदरादित्वात् निपातनं नौरयमित्यनुसन्धेयम्।

(२) "युवराजाभिषेके च परंपकारमहोत्सवे। पुत्रजन्मनि वा मौर्वीबन्धस्य हि विधौ ऋषिः" इति वल्लभः।

ऋणाभिधानात् स्वयमेव केवलं
तदा पितॄणां मुमुचे स बन्धनात् ॥ २० ॥
श्रुतस्य यायादयमन्तमर्भकः
तथा परेषां युधि चेति पार्थिवः ।
अवेक्ष्य धातोर्गमनार्थमर्थवित्
चकार नाम्ना रघुमात्मसम्भवम्(१) ॥ २१ ॥

चौराद्यभावात् संयतः बद्धः (कोऽपि) न बभूव न अभूत् । किं तेनात आह, विसर्ज्जयेदिति । सुतजन्मना हर्षितः तोषितः सन् स यं बद्धं विसर्ज्जयेत् विमोचयेत् । किन्तु स राजा तदा पितॄणाम् ऋणाभिधानात् बन्धनात् केवलम् एकं यथा तथा स्वयम् एव एक एव इत्यर्थः । "केवलः क्षत्त्र एकत्र केवलावधीरितः" इति शाश्वतः । मुमुचे । कर्म्मकर्त्तरि लिट् । स्वयमेव मुक्तः इत्यर्थः । अस्मिन्नर्थे "एष वा अनृणो यः पुत्री" इति श्रुतिः प्रमाणम् ॥ २० ॥

श्रुतस्येति । अर्थवित् शब्दार्थज्ञः पार्थिवः पृथिवीश्वरः दिलीपः अयम् अर्भकः बालकः श्रुतस्य शास्त्रस्य अन्तं पारं यायात्, तथा युधि परेषां शत्रूणाम् अन्तं पारञ्च यायात् यातु गच्छतु इत्यर्थः । गकि लिङ् चेति गत्यर्थे लिङ् इति हेतोः, धातोः अधिपधिन्नधि गत्यर्थाः इति सधिधातोः गमनार्थम्

(१) नामकरणसंस्कारेण बाल्यान्तरादूर्द्ध्वं जातकर्म्मानन्तरं कार्य्यमित्यर्थे । एवं तु बाल्यान्तरीयकार्य्योत्तरञ्च इत्याहुः । यत्तु च मनुना "नामधेयं दशम्यां तु द्वादश्यां वापि कारयेत् । पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते" । इति नारदः ।

पितुः प्रयत्नात् स समग्रसम्पदः
शुभैः (१)शरीरावयवैर्दिने दिने ।
पुपोष हर्षं हरिदश्वदीधितेः
अनुप्रवेशादिव (२) बालचन्द्रमाः ॥ २२ ॥

अर्थम् अर्थवित्त्वात् अवेक्ष्य आलोक्य आत्मसम्भवं पुत्रं नाम्ना रघुं चकार। लड्विधौ र्नलोपर्य्यत्ययेन बालमूलत्वलघुत्वभङ्गः, लीनां वा लीरत्वमापद्यते इति वैकल्पिके रेफादेशे रघुरिति रूपं सिद्धम्। अत्र शङ्खः, "अशौचे तु व्यतिक्रान्ते नामकर्म विधीयते" इति ॥ २१ ॥

पितुरिति। स रघुः समग्रसम्पदः पूर्णलक्ष्मीकस्य पितुः दिलीपस्य प्रयत्नात् शुभैः मनोहरैः शरीरावयवैः हरिदश्वदीधितेः सूर्यरश्मेः। "भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः" इत्यमरः। अनुप्रवेशात् बालचन्द्रमाः इव दिने दिने प्रतिदिनम्। नित्यवीप्सयोरिति द्विर्वचनम्। हर्षं पुपोष। अत्र वराहसंहितावचनम्, "सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम्। क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्थान्तः ॥" इति ॥ २२ ॥

---

(१) शोभने ये ते शुभाः मनोग्राह्यैः। कर्त्तरि कः।

(२) सूर्यस्य सुषुम्णा शमा नाम कला, तस्याः प्रवेशात्—चन्द्रमाः किल सूर्यस्य सुषुम्णा नाम नाडिकामनुप्रविश्य वर्द्धते इति पक्षभः। "सुषुम्णा सूर्यरश्मिस्तु दक्षिणा राशि संश्रयम्। स्यमूर्द्धोर्ध्वः प्रचारोऽस्य सुषुम्णः परिकीर्त्तितः। दक्षिणा राशिं चन्द्ररूपा" इति। See Wilson's V. Purana Vol.2.page 211.

उमाहपाङ्क्तौ शरजन्मना यथा
यथा जयन्तेन शचीपुरन्दरौ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्सदृशेन तत्समौ ॥ २३ ॥
रथाङ्गनाम्नोरिव भाववन्धनं (१)
बभूव यत् प्रेम परस्पराश्रयम्।

उमेति। उमाहपाङ्क्तौ पार्वतीहयभध्वजौ शरजन्मना कार्त्तिकेयेन। "कार्त्तिकेयो महासेनः शरजन्मा षडाननः" इत्यमरः। यथा ननन्दतुः, शचीपुरन्दरौ जयन्तेन पाकशासनिना जयन्ताख्येन सुतेन। "जयन्तः पाकशासनिः" इत्यमरः। यथा ननन्दतुः, तथा तत्समौ ताभ्याम् उमाहपाङ्क्तभ्यां शचीपुरन्दराभ्यां च समौ समानौ सा मागधी नृपश्च तत्सदृशेन ताभ्यां कुमार-जयन्ताभ्यां सदृशेन सुतेन ननन्दतुः। मागधी प्राक् व्याख्याता ॥ २३ ॥

रथाङ्गेति। रथाङ्गनाम्नी च रथाङ्गनामा च रथाङ्गनामानौ चक्रवाकौ। पुमान् स्त्रियेत्येकशेषः तयोः इव, तयोः दम्पत्योः भाववन्धनं हृदयाकर्षकं परस्पराश्रयम् अन्योन्यविषयं यत् प्रेम बभूव तत् एकेन केवलेन ताभ्याम् अन्येन वा। "एके मुख्यान्यकेवलाः" इत्यमरः। सुतेन विभक्तम् अपि कृतविभागम्

---

(१) "रथाङ्गनाम्नोरिव भावबन्धनम्" इति पाठः।

विभक्तमप्येकसुतेन तत् तयोः
परस्परस्योपरि पर्य्यचीयत ॥ २४ ॥
उवाच धात्रा प्रथमोदितं वचः
ययौ तदीयामवलम्ब्य चाङ्गुलिम् ।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः ॥ २५ ॥
तमङ्कमारोप्य शरीरयोगजैः (१)
सुखैर्निषिञ्चन्तमिवामृतं त्वचि ।

अपि परस्परस्योपरि पर्य्यचीयत बहुवे। कर्म्म कर्त्तरि लङ्। अङ्गविमलत्वात् स्वयमेव उपचितम् इत्यर्थः। यदेकाकारं वस्तु तदाधारद्वये विभज्यमानं क्षीयते, अत्र तु तयोः प्रागेकैक कर्त्तृकमेकैकविषयं प्रेम सम्प्रति द्वितीयविषयलाभेऽपि नाक्षीयत प्रत्युतोपचितमेवाभूत् इति भावः ॥ २४ ॥

उवाचेति। सः अर्भकः शिशुः। "पोतः पाकोऽर्भको डिम्भः शावकः शिशुः" इत्यमरः। धात्रा उपमात्रा। "धात्री जनन्यामलकीवसुमत्युपमातृषु" इति विश्वः। प्रथमम् उदितम् उपदिष्टं वचः उवाच, तदीयाम् अङ्गुलिम् अवलम्ब्य ययौ च, प्रणिपातस्य शिक्षया उपदेशेन नम्रः अभूत् च, इति यत् तेन पितुः मुदं ततान ॥ २५ ॥

तमिति। शरीरयोगजैः सुखैः त्वचि त्वगिन्द्रिये अमृतं

(१) शरीरस्य निर्दोषस्य योगः सुतशरीरेण संबन्धः तज्जैः।

उपान्तसंमीलितलोचनो नृपः (१)
चिरात् सुतस्पर्शरसज्ञतां ययौ ॥ २६ ॥
अमंस्त चानेन परार्द्ध्यजन्मना
स्थितेरभेत्ता स्थितिमन्तमन्वयम्।
स्वमूर्त्तिभेदेन (२) गुणाग्यवर्त्तिना
पतिः प्रजानामिव सर्गमात्मनः ॥ २७ ॥

निषिञ्चन्तं वर्षन्तम् इव तं पुत्रम् अङ्कम् आरोप्य मुदाविर्भावात् उपान्तयोः प्रान्तयोः सम्मीलितलोचनः सन् नृपः चिरात् सुतस्पर्शरसज्ञतां ययौ। रसः स्वादः ॥ २६ ॥

अमंस्तेति। स्थितेः अभेत्ता मर्य्यादापालकः सः नृपः परार्द्ध्यजन्मना उत्कृष्टजन्मना अनेन रघुणा अन्वयं वंशं, प्रजानां पतिः ब्रह्मा, गुणाः सत्त्वादयः तेषु अग्रेण मुख्येन सत्त्वेन वर्त्तते व्याप्रियते इति गुणाग्यवर्त्ती तेन स्वस्य मूर्त्तिभेदेन अवतार-विशेषेण विष्णुना आत्मनः सर्गं सृष्टिम् इव, स्थितिमन्तं

(१) अतिमयितसुखसंवेदनया नेत्राभ्यां निमील्यते इति प्रसिद्धिः; यदा नेत्रनिमीलनेन बाष्पवस्तूनामदर्शनात् लाभप्रत्ययस्य परा काष्ठा दृश्यते। यथा कुमारसम्भवे "तौ दम्पती निःपरिचेष्य बहिर्मुखस्पर्शनिमीलिताक्षौ। सञ्चारयामास वधूं पुरोधाः तस्मिन् मनिष्टार्हणि सावकाशम्" ॥

(२) "सृजति सृजसे लोकान् विष्णुर्वं पालयत्यपि। रुद्रति संहरत्येव, तिस्रोऽवस्थाः भवभुवः" इत्युक्तत्वात् मूर्त्तिभेद इति दिनकरः। पुत्रोऽपि स्वमूर्त्तिभेदः, "आत्मा वै जायते पुत्रः" इति श्रुतेः। सकलं त्रयीऽपि प्रजानां जनानां पतिः पालयिता। तथा विष्णुरपि परार्द्ध्यजन्मा इति इतरेतरविशेषणानि पृथक् योज्यानि।

स(१)दृत्तचूलश्चलकाकपक्षकैः(२)
अमात्यपुत्रैः(३) सवयोभिरन्वितः ।
लिपेर्यथावद् ग्रहणेन वाङ्मयं
नदीमुखेनेव समुद्रमाविशत् ॥ २८ ॥

प्रतिष्ठावन्तम् अमस्त मन्यतेऽपि । मन्यतेः अनुदात्तत्वात् इट्प्रतिषेधः । अत्र उपमानोपमेययोरितरेतरविशेषणानीतरेतरत्र योज्यानि, तत्र रघुपक्षे गुणाः विद्याविनयादयः । "गुणोऽप्रधाने रूपादौ मौर्व्यां सूदे हकोदरे । स्तम्बे सत्त्वादि-सन्ध्यादि-विद्यादि-हरितादिषु ॥" इति विश्वः । शेषं सुगमम् ॥ २७ ॥

स इति । "चूड़ा कार्य्या द्विजातीनां सर्वेषामेव धर्म्मतः । प्रथमेऽब्दे तृतीये वा कर्त्तव्या श्रुतिचोदनात् ॥" इति मनुस्मरणात् तृतीये वर्षे दृत्तचूलः निष्पन्नचूड़ाकर्म्मा सन् । डलयोरभेदः । स रघुः । "प्राप्ते तु पञ्चमे वर्षे विद्यारम्भञ्च कारयेत्" इति वचनात् पञ्चमे वर्षे चलकाकपक्षकैः चञ्चलशिखण्डकैः । "बालानां तु शिखा प्रोक्ता काकपक्षः शिखण्डकः" इति हलायुधः । सवयोभिः स्निग्धैः । "स्निग्धो वयस्यः सवयाः" इत्यमरः । अमात्यपुत्रैः अन्वितः सन् लिपेः पञ्चाशद्वर्णात्मिकायाः मातृकायाः यथावत् ग्रहणेन सम्यक् बोधेन उपायभूतेन वाङ्मयं शब्दजातं नद्याः मुखं द्वारम् । "मुखं तु वदने मुख्यारम्भे द्वारो-

(१) "तृतीये वर्षे चौलं, पञ्चमे कुलधर्म्मे वा" इति आश्वलायनः ।

(२) काकस्य पक्षवत् शिरसः पार्श्वयोर्लम्बमानत्वात् शिखण्डकः काकपक्षशब्देनाभिधीयते ।

(३) अमा सह, भवतीति अमात्यः । अमात्यशब्दस्य सर्व्वार्थत्वं वेदे प्रसिद्धम् ।

अथोपनीतं विधिवद् विपश्चितः
विनिन्युरेनं गुरवो गुरुप्रियम् ।
अवन्ध्यपत्नाश्च बभूवुरस्य ते
क्रिया हि वस्तूपहिता प्रसीदति(१) ॥ २९ ॥
धियः समग्रैः स गुणैरुदारधीः
क्रमाच्चतस्रश्चतुरर्णवोपमाः(२) ।

म्युपाययोः" इति यादवः, तेन कश्चित् मकरादिः समुद्रम् इव, आविशत् प्रविष्टः ज्ञातवान् इत्यर्थः ॥ २८ ॥

अथेति । "गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् । गर्भादेकादशे राज्ञः गर्भाच्च द्वादशे विशः ॥" इति मनुस्मरणात् अथ गर्भैकादशे अब्दे विधिवत् उपनीतं गुरुप्रियम् एनं रघुं विपश्चितः विद्वांसः गुरवः विनिन्युः शिक्षितवन्तः । ते गुरवः अत्र अस्मिन् रघौ अवन्ध्यपत्नाश्च बभूवुः । तथाहि, क्रिया शिक्षा । "क्रिया तु निकृतौ शिक्षा-चिकित्सोपायकर्मसु" इति यादवः । वस्तुनि पात्रभूते उपहिता प्रयुक्ता प्रसीदति फलति । "क्रिया हि द्रव्यं विनयति नाद्रव्यम्" इति कौटिल्यः ॥ २८ ॥

धिय इति । अत्र कामन्दकः, "शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा । ऊहापोहार्थविज्ञानं(३) तत्त्वज्ञानञ्च धीगुणाः ॥"

(१) क्रिया उपदेशक्रिया पात्राधिता देवता इव प्रसीदति प्रसन्ना भूत्वा फलं ददाति ; अथवा भवति इति यावत् ।

(२) क्रमात् क्रमसूत्रस्य इति वचनं पञ्चमी ।

(३) शास्त्रमाविरोधिना तर्केण शास्त्रार्थेन संशयपूर्वं पक्षप्रतिपक्षेण उत्तरपक्षव्यवस्थापनेन निर्णयपर्यं परीक्षणम् ऊहः । वादिप्रमुखाविप्रतिपत्तिनिराकरणार्थकः प्रतिवादिप्रमुखाविप्रतिपत्तिभेदः अपोहः ।

ततार विद्याः पवनातिपातिभिः
दिशो हरिद्भिर्हरितामिवेश्वरः ॥ ३० ॥
त्वचं स मेध्यां परिधाय रौरवीम्
अशिक्षतास्त्रं पितुरेव मन्त्रवत् ।
न केवलं तद्गुरुरेकपार्थिवः
चितावभूदेकधनुर्धरोऽपि सः ॥ ३१ ॥

इति "आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती । एता विद्याश्चतस्रस्तु लोकसंस्थितिहेतवः ॥" इति च । उदारधीः उत्कृष्टबुद्धिः स रघुः समग्रैः धियः गुणैः चत्वारः अर्णवाः उपमा यासां ताः चतुरर्णवोपमाः । "तद्धितार्थोत्तरपदसमाहारे च" इति उत्तरपदसमासः । चतस्रः विद्याः, हरितां दिशाम् ईश्वरः सूर्यः पवनातिपातिभिः(१)हरिद्भिः निजाश्वैः । "हरित् ककुभि वर्णे च हरिणवाजिविशेषयोः" इति विश्वः । चतस्रः दिशः इव, क्रमात् ततार । चतुरर्णवोपमत्वं दिशामपि द्रष्टव्यम् ॥ ३० ॥

त्वचमिति । स रघुः, "कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः । वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च ॥" इति मनुस्मरणात् मेध्यां शुद्धां रौरवीं रुरुसम्बन्धिनीम् । "रुरुर्मेहाकृष्णसारः" इति यादवः । त्वचं चर्म परिधाय वसित्वा मन्त्रवत् समन्त्रकम् अस्त्रम् आग्नेयादिकं पितुः एव उपाध्यायात् अशिक्षत अभ्यस्तवान् । "आख्यासोपयोगे" इत्यपादानसंज्ञा । पितुरेवेत्यवधारणमुपपादयति, नेति । तनुरः

१ पवनं अतिपतन्ति वेगेन अतिक्रामन्तीति पवनातिपातिनः तैः ।

महोचतां वत्सतरः स्पृशन्निव
द्विपेन्द्रभावं कलभः श्रयन्निव।
रघुः क्रमाद् यौवनभिन्नशैशवः
पुपोष गाम्भीर्य्यमनोहरं वपुः ॥ ३२ ॥
अथास्य गोदानविधेरनन्तरं
विवाहदीक्षां निरवर्त्तयद् गुरुः।

एकः अद्वितीयः पार्थिवः केवलं पृथिवीश्वरः एव न अभूत् किन्तु चितौ स दिलीपः एकः धनुर्धरः अपि अभूत् ॥ ३१ ॥

महोचतामिति। रघुः क्रमात् यौवनेन भिन्नशैशवः निरस्तशिशुभावः सन् महान् उचा महोचः महर्षभः। अचतुरादिसूत्रेण निपातनात् अकारान्तत्वम्। तस्य भावः तत्ता, तां स्पृशन् गच्छन् वत्सतरः दम्यः इव। "दम्यवत्सतरौ समौ" इत्यमरः। द्विपेन्द्रभावं महागजत्वं श्रयन् व्रजन् कलभः करिपोतः इव गाम्भीर्येण अचापलेन मनोहरं वपुः पुपोष ॥ ३२ ॥

अथेति। "गौर्नादित्ये बलीवर्दे क्रतुभेदर्षिभेदयोः। स्त्री तु स्यादिषि भारत्यां भूमौ च सुरभावपि। पुंस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्वाणलोमसु" इति केशवः। गावः लोमानि केशाः दीयन्ते खण्ड्यन्ते(१) अस्मिन् इति व्युत्पत्त्या गोदानं नाम ब्राह्मणादीनां षोड्शादिषु वर्षेषु कर्त्तव्यं केशान्ताख्यं कर्म्मोच्यते।

१ यद्वा गवीदानं इति गोदानं, "गौमिथुनं दक्षिणा" इति कात्यायने उक्तत्वादिदमुभयं दानम्। केशग्रहण मनुष्यस्य विहितः "केशश्मश्रु वपनमनुक्रमात् कारयेदिति" स्मरणात्। See कात्यायन १।१८।

नरेन्द्रकन्यास्तमवाप्य सत्पतिं
तमोनुदं दक्षसुता इवाबभुः ॥ २३ ॥
युवा युगव्यायतबाहुरंसलः
कपाटवक्षाः परिणद्धकन्धरः ।
वपुःप्रकर्षादजयद् गुरुं रघुः
तथापि नीचैर्विनयादहृशत ॥ २४ ॥

तदुक्तं मनुना, "केशान्तः षोड़शे वर्षे ब्राह्मणस्य विधीयते । राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥" इति । अथ गुरुः पिता । "गुरुर्गीष्पतिपित्रादौ" इत्यमरः । अस्य गोदानविधेः अनन्तरं विवाहदीक्षां निरवर्त्तयत् कृतवान् इत्यर्थः । अथ नरेन्द्रकन्याः तं रघुं दक्षस्य सुताः रोहिण्यादयः(१) तमोनुदं चन्द्रम् इव । "तमोनुदोऽग्निचन्द्रार्काः" इति विश्वः । सत्पतिम् अवाप्य आबभुः । रघुरपि तमोनुत् । अत्र मनुः, "वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् । अविप्लुतब्रह्मचर्य्यो गृहस्थाश्रममाविशेत् ॥" इति ॥ २३ ॥

सम्प्रति यौवराज्ययोग्यतामाह, युवेति । युवा, युगो नाम धुर्य्यस्कन्धगः सच्छिद्रप्रान्तो यानाङ्गभूतो दारुविशेषः । "यानाद्यङ्गे युगः पुंसि युगं युग्मे कृतादिषु" इत्यमरः । युगवत् व्यायतौ दीर्घौ बाहू यस्य सः । अंसौ अस्य स्तः इति अंसलः

(१) दक्षसुताः are the twentyseven तारकाः out of the whole number of fifty that are married to the moon according to our mythology. The twentyseven daughters of दक्षप्रजापति married to the moon are the twentyseven asterisms.

ततः प्रजानां चिरमात्मना धृतां
नितान्तगुर्वीं लघयिष्यता धुरम्।
निसर्गसंस्कारविनीत इत्यसौ
नृपेण चक्रे युवराजशब्दभाक् ॥ ३५ ॥

वलवान्। मांसलत्वे इति हस्तिकारः। "वलवान् मांसलोऽमलः" इत्यमरः। "वलांसाभ्यां कामवले" इति लच्प्रत्ययः। कपाटवक्षाः परिघस्कन्धरः विशालग्रीवः। "परिघोऽर्गलं विशालता" इत्यमरः। रघुः वपुषः प्रकर्षात् आधिक्यात् यौवनकृतात् गुरुं पितरम् अजयत् तथापि विनयात् नम्रत्वेन नीचैः अल्पकः अदृश्यत। अनौद्धत्यञ्च विवक्षितम् ॥ ३४ ॥

सम्प्रति तस्य यौवराज्यमाह, तत इति। ततः आत्मना चिरं धृतां नितान्तगुर्वीम्। "वीतो गुणवचनात्" इति ङीप्। प्रजानां धुरं पालनप्रयासं लघयिष्यता लघुं करिष्यता। तत्करोति तदाचष्टे इति लघुशब्दात् णिच्, ततः "लुटः सद्वा"(१) इति शतृप्रत्ययः। नृपेण दिलीपेन असौ रघुः निसर्गेण स्वभावेन संस्कारेण शास्त्राभ्यासजनितवासनया च विनीतः नम्रः इति हेतोः युवराजः इति शब्दं भजतीति तथोक्तः। भजोण्विरिति ण्विप्रत्ययः। चक्रे कृतः। "द्विविधो विनयः स्वाभाविकः कृत्रिमश्च" इति कौटिल्यः। तदुभयसम्पन्नत्वात् पुत्रं युवराजं चकार इत्यर्थः। अत्र कामन्दकः, "विनयोपग्रहान् भृत्यै कुर्वीत नृपतिः सुतान्। अविनीतकुमारं हि कुलमाशु विशीर्यते। विनीतमौरसं पुत्रं यौवराज्येऽभिषेचयेत्" ॥ ३५ ॥

(१) स्वकालभवो वर्तमानो धातुः।

नरेन्द्रमूलायतनादनन्तरं
तदास्पदं श्रीर्युवराजसंज्ञितम् ।
अगच्छदंशेन गुणाभिलाषिणी
नवावतारं कमलादिवोत्पलम् ॥ ३६ ॥
विभावसुः सारथिनेव वायुना
घनव्यपायेन गभस्तिमानिव ।
बभूव तेनातितरां सुदुःसहः
कटप्रभेदेन करीव पार्थिवः ॥ ३७ ॥

नरेन्द्रेति । गुणान् विनयादीन् सौरभ्यादीन् च अभिलषतीति गुणाभिलाषिणी श्रीः राज्यलक्ष्मीः पद्माश्रया च नरेन्द्रः दिलीपः एव मूलायतनं प्रधानस्थानं तस्मात् अपादानात् अनन्तरं सन्निहितं युवराजः इति संज्ञा अस्य सञ्जाता युवराजसंज्ञितम् । तारकादित्वात् इतच् प्रत्ययः । आत्मनः पदं स्थानम् आस्पदम् । आस्पदं प्रतिष्ठायामिति निपातः । स रघुः इति आस्पदं तथास्पदं कमलात् चिरोत्पन्नात् नवावतारम् अचिरोत्पन्नम् उत्पलम् इव अंशेन अगच्छत् । स्त्रियो हि यूनि रज्यन्ती इति भावः ॥ ३६ ॥

विभावसुरिति । सारथिना सहायभूतेन । एतद्विशेषणमुत्तरवाक्येष्वपि अनुषञ्जनीयम् । वायुना विभावसुः अग्निः इव । "सूर्येवह्नौ विभावसू" इत्यमरः । घनव्यपायेन(१) सार-

१ घनानां व्यपायो यस्मिन् तदीयेन शरत्कालीन इत्यर्थः ।

नियुज्य तं होमतुरङ्गरक्षणे
धनुर्धरं राजसुतैरनुद्रुतम् ।
अपूर्णमेकेन शतक्रतूपमः
शतं क्रतूनामपविघ्नमाप सः ॥ ३८ ॥

विना गमस्तिमान् सूर्यः इव, कटः गण्डः, "गण्डः कटो मदो दानम्" इत्यमरः । तस्य प्रभेदः स्फुटनं मदोदयः इत्यर्थः तेन करी इव, पार्थिवः दिलीपः तेन रघुणा अतितराम् अत्यन्तं सुदुःसहः सुष्ठु असह्यः बभूव ॥ ३७ ॥

नियुज्येति । शतक्रतुः इन्द्रः उपमा यस्य सः शतक्रतूपमः स दिलीपः "शतं वै तुल्या राजपुत्रा देवा आशापालाः" इत्यादिश्रुत्या । राजसुतैः अनुद्रुतम् अनुगतं धनुर्धरं तं रघुं होमतुरङ्गरक्षणे नियुज्य एकेन क्रतुना अपूर्णम् एकोनम् क्रतूनाम् अश्वमेधानां(१) शतम् अपविघ्नम् अपगतविघ्नं यथा तथा आप ॥ ३८ ॥

(1) By the Asvamedha, a Raja was popularly supposed to have asserted his sovereignty over the whole earth; and by the successful performance of a hundred Asvamedhas, it was believed that a mortal Raja would at once become the ruler of the universe and the sovereign of the gods. This accounts for the myth, which represents the inveterate enmity of Indra to those, who attempted to perform a hundred Asvamemedhas. The horse was permitted to wander for one year into whatever territory, it pleased. Its entrance into foreign Raj, which was left entirely to chance, was virtually a challenge to the Raja of that country, who was bound to carry away the horse and offer battle; and when defeated, to restore it and swell the army of the invader. At the end of the year, the horse would be brought

ततः परं तेन मखाय यज्वना
तुरङ्गमुत्सृष्टमनर्गलं पुनः ।
धनुर्भृतामग्रत एव रक्षिणां
जहार शक्रः किल गूढविग्रहः ॥ ३९ ॥

तत इति । ततः परम् एकोनशतक्रतुप्राप्त्यनन्तरं यज्वना विधिनेष्टवता तेन दिलीपेन पुनः पुनः अपि मखाय मखं कर्त्तुम् । क्रियार्थोपपदस्येत्यादिना चतुर्थी । उत्सृष्टं मुक्तम् अनर्गलम् अप्रतिबन्धम् अव्याहतस्वैरगतिम् इत्यर्थः "अपर्य्यावर्त्तयन्तोऽखमनुचरन्तीति" आपस्तम्बस्मरणात् । तुरङ्गं धनु-

---

triumphantly home and sacrificed to the gods in the presence of the whole assembly of conquered Rajas ; and the Asvamedha would be brought to a close by a grand feast, at which the roasted flesh of the horse would be regarded as the imperial dish. The sacrifice of a horse was undoubtedly invested with a religious significance and associated with the worship of the sun, but subsequently it was connected with the worship of Indra, as is described in both the Ramayana and Mahabharata. The main idea of the Asvamedha, that it was undertaken to settle questions of supremacy, has been virtually set aside in favour of the later Brahmanical notion, that it was a sacrifice for the atonement of sin and the acquisition of religious merits, as is mentioned in the Mahabharata, or for the attainment of some worldly good, *i. e.* birth of a son, as is said in the Ramayana. This sacrifice is one of the most ancient rites of primeval India. It is described by two of the hymns of the Rigveda. In the Yájurveda the sacrifice was performed without any slaughter, the animal being tied to the post whilst the invocations were being chaunted and then let loose without injury. A legend is preserved in the Mahabharata of a similar bloodless Asvamedha having been performed by the sage Vrihaspati. See Wheeler's History of India vol. I. Ch. XVI.

अतीन्द्रियेष्वप्युपपन्नदर्शनः
बभूव भावेषु दिलीपनन्दनः ॥ ४१ ॥
स पूर्वतः पर्व्वतपक्षशातनं (१)
ददर्श देवं नरदेवसम्भवः ।
पुनः पुनः सूतनिषिद्धचापलं
हरन्तमश्वं रयरश्मिसंयतम् ॥ ४२ ॥
शतैस्तमक्ष्णामनिमेषवृत्तिभिः (२)
हरिं विदित्वा हरिभिश्च वाजिभिः ।

पुण्येन तस्याः नन्दिन्याः यत् अङ्गं तस्य निस्यन्दः द्रवः एव जलं मूत्रम् इत्यर्थः तेन लोचने प्रमृज्य शोधयित्वा अतीन्द्रियेषु इन्द्रियाणि अतिक्रान्तेषु । "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति समासः, द्विगुप्राप्तापन्नालंपूर्व्वगतिसमासेषु परवल्लिङ्गतामतिषेधात् विशेष्यनिघ्नत्वम् । भावेषु वस्तुषु अपि उपपन्नदर्शनः सम्यक्साक्षात्कारशक्तिः बभूव ॥ ४१ ॥

स इति । नरदेवसम्भवः स रघुः पुनः पुनः सूतेन निषिद्धचापलं निवारितौद्धत्यं, रघस्य रश्मिभिः प्रग्रहैः । "किरणप्रग्रहौ रश्मी" इत्यमरः । संयतं बद्धम् अश्वं हरन्तं पर्व्वतपक्षाणां शातनं छेदकं देवम् इन्द्रं पूर्वतः पूर्व्वस्यां दिशि ददर्श ॥ ४२ ॥

शतैरिति । रघुः तम् अश्वहर्त्तारम् अनिमेषवृत्तिभिः

(१) शातयतीति शातनः, शीघादौ यं भ्यात् कर्त्तरि भवत् ।
(२) हरेः, हरयतेः इन्द्रस्य सहस्राक्षत्वादित्यर्थः । अनिमेषवृत्तित्वं हि देवानां साधारणम् ।

अवोचदेनं गगनस्पृशा रघुः
स्वरेण धीरेण निवर्त्तयन्निव ॥ ४३ ॥
मखांशभाजां प्रथमो मनीषिभिः
त्वमेव देवेन्द्र सदा निगद्यसे ।
अजस्रदीक्षाप्रयतस्य मद्गुरोः
क्रियाविघाताय कथं प्रवर्त्तसे ॥ ४४ ॥
त्रिलोकनाथेन सदा मखद्विषः
त्वया नियम्या ननु दिव्यचक्षुषा ।

निमेषव्यापारशून्यैः अक्ष्णां शतैः, हरिभिः हरिद्वर्णैः । "हरिर्वाय्वदाख्यातः हरित्कपिलवर्णयोः" इति विश्वः । वाजिभिः अश्वैश्च, हरिम् इन्द्रं विदित्वा । "हरिर्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषु" इति विश्वः । एनम् इन्द्रं गगनस्पृशा व्योमव्यापिना धीरेण गभीरेण स्वरेण ध्वनिना एव निवर्त्तयन् इव अवोचत् ॥ ४३ ॥

मखेति । हे देवेन्द्र मनीषिभिः (पण्डितैः) त्वम् एव मखांशभाजां यज्ञभागभुजां (देवानां) प्रथमः सदा निगद्यसे कथ्यसे, तथापि अजस्रदीक्षायां नित्यदीक्षायां प्रयतस्य मद्गुरोः क्रियाविघाताय क्रतुविघाताय क्रियां विहन्तुम् इत्यर्थः । "तुमर्थाच्च भाववचनात्" इति चतुर्थी । कथं प्रवर्त्तसे ॥ ४४ ॥

त्रिलोकेति । त्रयाणां लोकानां नाथः त्रिलोकनाथः । तद्धितार्थेत्यादिना उत्तरपदसमासः । तेन त्रैलोक्यनियामकेन

स चेत् स्वयं कर्म्मसु धर्म्मचारिणां
त्वमन्तरायो भवसि च्युतो विधिः ॥ ४५ ॥
तदङ्गमग्र्यं मघवन् महाक्रतोः
अमुं तुरङ्गं प्रतिमोक्तुमर्हसि ।
पथः (१)श्रुतेर्दर्शयितार ईश्वराः
॥ मलीमसान्मार्गादृषिं न पङ्क्तिम् ॥ ४६ ॥
इति प्रगल्भं(२)रघुणा समीरितं
वचो निशम्याधिपतिर्दिवौकसाम् ।

दिव्यचक्षुषा अतीन्द्रियार्थदर्शिना त्वया मखद्विषः क्रतुविघातका. सदा नियम्या,(३)नतु शिक्ष्याः खलु। स त्वं धर्म्मचारिणां कर्म्मसु क्रतुषु स्वयम् अन्तरायः विघ्नः भवसि चेत्, विधिः अनुष्ठानं च्युतः यतः, लोके सत्कर्म कथैवास्तमियात् इत्यर्थः ॥ ४५ ॥

तदिति। हे मघवन् तत् तस्मात् कारणात् महाक्रतोः अश्वमेधस्य अग्र्यं श्रेष्ठम् अङ्गं साधनम् अमुं तुरङ्गं प्रतिमोक्तुं प्रतिदातुम् अर्हसि। तथाहि श्रुतेः पथः दर्शयितारः सन्मार्गं प्रदर्शकाः ईश्वराः महान्तः मलीमसां मलिनां पङ्क्तिं मार्गं न आददते न स्वीकुर्वते असन्मार्गं नावलम्बन्ते इत्यर्थः। "मलीमसं तु मलिनं कश्मलं मलदूषितम्" इत्यमरः ॥ ४६ ॥

इतीति। इति रघुणा समीरितं प्रगल्भं वचः निशम्य

(१) अङ्गमश्वं श्रुतेरित्यत्र श्रुतेरिति पठति, तत्र निर्मलस्य मार्गस्य इति व्याचष्टे च।
(२) प्रबन्धं कालयैरहितम्।
(३) शासनीया इति पाठान्तरम्।

निवर्त्तयामास रथं सविस्मयः
प्रचक्रमे च प्रतिवक्तुमुत्तरम् ॥ ४७ ॥
यदात्थ राजन्यकुमार तत् तथा
यशस्तु रक्ष्यं परतो यशोधनैः ।
जगत्प्रकाशं तदशेषमिज्यया
भवद्गुरुर्लङ्घयितुं ममोद्यतः ॥ ४८ ॥
हरिर्यथैकः पुरुषोत्तमः स्मृतः
महेश्वरस्त्र्यम्बक एव नापरः (१) ।

आकर्ण्य दिवौकसः स्वर्गौकसः । "दिवं स्वर्गेऽन्तरिक्षे च" इति विश्वः । तेषाम् अधिपतिः देवेन्द्रः रघुप्रभावात् सविस्मयः सन् रथं निवर्त्तयामास, उत्तरं प्रतिवक्तुं प्रचक्रमे च ॥ ४७ ॥ यदिति । हे राजन्यकुमार क्षत्रियकुमार ! "मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्" इत्यमरः । यत् वाक्यम् आत्थ ब्रवीषि । ब्रुवः पञ्चानामित्यादिना आहादेशः । तत् तथा सत्यं, किन्तु यशोधनैः अस्माद्दृशैः परतः परतः यशः रक्ष्यम् । ततः किमत आह । भवद्गुरुः त्वत्पिता जगत्प्रकाशं लोकप्रसिद्धम् अशेषं सर्व्वं मम तत् यशः इज्यया यागेन लङ्घयितुं तिरस्कर्त्तुम् उद्यतः उद्युक्तः ॥ ४८ ॥

किं तत् यश इत्याह, हरिरिति । पुरुषेषु उत्तमः इति

(१) Compare:—"यश्चिन्तादिगुणोपेतमनष्टपुरुषान्तरं ब्रह्मेश्वर इवाभाति सार्द्धचन्द्रं विभर्त्ति यः"। कुमारसम्भवम्। Canto 6.

तथा विदुर्मां मुनयः शतक्रतुं (१)
द्वितीयगामी न हि शब्द एषः नः ॥ ४९ ॥
अतोऽयमश्वः कपिलानुकारिणा (२)
पितुस्त्वदीयस्य मयापहारितः ।

समसीसमासः, "न निर्द्धारणे" इति षष्ठीसमासनिषेधात्, कर्मधारये तु "सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः" इत्युत्तमपुरुष इति स्यात्, यथा हरिः विष्णुः एकः एव पुरुषोत्तमः स्मृतः, यथा च त्र्यम्बकः शिवः एव महेश्वरः स्मृतः, न अपरः, अपरः पुमान् न। तथा मां मुनयः शतक्रतुं विदुः विदन्ति। "विदो लटो वा" इति झेर्ज्जुसादेशः। नः अस्माकं हरिहरयोर्मम च इत्यर्थः, एषः त्रितयः अपि शब्दः द्वितीयगामी न हि। द्वितीयप्रकरणे गमिगम्यादीनामुपसंख्यानात् समासः ॥ ४९ ॥

अत इति। यतः अहम् एव शतक्रतुः अतः त्वदीयस्य पितुः अयं शततमः अश्वः कपिलानुकारिणा कपिलमुनितुल्येन मया

(1) Western scholars render the epithet "शतक्रतु" into "possessed of one hundred (many) intellects" It is quite possible, that post-vedic critics may have metaphorically interpreted it into a performer of a hundred sacrifices.

(2) The sixty thousand sons of Sagara were very wicked and obstructed the path of virtue and piety. Upon which, the gods repaired to the Muni Kapila, who was a portion of Visnu, and implored him to deliver the world from the oppression of Sagara's sons. At that period, Sagara commenced the sacrifice of a horse, Kapila stole and carried off the animal into a chasm in the earth. The sons of Sagara in quest of the horse dug

अलं प्रयत्नेन तवात्र मा निधाः
पदं पदव्यां सगरस्य सन्ततेः ॥ ५० ॥
ततः प्रहस्यापभयः पुरन्दरं
पुनर्बभाषे तुरगस्य रक्षिता।
गृहाण शस्त्रं यदि सर्ग (१) एष ते
न खल्वनिर्जित्य रघुं कृती भवान् ॥ ५१ ॥

अपहारितः अपहृतः। अपहारित इति स्वार्थे णिच् (२)। तव अत्र अश्वे प्रयत्नेन अलं, प्रयत्नो माकारि इत्यर्थः। निषेध्यस्य निषेधं प्रति करणत्वात् तृतीया। सगरस्य राज्ञः सन्ततेः सन्तानस्य पदव्यां पदं मा निधाः न निधेहि। निपूर्वात् धाङ्धातोः लुङ्, न माङ्योग इत्यडागमप्रतिषेधः। महदास्कन्दनं विनाशमूलं भवेत् इति भावः ॥ ५० ॥

तत इति। ततः तुरगस्य रक्षिता रघुः प्रहस्य प्रहासं कृत्वा अपभयः निर्भीकः सन् पुनः पुरन्दरं बभाषे। किमिति

---

downwards and came to Patala. They beheld the horse wandering freely about, and the Rishi Kapila absorbed in meditation. Then they rushed to kill him with uplifted weapons. The Muni slowly raised his eyes and for an instant looked upon them; and they were reduced to ashes by the sacred flame, that darted from his person. See Wilson's Visnu Purana, Vol III. Page 300.

(१) "सगरस्य तपदवीं मेधामीयेव एषः सर्गः निश्चयः" इति दिनकरः। "सर्ग" इत्यत्र "मर्गः" इति पठति वल्लभः।

(२) ह्वाधातोः स्वार्थे विच्प्रत्ययाभावादत्र प्रेरणार्थे एव णिच्। भवेति प्रयोज्यकर्तरि तृतीया हेतौ च्व्यन्तरभ्यामिति विधानात्। तथाच प्रयोजकत्वं पदं यशोरक्षकत्वमनूद्यमित्यनुसन्धेयम्।

स एवमुक्त्वा मघवन्तमुन्मुखः
करिष्यमाणः सशरं शरासनम्।
अतिष्ठदालीढ विशेषशोभिना(१)
वपुःप्रकर्षेण विडम्बितेश्वरः(२) ॥ ५२ ॥

हे देवेन्द्र यदि एषः अस्त्रमोचनरूपः ते तव सर्गः निश्चयः। "सर्गः स्वभावनिर्मोचनिश्चयाध्यायसृष्टिषु" इत्यमरः। तर्हि शस्त्रं गृहाण, भवान् रघुं माम् अनिर्जित्य कृतमनेनेति कृती कृतकृत्यः न खलु। इष्टादिभ्यश्चेति इनिप्रत्ययः। रघुमित्यनेनात्मनो दुर्जयत्वं सूचितम् ॥ ५१ ॥

स इति। सः रघुः उन्मुखः सन् मघवन्तम् इन्द्रम् एवम् उक्त्वा शरासनं चापं सशरं करिष्यमाणः आलीढेन आलीढास्थानकभेदेन विशेषशोभिना अतिशयशोभिना वपुःप्रकर्षेण देहौन्नत्येन विडम्बितेश्वरः अनुकृतपिनाकी सन् अतिष्ठत्। आलीढलक्षणमाह यादवः, "स्थानानि धन्विनां पञ्च तत्र वैशाखमस्तियाम्। वितस्तान्तरगो पादौ मण्डलं तीरणाकृति। अन्वर्थं स्यात् समपदम् आलीढन्तु ततोऽयतः। दक्षिणे वामं माकुञ्चा प्रत्यालीढं विपर्ययः" इति ॥ ५२ ॥

---

(१) Compare :-"स दक्षिणापाङ्गनिविष्टमुष्टिं ननाम सव्याकुञ्चितसव्यपादम्"। कुमारसम्भवम्। Canto 3.

(२) विडम्बितः अनुकृतपिनाकी सन् अभूत् येन स तादृशः इति दिनकरः। वल्लभस्तु "पुरा किल भगवान् त्रिपुरदिधक्षया दिव्यवर्षशतमालीढविशेषेण स्थानादि क्लेशसहोऽभवत्" इत्याह।

रघोरवष्टम्भमयेन(१) पत्त्रिणा
हृदि क्षतो गोत्रभिदप्यमर्षणः ।
नवाम्बुदानीकमुहूर्त्तलाञ्छने
धनुष्प्रमोघं समधत्त सायकम् ॥ ५३ ॥
दिलीपसूनोः स हरिद्वजान्तरं
प्रविश्य भीमासुरशोणितोचितः ।
पपावनास्वादितपूर्वमाशुगः
कुतूहलेनेव मनुष्यशोणितम् ॥ ५४ ॥

रघोरिति । रघोः अवष्टम्भमयेन स्तम्भरूपेण । "अवष्टम्भः सुवर्णे च स्तम्भप्रारम्भयोरपि" इति विश्वः । पत्त्रिणा बाणेन हृदि हृदये क्षतः विद्धः अत एव अमर्षणः असहनः क्रुद्धः इत्यर्थः, गोत्रभित् इन्द्रः अपि । "सम्भावनीये चोरेऽपि गोत्रः क्षौणीधरे मतः" इति विश्वः । नवाम्बुदानाम् अनीकस्य वृन्दस्य मुहूर्त्तं क्षणमात्रं लाञ्छने चिह्नभूते धनुषि दिव्ये धनुषि इत्यर्थः अमोघम् अवन्ध्यं सायकं बाणं समधत्त संहितवान् ॥ ५३ ॥

दिलीपेति । भीमानां भयङ्कराणाम् असुराणां शोणिते रुधिरे उचितः परिचितः स इन्द्रसुतः आशुगः सायकः

---

(१) अवष्टम्भमयेन स्तम्भमयेन स्तम्भवत् दृढता इति यावत् । अवष्टम्भमयेन काञ्चनमयेनेति दिनकरमिश्रादिसम्मतं व्याख्यानम् । "प्रथमं काञ्चनमयबाणप्रहारवर्णनं कविसमयविरुद्धमिति केचिदाक्षिपन्ति, तन्मते अवष्टम्भमयेन स्तैर्यरूपेण" इति दिनकरौजसं । "अवष्टम्भस्तनीवेष्टमयः सेन रघोरभिमानमयेन पत्त्रिणा" इति वल्लभः ।

हरेः कुमारोऽपि कुमारविक्रमः
सुरद्विपास्फालनकर्कशाङ्गुली (१) ।
भुजे शचीपत्रविशेषकाङ्किते
स्वनामचिह्नं निचखान सायकम् ॥ ५५ ॥
जहार चान्येन मयूरपत्रिणा(२)
शरेण शक्रस्य महाशनिध्वजम् ।

दिलीपसूनोः रघोः, हृदत् विशाल भुजान्तरं वक्षः प्रविश्य अनास्वादितपूर्वं पूर्वम् अनास्वादितम् । सुप्सुपेति समासः । मनुष्यशोणितं कुतूहलेन इव पपौ ॥ ५४ ॥

हरेरिति । कुमारस्य स्कन्दस्य विक्रमः इव विक्रमः यस्य सः तथोक्तः । "सप्तम्युपमानपूर्वस्य" इत्यादिना समासः । कुमार रघुः अपि सुरद्विपस्य ऐरावतस्य आस्फालनेन (३) कर्कशा अङ्गुलयः यस्य सः तस्मिन् शच्या. पत्रविशेषकै. अङ्किते शचीपत्र विशेषकाङ्किते (४) हरे. इन्द्रस्य भुजे स्वनामचिह्नं स्वनामाङ्कित सायकं निचखान निखातवान् । निष्कण्टकराज्ये तस्याय महानभिभवः इति भावः ॥ ५५ ॥

जहारेति । अन्येन मयूरपत्रिणा मयूरपत्रवता शरेण

(१) Compare "ऐरावतास्फालनकर्कशेन हस्तेन यस्यश्च तदङ्गमिन्द्र" । कुमार सम्भवम् । Canto 2

(२) अस्यां गतिलाघवार्थं पूर्वेषु कङ्कपत्रवत् मयूरपत्राणि वर्ण्यन्ते । यथा कुमा "आमोदशोनिर्झरशीकराणां वोढा मुहुः कम्पितदेवदारुः । तदायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः" । इति ।

(३) आस्फालनम् आस्फाटनार्थताडनम् ।

(४) शच्या कर्णोत्पादितं यत् पत्रविशेषकं चन्दनादिभिर्यो विशिष्टपत्रस्य

चुकोप तस्मै स भृशं सुरश्रियः
प्रसह्य केशव्यपरोपणादिव ॥ ५६ ॥
तयोरुपान्तस्थितसिद्धसैनिकं (१)
गरुत्मदाशीविषभीमदर्शनैः।
बभूव युद्धं तुमुलं जयैषिणोः
अधोमुखैरूर्ध्वमुखैश्च पत्तिभिः ॥ ५७ ॥

शक्रस्य इन्द्रस्य महाध्वनिध्वजं महान्तम् अयनिरूपं ध्वजं जहार चिच्छेद च, स शक्रः सुरश्रियः प्रसह्य बलात्कृत्य केशानांव्यपरोपणात् अवतारणात् छेदनात् इव तस्मै रघवे भृशम् अत्यर्थं चुकोप तं हन्तुमियेष इत्यर्थः। क्रुधद्रुहेत्यादिना सम्प्रदानात् चतुर्थी ॥ ५६ ॥

तयोरिति। जयैषिणोः अन्योन्यजयकाङ्क्षिणोः तयोः इन्द्ररघ्वोः गरुत्मन्तः पक्षवन्तः। "गरुत्पक्षच्छदाः पत्रम्" इत्यमरः। आशीविषाः आशिषि दंष्ट्रायां विषं येषां ते आशीविषाः सर्पाः। पृषोदरादित्वात् साधु। "स्त्री लाशीर्हिताशंसाहिदंष्ट्रयोः" इत्यमरः ("आशीरुरगदंष्ट्रायाम्" इति वा)

तैः खचिते चित्रिते। पद्मः करतले कपोलं विन्यस्य ध्यानादाः अन्याः इतरानेव इन्द्रस्य ध्वजोपरविक्षेपकादितदरत्वम् इति दोहदम्।

(1) According to some, the Siddhas inhabit, together with the Munis, the Bhuvarloka or middle region, between the earth and the sun. According to the Vishnupurana, eighty-eight thousand of them occupy the region of the sky, north of the sun and south of the seven Rishis. They are regarded as immortal, but only in the sense of living to the end of a Kalpa. See Wilson's V. P.

अतिप्रबन्धप्रहितास्त्रदृष्टिभिः
तमाश्रयं दुष्प्रसहस्य तेजसः ।
शशाक निर्वापयितुं न वासवः
स्रुतद्युतं वह्निमिवाद्रिरम्बुदः ॥ ५८ ॥
ततः प्रकोष्ठे हरिचन्दनाङ्किते
प्रमथ्यमानार्णवधीरनादिनीम् ।
रघुः शशाङ्कार्धमुखेन पत्रिणा
शरासनज्यामलुनाद्विडौजसः ॥ ५९ ॥

ते इव भीमदर्शनाः सपक्षाः सर्पाः इव द्रष्टॄणां भयावहाः इत्यर्थः। तैः अधोमुखैः ऊर्ध्वमुखैश्च धन्विनोरुपर्य्यधोदेशावस्थितत्वात् इति भावः। पत्रिभिः बाणैः उपान्तस्थिताः तटस्थाः सिद्धाः देवाः इन्द्रस्य, सैनिकाय रघोः, यस्मिन् तत् तथोक्तं तुमुलं सङ्कुलं युद्धं बभूव ॥ ५७ ॥

अतीति । वासवः अतिप्रबन्धेन अतिसातत्येन (नैरन्तर्येण) प्रहिताभिः प्रयुक्ताभिः अस्त्रदृष्टिभिः दुष्प्रसहस्य, दुःखेन प्रसह्यते इति दुष्प्रसहं तस्य दुःखेनाप्यसह्यस्य इत्यर्थः। तेजसः प्रतापस्य आश्रयं तं रघुम् अम्बुदः अद्रिः स्रुतः च्युतं निर्गतं वह्निम्(१) इव निर्वापयितुं न शशाक। रघोरपि लोकपालात्मकस्येन्द्रांश सम्भवत्वात् इति भावः ॥ ५८ ॥

तत इति । ततः रघुः हरिचन्दनाङ्किते प्रकोष्ठे मणिबन्धे

(१) स्रुतः च्युतं यद्वि मेघात् पतितं अपि वैद्युताग्निमित्यर्थः।

स चापमुत्सृज्य विवृद्धमत्सरः
प्रणाशनाय प्रबलस्य विद्विषः।
महीध्रपक्षव्यपरोपणोचितं(१)
स्फुरत्प्रभामण्डलमस्त्रमाददे(२) ॥ ६० ॥
रघुर्भृशं वक्षसि तेन ताडितः
पपात भूमौ सह सैनिकाश्रुभिः।

प्रमथ्यमानार्णवधीरनादिनीं प्रमथ्यमानार्णवः इव धीरं गम्भीरं नदतीति तां तथोक्तां, वेवेष्टि व्याप्नोतीति विट् व्यापकम् ओजः यस्य स तस्य विड्ओजसः इन्द्रस्य। पृषोदरादित्वात् साधु। शरासनज्यां धनुर्मौर्वीं शशाङ्कस्य अर्द्धः खण्डः(३) इव मुखं फलं(४) यस्य तेन पत्रिणा अलुनात् अच्छिनत् ॥ ५९ ॥

स इति। विवृद्धमत्सरः प्रवृद्धवैरः स इन्द्रः चापम् उत्सृज्य प्रबलस्य विद्विषः शत्रोः प्रणाशनाय वधाय महीं धारयन्तीति महीध्राः पर्वताः। मूलविभुजादित्वात् कप्रत्ययः। तेषां पक्षव्यपरोपणे पक्षच्छेदे उचितं स्फुरत्प्रभामण्डलम् अस्त्रं वज्रायुधम् आददे जग्राह ॥ ६० ॥

रघुरिति। रघुः तेन वज्रेण भृशम् अत्यर्थं वक्षसि

---

(१) Compare:—"शुद्धेऽपि पक्षच्छिदि हन्तरीदृशी श्रवेदनाम् कुलिशव्रतानाम्"। कुमारसम्भवम्। १ सर्गः।

(२) स्फुरत् कम्पमानं दीप्यमानं वा प्रभामण्डलं यस्य तत् तथोक्तम्।

(३) अर्द्धं नपुंसकमिति विधानात् समासश्चाचिले तस्य पूर्वनिपातः स्यात्। अतः उक्तं शशाङ्कस्य अर्द्धः खण्ड इति।

(४) "फला" इति भाषा।

निमेषमात्राद्वधूय दद्व्यथां
संहोत्थितः सैनिकहर्षनिस्वनैः ॥ ६१ ॥
तथापि शस्त्रव्यवहारनिष्ठुरे
विपक्षभावे चिरमस्य तस्थुषः।
तुतोष वीर्यातिशयेन वृत्रहा(१)
पदं हि सर्वत्र गुणैर्निधीयते ॥ ६२ ॥

ताड़ितः सन् सैनिकानाम् अश्रुभिः सह भूमौ पपात, तस्मिन् पतिते ते ररुदुः इत्यर्थः, निमेषमात्रात् तद्व्यथां दुःखम् अवधूय तिरस्कृत्य सैनिकानां ये हर्षेण निस्वनाः क्ष्वेड़ाः तैः सह उत्थितय, तस्मिन् उत्थिते हर्षात् सिंहनादांश्चक्रुः इत्यर्थः ॥ ६१ ॥

तथापीति। तथापि वज्रघातेऽपि शस्त्राणाम् आयुधानां व्यवहारेण व्यापारेण निष्ठुरे क्रूरे विपक्षभावे शत्रवे चिरं तस्थुषः स्थितवतः अस्य रघोः वीर्यातिशयेन वृत्रं हतवान् इति वृत्रहा। "ब्रह्मभ्रूणवृत्रेषु क्विप्"। तुतोष। स्वयं वीर एव वीरं जानाति इति भावः। कथं शत्रोः सन्तोषः अत आह, गुणैः सर्वत्र शत्रुमित्रोदासीनेषु पदं अंघ्रिः निधीयते गुणैः सर्वत्र संक्रम्यते इत्यर्थः। गुणाः शत्रूनप्यावर्जयन्ति इति भावः ॥ ६२ ॥

(१) वृत्रहा means destroyer of the great demon Vritra. In vedic hymns, the word वृत्र means enemies in general, as in the hymns; "इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे। युजं वृत्रेषु वज्रिणं"। Ri. 1. 7. 5. and again in, "विश्वसिन् सवनं सुतमिन्द्रो मदाय गच्छति। वृत्रहा सोम पीतये"। Ri. 1. 16. 8. It is therefore evident, that instead of "Vritra" the proper name of a great enemy passing for a voca-

असङ्गमद्रिष्वपि(१) सारवत्तया
न मे त्वदन्येन विसोढमायुधम् ।
अवेहि मां प्रीतमृते तुरङ्गमात्
किमिच्छसीति स्फुटमाह वासवः ॥ ६२ ॥
ततो निषङ्गादसमग्रमुद्धृतं
सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम् ।

असङ्गमिति । सारवत्तया अद्रिषु अपि असङ्गम् अप्रतिबन्धं मे आयुधं वज्रं त्वदन्येन न विसोढम् अतः मां प्रीतं सन्तुष्टम् अवेहि, तुरङ्गमात् ऋते तुरङ्गं वर्ज्जयित्वा । "अन्यारादितरर्त्ते" इति पञ्चमी । किम् इच्छसि इति स्फुटं वासवः आह । तुरङ्गमात् अन्यददेयं नास्ति इति भावः ॥ ६२ ॥

तत इति । ततः निषङ्गात् तूणीरात् असमग्रं यथा तथा उद्धृतं सुवर्णपुङ्खद्युतिभिः रञ्जिताः अङ्गुलयः येन तम् इषुं प्रति-

---

kle signifying a foe, as stated by Dr. Banerjea, the reverse has been the true process. Western scholars suppose, that Vritra is the name of the cloud that conceals the cows of heaven (rain-waters) within its caves, for killing whom by his thunderbolt and for the consequent liberation of the cows, Indra is so often praised in the hymns. Translation of Ri. 1. 7. 5 and 6. 8. "Indra we invoke for great wealth, Indra too for small wealth, who is our ally and the wielder of the thunderbolt against our enemies." "To this liberation well offered in every way, Indra the slayer of Vritra or enemies goes for hilarity for drinking the soma"

(1) Dinakara reads समम् for सहम्।

नरेन्द्रसूनुः प्रतिसंहरन्निपुं
प्रियंवदः (१) प्रत्यवदत् सुरेश्वरम् ॥ ६४ ॥
अमोच्यमश्वं यदि मन्यसे प्रभो
ततः समाप्ते विधिनैव कर्म्मणि ।
अजस्रदीक्षाप्रयतः स मद्गुरुः
क्रतोरशेषेण फलेन युज्यताम् ॥ ६५ ॥
यथा च वृत्तान्तमिमं सदोगतः
विलोचनैकांशतया (२) दुरासदः ।

संहरन् निवर्त्तयन्, नाप्रहरन्तं प्रहरेदिति निषेधात् इति भावः । प्रियं वदतीति प्रियंवदः । "प्रियवशे वदः खच्" इति खच्प्रत्ययः, अरुर्द्विषेत्यादिना मुमागमः । नरेन्द्रसूनुः रघुः सुरेश्वरं प्रत्यवदत्, न तु प्राहरत् इति भावः ॥ ६४ ॥

अमोच्यमिति । हे प्रभो इन्द्र अश्वम् अमोच्यं मन्यसे यदि ततः तर्हि अजस्रदीक्षायां प्रयतः सः मद्गुरुः मम पिता विधिना एव कर्म्मणि समाप्ते सति क्रतोः यत् फलं तेन फलेन अशेषेण कृत्स्नेन युज्यतां युक्तः अस्तु । अश्वमेधफललाभे किमश्वेन इति भावः ॥ ६५ ॥

यथेति । सदोगतः सदोरङ्गं गतः विलोचनस्य सूर्यस्य

(1) Another reading is प्रियम्वदम् which refers to सुरेश्वरम् ।

(२) दीक्षितत्वात् विलोचनैकांशत्वेन दुरधिगमः इति दिनकरः । यज्ञभूमि "चतुर्मूर्तित्वात् यजमानसचक्षुरंशभावात् दुरभिभवः दुराक्रमणीयः । 'दीक्षितं वदः यज्ञभूमिं' इति श्रुतेः" इति चाह ।

तवैव सन्देशहराद्विशाम्पतिः
शृणोति लोकेश तथा विधीयताम् ॥ ६६ ॥
तथेति कामं प्रतिशुश्रुवान् रघोः
ययागतं (१) मातलिसारथिर्ययौ।
नृपस्य नातिप्रमनाः सदोगृहं (२)
सुदक्षिणासूनुरपि न्यवर्त्तत ॥ ६७ ॥
तमभ्यनन्दत् प्रथमं प्रबोधितः
प्रजेश्वरः शासनहारिणा हरेः।

एकांगतया अष्टानाम् अन्यतममूर्त्तित्वात्, दुरासदः अस्माद्दृगैः दुष्प्राप्यः विशाम्पतिः यदा इमं वृत्तान्तं तव सन्देशहरात् वार्त्ताहरात् एव शृणोति च, हे लोकेश इन्द्र तथा विधीयताम् ॥ ६६ ॥

तथेति। मातलिसारथिः इन्द्रः रघोः सम्बन्धिनं कामं मनोरथं तथेति तथास्तु इति प्रतिशुश्रुवान् प्रतिश्रुतवान्। "भाषायां सदवसश्रुवः" इति क्रसुप्रत्ययः। ययागतं ययौ सुदक्षिणासूनुः रघुः अपि नातिप्रमनाः विजयलाभेऽप्यखनामावातीव तुटः सन्। नञर्थस्य नगर्भस्य सुप्सुपेति समासः। नृपस्य सदोगृहं प्रति न्यवर्त्तत ॥ ६७ ॥

तमिति। हरेः इन्द्रस्य शासनहारिणा पुरुषेण प्रथमं प्रबो-

(१) "ययागतं न तु रघुं विशिनष्टि माघः" इति दिनकरः। "देव मातलिसारथिरेव इत्यर्थः" इति मल्लः।

(२) "सदोगृहं दीक्षामण्डपमिति" दिनकरः; "यज्ञमण्डपमिति" मल्लः।

परामृशन् हर्षजड़ेन(१) पाणिना
तदीयमङ्गं कुलिशव्रणाङ्कितम् ॥ ६८ ॥
इति चितीशो नवतिं नवाधिकां
महाक्रतूनां महनीयशासनः ।
समारुरुक्षुर्दिवमायुषः क्षये
ततान सोपानपरम्परामिव ॥ ६९ ॥

अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्वा यूने सितातपवारणम् ।

धितः क्षापितः हृत्तान्तम् इति शेषः, प्रजेश्वरः दिलीपः हर्ष जड़ेन हर्षनिर्भरेण पाणिना कुलिशव्रणाङ्कितं तस्य रघोः त तदीयम् अङ्गं शरीरं परामृशन्(२)सन् तं रघुम् अभ्यनन्दत् ॥६८॥

इतीति । महनीयशासनः पूजनीयाज्ञः चितीशः इति अनेन प्रकारेण । "इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु" इत्य मरः । महाक्रतूनाम् अश्वमेधानां नवभिः अधिकां नवतिम् एकोनशतम् आयुषः क्षये सति दिवं स्वर्गम् समारुरुक्षुः आरोढु मिच्छुः सोपानानां परम्परां पङ्क्तिं इव ततान ॥ ६९ ॥

अथेति । अथ विषयेभ्यः व्यावृत्तात्मा निवृत्तचित्तः स दिलीपः यथाविधि यथाशास्त्रं यूने सूनवे नृपतिककुदं राज चिह्नम् । "ककुदस् ककुदं श्रेष्ठे नृपाङ्गे राजलक्षणे" इति

(१) हर्षजड़ेन हर्षवशात् जड़ीभूतेन इति दिनकरः । "हर्षजड़दत्वात् चेतसोऽनिर्वृतेः काशीदासः । हर्षनिर्भरेणेति टीकाकृद्भ्यामप्यर्थो लाक्षणिकः' दीक्षितः ।

(२) परामृशन् सादरं स्पृशन् ।

मुनिवनतरुच्छायां देव्या तया सह शिश्रिये
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥७०॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
रघुराजाभिषेको नाम तृतीयः सर्गः।

विग्रः। सितातपवारणं श्वेतच्छत्रं दत्वा तया देव्या सुदक्षिणया सह मुनिवनतरोः छायां श्रिश्रिये श्रितवान् वानप्रस्थाश्रमं स्वीकृतवान् इत्यर्थः। तथाहि गलितवयसां वृद्धानाम् इक्ष्वाकूणाम् इक्ष्वाकोर्गोत्रापत्यानाम्। "तद्राजसंज्ञकत्वादणो लुक्"। इदं वनगमनं कुलव्रतम्। देव्या सहेत्यनेन सपत्नीकवानप्रस्थाश्रमपक्ष उक्तः। तथा च याज्ञवल्क्यः "सुतविन्यस्तपत्नीकः तया वानुगतो वनम्। वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत्" ॥ इति हरिणीवृत्तमेतत् ॥ ७० ॥

इति श्रीमहामहोपाध्याय-श्रीवाचस्पतिमिश्र-श्रीविरचितायां
रघुवंशटीकायां सञ्जीवन्यां समाख्यायां तृतीयः सर्गः।

चतुर्थः सर्गः ।

स राजंर गुरुणा दत्तं प्रतिपद्याधिकं वभौ ।
दिनान्ते निहितं तेजः सवित्रेव(१)हुताशनः ॥१॥

शारदा शारदाम्भोज-वदना वदनाम्बुजे ।
सर्व्वदा सर्व्वदास्माकं सन्निधिं सन्निधिं क्रियात् ॥

स इति । स रघुः गुरुणा पित्रा दत्तं राज्यं राज्ञः कर्म्म प्रजापरिपालनात्मकम् । पुरोहितादित्वाद्यक् । प्रतिपद्य प्राप्य दिनान्ते सायंकाले सवित्रा सूर्य्येण निहितं तेजः प्रतिपद्य हुताशनः अग्निः इव अधिकं वभौ । "सौरं तेजः सायमग्निं संक्रमते । आदित्यो वा अस्तं यन् अग्निमनुप्रविशति । अग्निं वा आदित्यः सायं प्रविशति" इत्यादिश्रुतिः प्रमाणम् ॥ १ ॥

---

(१) सविता सर्वभावानां प्रसविता । सूतेस्तृन् ।

The sun is said to be the producer of things, because by giving sensibility to sleeping creatures and rescuing the world from the night's darkness, he is considered poetically, as if calling the world into existence. The following hymn is to that effect "कृधु रत्नधातमे यशो मर्ताय भावसे । यतुसन्निरजाघसः" Translate: "O Mortals! the same Indra in the form of the sun creating sensibility for the insensible (that is awaking men from sleep) and form for the formless (that is manifesting the forms which in the dark of the night had got a chaotic appearance), has issued with blazing rays." Ri 1. 6. 3. see Dr K. L Banerjea's Edition page 20.

दिलीपानन्तरं राज्ञि तं निशम्य प्रतिष्ठितम् ।
पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ॥ २ ॥
पुरुहूतध्वजस्येव(१) तस्योन्नयनपङ्क्तयः ।
नवाभ्युत्थानदर्शिन्यः(२) ननन्दुः सप्रजाः प्रजाः ॥३॥

दिलीपेति । दिलीपानन्तरं राज्ये प्रतिष्ठितम् अवस्थितं तं रघुं निशम्य आकर्ण्य पूर्वं दिलीपकाले राज्ञां हृदये प्रकर्षेण धूमोऽस्य सञ्जातः प्रधूमितः अग्निः सन्तापाग्निः उत्थितः इव प्रज्वलितः इव, पूर्वेभ्योऽधिकसन्तापोऽभूत् इत्यर्थः । राजकर्तृकस्यापि निग्रहनस्याग्नावुपचारोक्त्या समानकर्तृकत्वविरोधः इति ॥ २ ॥

पुरुहूतेति । पुरुहूतध्वजः इन्द्रध्वजः । स किल राजभिरैश्वर्यं पूजयते इत्युक्तं भविष्योत्तरे, "एवं यः कुरुते यात्राम्

(१) राज्ञः नवाभ्युत्थानं गजारोहणादि——। "अभिषिक्तो हि राजा गजेन्द्रमारुह्य पुरं प्रदक्षिणीकुर्यादित्याचारः" इति भरतः । पुरुहूतध्वजस्य इन्द्रमहोत्सवस्य । "गजाकारं चतुस्तम्भं पुरद्वारे प्रतिष्ठितम् । यौराः कुर्वन्ति यत्रेदं पुरुहूतमहोत्सवम्" इति मेदिनीकरः उद्धृतम् ।

This festival used to be celebrated in honor of Indra, the god of rain, at the gathering of corn. It was called पुरुहूतध्वज, because the four-pillared edifice erected on the occasion was in the form of the rainbow. This custom, which is no longer observed here, resembled that prevailing in England at the feast of harvest-home. No public worship is offered to Indra at present; and the only festival in the Hindu Calendar, the Sakradvajotthana, the erection of a flag in honor of Sakra—should be held on the twelfth or thirteenth of Bhadra. The Sakradvajotthana is, also, a rite to be performed by kings and princes.

समसेव समाक्रान्तं द्वयं विरदगामिना (१)
तेन सिंहासनं पित्र्यमखिलञ्चारिमण्डलम् ॥ ४ ॥
छायामण्डललक्ष्मेण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम्(२) ॥५॥

इन्द्रकेतोर्युधिष्ठिर । यज्ञीयः कामवर्षी स्यात् तस्य राज्ञो न संशयः ॥" इति । "चतुरस्रं ध्वजाकारं राजद्वारे प्रतिष्ठितम् । आहुः शक्रध्वजं नाम पौरलोके सुखावहम्" ॥ पुरुहूतध्वजस्य इव तस्य रघोः नवम् अभ्युत्थानम् अभ्युन्नतिम् अभ्युदयञ्च पश्यन्तीति नवाभ्युत्थानदर्शिन्यः उत् ऊर्द्धं प्रस्थिताः उल्लसिताश्च नयनपङ्क्तयः यासां ताः सप्रजाः ससन्तानाः प्रजाः जनाः । "प्रजा स्यात् सन्ततौ जने" इत्युभयत्राप्यमरः । ननन्दुः ॥ ३ ॥

समिति। विरदः इव विरदैश्च गच्छतीति विरदगामिना। "कर्त्र्युपमाने" इति "सुप्यजातौ" इति च णिनिः । तेन रघुणा समं युगपत् एव द्वयं समाक्रान्तम् अधिष्ठितम् । किं तत् द्वयम् पितुरागतं पित्र्यम् । "पितुर्यत्" इति यत्रयः । सिंहासनम् अखिलम् चरेः मण्डलं राष्ट्रञ्च ॥ ४ ॥

सिंहासनारोहणानन्तरं तस्य लक्ष्मीसन्निधानमाह, छायेति। अत्र रघोस्तेजोविशेषेण स्वयं संविहितया लक्ष्म्या छत्रधारणं कृतमित्युक्तेः सति । पद्मा लक्ष्मीः । "लक्ष्मीः पद्मालया पद्मा

(१) विरदेन सह श्रीर्यस्य तेन । अभिविधौ त्रयः सहितमाहश्च गच्छतीति हलायुधः इति दिनकरः ।

"लक्ष्मीर्हि पद्मरूपेण रवेश्च सकलं जगत्" इति दिनकरः ।

परिकल्पितसान्निध्या काले काले च वन्दिषु।
स्तुत्यं स्तुतिभिरर्थ्याभिः उपतस्थे सरस्वती ॥ ६ ॥
मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः।

कमला श्रीर्हरिप्रिया" इत्यमरः। स्वयम् अदृश्या किल, किलेति सम्भावनायाम्, सती, छायामण्डललक्ष्येण कान्तिपुञ्जानुमेयेन न तु स्वरूपतो दृश्येन। छायामण्डलमित्यनेन अनातपत्रानं लक्ष्यते। "छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः" इत्युभयत्राप्यमरः। पद्मातपत्रेण पद्ममेव आतपत्रं तेन करण-भूतेन साम्राज्ये साम्राज्यकर्मणि मण्डलाधिपत्ये दीक्षितम् अभिषिक्तं तं भेजे। अन्यथा कथमेतादृशी कान्तिसम्पत्तिः इति भावः ॥ ५ ॥

सम्प्रति सरस्वतीसान्निध्यमाह, परिकल्पितेति। सरस्वती च काले काले सर्वेषु अपि योग्यकालेषु। नित्यवीप्सयोरिति वीप्सायां द्विर्वचनम्। वन्दिषु परिकल्पितसान्निध्या कृतसन्नि-धाना सती स्तुत्यं स्तोत्राहं तं रघुम् अर्थ्याभिः अर्थात् अन-पेताभिः। "धर्म्म पथ्यर्थन्यायादनपेत" इति यत्प्रत्ययः। स्तुतिभिः स्तोत्रैः उपतस्थे देवतावुद्धया पूजितवती इत्यर्थः। देवतात्वञ्च विष्णुः पृथिवीपतिरिति वा लोकपालात्मकत्वादित्यनुसन्धेयम्। एवञ्च सति उपाङ्गेवपूजा-सङ्गतिकरण-मित्रकरण-पर्य्यायेति वक्तव्यादात्मनेपदं सिध्यति ॥ ६ ॥

मनुरिति। वसुन्धरा मनुप्रभृतिभिः मन्वादिभिः मान्यैः पूज्यैः राजभिर्भुक्ता यद्यपि भुक्तैव इत्यर्थः। यद्यपीत्यवधारणे। "अप्यर्थे

तथाप्यनन्यपूर्वेव तस्मिन्नासीद् वसुन्धरा ॥ ७ ॥
स हि सर्व्वस्य लोकस्य युक्तदण्डतया मनः ।
आददे नातिशीतोष्णः नभस्वानिव दक्षिणः ॥८॥
मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ॥ ९ ॥

यदि वार्थे स्यात्" इति केशवः । तथापि तस्मिन् राज्ञि अन्यः पूर्वः यस्याः सा अन्यपूर्वा, अन्यपूर्वा न भवतीति अनन्यपूर्वा अनन्योपभुक्तैव आसीत् तत्प्रथमपतिकेवानुरक्तवतीत्यर्थः ॥७॥

अत्र कारणमाह, स हीति । हि यस्मात् कारणात् स रघुः युक्तदण्डतया यथापराधदण्डतया सर्व्वस्य लोकस्य मनः आददे जहार । क इव अतिशीतः अत्युष्णो वा न भवतीति नाति-शीतोष्णः । नञर्थस्य नयदस्य सुप्सुपेति समासः । दक्षिणः दक्षिणदिग्भवः नभस्वान् वायुः इव मलयानिल इव इत्यर्थः । युक्तदण्डतयेत्यत्र कामन्दकः, "उद्विजयति तीक्ष्णेन मृदुना परि-भूयते । दण्डेन नृपतिस्तस्मात् युक्तदण्डः प्रशस्यते" ॥ इति ॥८॥

मन्देति । तेन रघुणा प्रजाः गुरौ दिलीपविषये, सहकारः अतिसौरभःचूतः । "आम्रचूतो रसालोऽसौ सहकारोऽतिसौरभः" इत्यमरः । तस्य फलेन पुष्पोद्गमे पुष्पोदये इव, ततोऽपि गुणा-धिकतया हेतुना मन्दोत्कण्ठाः अल्पौत्सुक्याः कृताः । गुणोत्तरश्च उत्तरो विषयः पूर्वं विस्मारयति इति भावः ॥ ९ ॥

नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम् ।
पूर्व एवाभवत् पक्षः तस्मिन् नाभवदुत्तरः ॥ १० ॥
पञ्चानामपि भूतानाम् उत्कर्षं पुपुपुर्गुणाः(१) ।
नवे तस्मिन् महीपाले सर्व्वं नवमिवाभवत् ॥११॥

नयेति । नयविद्भिः नीतिशास्त्रज्ञैः नवे तस्मिन् राज्ञि विषये तमधिकृत्य इत्यर्थः, सत् धर्म्मयुद्धादिकम्, असत् कूटयुद्धादिकञ्च उपदर्शितम् । तस्मिन् राज्ञि पूर्वः पक्षः एव अभवत् संक्रान्तः इत्यर्थः, उत्तरः पक्षः न अभवत् न संक्रान्तः इत्यर्थः । तत्र सदसतोर्मध्ये सदेवाभिमतं नासत्, तदुद्भावनन्तु ज्ञानार्थमेव इत्यर्थः । पक्षः साधनयोग्यार्थः । "पक्षः पार्श्वं गरुत्साध्यसहायबलभित्तिषु" इति केशवः ॥ १० ॥

पञ्चानामिति । पृथिव्यादीनां पञ्चानां भूतानाम् अपि गुणाः गन्धादयः उत्कर्षम् अतिशयं पुपुपुः । अत्रोच्यते, तस्मिन् रवौ नाम नवे महीपाले सति सर्वं वस्तुजातं नवम्

(१) त्रिषप्तेजोमरुद्योमसलक्षणानि पञ्चभूतानि । तत्र त्रिषु रूपरसगन्धस्पर्शशब्दाः पञ्च एव गुणाः सन्ति ; जले रूपरसस्पर्शशब्दाः चत्वारः, तेजसि रूपस्पर्शशब्दास्त्रयः, वायौ द्वौ स्पर्शशब्दौ ; आकाशे च एकः शब्द एव विद्यते । तथाहि "पृथ्वी पञ्चगुणा तोयं चतुर्गुणमयानघः । त्रिगुणो त्रिगुणो वायुर्विगुणैकगुणं भवेत्" इति वज्रसेन उद्धृतम् । तथाच विष्णुपुराणे—"आकाशं शब्दमात्रं यत् तत् स्पर्शमात्रमाविशत् । त्रिगुणस्तु ततो वायुः शब्दस्पर्शात्मकोऽभवत् । रूपं ततोऽपि विततं शब्दस्पर्शगुणान्वितम् । त्रिगुणञ्च ततस्तस्मिः स शब्दस्पर्शरूपवान् । शब्दस्पर्शरूपमात्रं रसमात्रं समाविशत् । ततश्चतुर्गुणा चापो विज्ञेयास्तु रसात्मिकाः । शब्दस्पर्शञ्च रूपञ्च रसञ्च गन्धमाविशत् । सङ्घाता जलमात्रेण चाविशन्ती महीमिमाम् । ततः पञ्चगुणा भूमिः स्थूलभूतेषु दृश्यते । आत्मा योगाच्च भूतादेर्विशेषात्तेन ते मृताः ॥

यथा प्रह्लादनाच्चन्द्रः प्रतापात् तपनो यथा ।
तथैव सोऽभूदन्वर्थः राजा प्रकृतिरञ्जनात् ॥ १२ ॥
कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।
चक्षुष्मत्ता(१) तु शास्त्रेण सूक्ष्मकार्य्यार्थदर्शिना ॥१३॥
लब्धप्रशमनस्वस्थम् अथैनं समुपस्थिता ।

इव अभवत् । तदेव भूतजातमिदानीमपूर्वगुणयोगादपूर्वमिवाभवत् इति भावः ॥ ११ ॥

यथेति । यथा चन्दयति आह्लादयतीति चन्द्रः इन्दुः । चदि धातोरौणादिको रप्रत्ययः । प्रह्लादनात् आह्लादकरणात् अन्वर्थः अनुगतार्थनामकः अभूत्, यथा च तपतीति तपनः सूर्यः । नन्द्यादित्वात् ल्युप्रत्ययः । प्रतापात् सन्तापजननात् अन्वर्थः, तथा एव स राजा प्रकृतिरञ्जनात् अन्वर्थः सार्थकराजशब्दः अभूत् । यद्यपि राजशब्दो राजतेर्दीप्त्यर्थात् कनिन् प्रत्ययान्तो न तु रञ्जेः, तथापि धातूनामनेकार्थत्वाद्रञ्जनाद्राजेत्युक्तं कविना ॥ १२ ॥

काममिति । विशाले तस्य रघोः लोचने कामं कर्णान्तयोः विशाले कर्णप्रान्तगते चक्षुष्मत्ता तु चक्षुःफलं तु इत्यर्थः सूक्ष्मान् कार्य्यार्थान् कर्त्तव्यार्थान् दर्शयति प्रकाशयतीति सूक्ष्मकार्य्यार्थदर्शिना शास्त्रेण एव । शास्त्रं दृष्टिर्विवेकिनाम् इति भावः ॥१३॥

लब्धेति । अथ लब्धस्य राज्यस्य प्रशमनेन परिपन्थिनाम

(१) Compare "चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्य्यार्थदर्शिना । चक्षुष्मत्ता तु शास्त्रेण एव इ."।

पार्थिवश्रीर्द्वितीयेव शरत् पङ्कजलोचना ॥ १४ ॥
निर्हृष्टलघुभिर्मेघैः मुक्तवर्त्मा सुदुःसहः ।
प्रतापस्तस्य भानोश्च युगपद् व्यानशे दिशः ॥ १५ ॥
वार्षिकं संजहारेन्द्रः धनुर्जैत्रं रघुर्दधौ ।
प्रजार्थसाधने तौ हि पर्य्यायोद्यतकार्मुकौ ॥ १६ ॥

अनुरञ्जनप्रतीकाराभ्यां स्थिरीकरणेन स्वस्थं समाहितचित्तम् एनं रघुं पङ्कजलोचना पद्मचिह्ना। श्रियोऽपि विशेषणमेतत्। शरत्, द्वितीया पार्थिवश्रीः राजलक्ष्मीः इव, समुपस्थिता प्राप्ता। "रक्षा पौरजनस्य देशनगरग्रामेषु गुप्तिस्तवा, योधानामपि संग्रहोऽपि,तुलया मानव्यवस्थापनम्। साम्यं लिङ्गिषु दान-वृत्तिकरणं, त्यागः समानेऽर्जनं कार्य्याण्येव महीभुजां प्रथमनान्यें तानि राज्ये नवे ॥ १४ ॥

निर्हृष्टेति। निःशेषं हृष्टाः निर्हृष्टाः। कर्त्तरि क्तः। अत एव लघवः तैः मेघैः मुक्तवर्त्मा त्यक्तमार्गः अत एव सुदुःसहः तस्य रघोः भानोश्च प्रतापः पौरुषम् आतपश्च। "प्रतापौ पौरुषातपौ" इति यादवः। युगपत् दिशः व्यानशे व्याप ॥१५॥

वार्षिकमिति। इन्द्रः वर्षासु भवं वार्षिकं वर्षानिमित्तम् इत्यर्थः। "वर्षाभ्यष्ठक्" इति ठक्प्रत्ययः। धनुः संजहार रघुः जैत्रं जयशीलम्। जेतृयम्दात् तृषन्तात् प्रज्ञादिभ्यश्चेति स्वार्थे अण्प्रत्ययः। धनुः दधौ, हि यस्मात् तौ इन्द्ररघू प्रजानाम् अर्थस्य प्रयोजनस्य दुष्टविजयलक्षणस्य साधनविषये पर्य्यायेण

पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप(१)तच्छ्रियम् ॥१७॥
प्रसादसुमुखे तस्मिन् चन्द्रे च विशदप्रभे ।
तदा चक्षुष्मतां प्रीतिरासीत् समरसा द्वयोः ॥१८॥
हंसश्रेणीषु तारासु कुमुदत्सु च वारिषु ।
विभूतयस्तदीयानां पर्य्यस्ता यशसामिव ॥ १९ ॥

उद्यते कार्म्मुके याभ्यां तौ पर्य्यायोद्यतकार्म्मुकौ । पाठान्तरे पर्य्यायेण उद्यमः विद्यमान यथोः तौ पर्य्यायोद्यमविद्यमौ । द्वयोः पर्य्यायकरणादक्लेशः इति भावः ॥ १६ ॥

पुण्डरीकेति । पुण्डरीकं सिताम्भोजम् एव आतपत्रं यस्य स तथोक्तः, विकसन्ति काशानि काशाख्यतृणकुसुमानि एव चामराणि यस्य स तथोक्तः, ऋतुः शरदृतुः पुण्डरीकनिभातपत्रं काशनिभचामरं तं रघुं विडम्बयामास अनुचकार, तस्य रघोः श्रियं पुनः शोभां तु न प्राप । "शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते" इति शाश्वतः ॥ १७ ॥

प्रसादेति । प्रसादेन सुमुखे तस्मिन् रघौ विशदप्रभे निर्मलकान्तौ चन्द्रे च द्वयोः विषये तदा चक्षुष्मतां प्रीतिः अनुरागः समरसा समस्वादा तुल्यभोगा इति यावत् । "रसो गन्धे रसः स्वादे" इति विश्वः । आसीत् ॥ १८ ॥

हंसेति । हंसानां श्रेणीषु षड्क्तिषु तारासु नक्षत्रेषु कुमु-

(१) न तु काशचित्रपटच्छेन प्रकृतश्रीभा लभ्यते इति व्यतिरेकी व्यज्यते ।

इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयम्।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः॥ २०॥

दानि सन्ति येषु कुमुद्वन्ति। "कुमुद्वान् कुमुदप्रायः" इत्यमरः। कुमुदनड्वेतसेभ्यो ऽतुप्। तेषु कुमुदप्रायेषु, इत्यर्थः. वारिषु च तदीयानां रघुसम्बन्धिनां यशसां विभूतयः सम्पदः पर्य्यस्ताः इव प्रसारिताः किम् इत्युत्प्रेक्षा। अन्यथा कथमेषां धवलिमा इति भावः॥ १९॥

इक्षिति। इक्षूणां छाया इक्षुच्छायम्। छायावाङ्बल्य इति नपुंसकत्वम्। तत्र निषण्णाः इक्षुच्छायनिषादिन्यः। स्त्रीलिङ्गपाठे इक्षोः छाया इति विग्रहः, अन्यथा बहुत्वे नपुंसकत्वप्रसङ्गात्। शालीन् गोपायन्ति रक्षन्तीति शालिगोप्यः शस्यपालिकाः स्त्रियः। कर्म्मण्यण्, "टिड्ढाणञ्" इत्यादिना ङीप्। गोप्तुः रक्षकस्य तस्य रघोः गुणेभ्यः उदयः यस्य तत् गुणोदयं गुणोत्पन्नम् आकुमारं कुमारात् आरभ्य कथोद्घातः कथारम्भः यस्य तत् कुमारैरपि स्तूयमानम् इत्यर्थः यशः जगुः गायन्ति स्म। अथवा कुमारस्य सतः रघोः याः कथाः इन्द्रविजयादयः ततः आरभ्य आकुमारकथम्। तत्राप्यभिविधौ अव्ययीभावः। आकुमारकथम् उद्घातः यस्मिन् कर्म्मणि, गानक्रियाविशेषणमेतत्। "स्याद्व्याहानमुद्घात आरम्भः" इत्यमरः। आकुमारकथोद्भूतमिति पाठे कुमारस्य सतः तस्य कथाभिः चरितैः उद्भूतं यत् यशः तत् यशः आरभ्य यशः जगुः इति व्याख्येयम्॥ २०॥

प्रससादोदयादभ्रः(१)कुम्भयोनेर्महौजसः (२) ।
रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः ॥ २१ ॥
मदोद्ग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ।
लीलाखेलमनुप्रापुः महोक्षास्तस्य विक्रमम्(३)॥२२॥

प्रससादेति । महौजसः कुम्भयोनेः अगस्त्यस्य । "अगस्त्यः कुम्भसम्भवः" इत्यमरः । उदयात् अभ्रः प्रससाद प्रसन्नं बभूव, महौजसः रघोः उदयात् अभिभवाशङ्कि द्विषतां मनः चुक्षुभे कालुष्यं प्राप । "अगस्त्योदये जलानि प्रसीदन्ति" इत्यागमः ॥२१॥

मदेति । मदोद्ग्राः मदोद्धताः ककुदेषामस्तीति ककुद्मन्तः महाककुदः इत्यर्थः । यंवादित्वात् मकारस्य वत्वाभावः । सरितां कूलानि उद्रुजन्तीति कूलमुद्रुजाः । उदि कूले "रुजिवहोरिति" खश्प्रत्ययः, "अरुर्द्विषेत्यादिना" मुमागमः । महान्तः उक्षाणः महोक्षाः । "अचतुरेत्यादिना" निपातनात् अकारान्तः । लीलाखेलं विलाससुभगं तस्य रघोः उत्साहवतः वपुषतः परमध्वक्षस्य विक्रमं शौर्यम् अनुप्रापुः अनुचक्रुः ॥ २२ ॥

---

(१) श्रावणभाद्रपदयोरन्तरा अगस्त्योदयो भवति ।

(२) पुरा किल इक्ष्वाकुपुत्रेण निमिराजेन प्रतिशप्तो वसिष्ठः कामसूनो मित्रावरुणयोः अरीरं प्रविवेश । ततयोर्ऊर्ध्वरेतोदर्शनात् चरितस्य तयोस्तेजसः कुम्भे पतनम् अगस्त्योऽजनिष्टेति पुराणवार्ता ।

(३) लीलाखेलं विलासमन्थरमिति यन्नाथः । लीलया निरायासेन खेलं विहरणं रघोर्विक्रममनुगताः । उपपदे तु ...विक्रमं गतिविशेषम् । रघुविक्रमोऽपि महोदयं ककुदाञ्जनिष्ठं मनुक्रः ; यात्रायां करितुरगादिखुराद्यभिघातेन सरितां कूलभेदं अकरोति दिनकरः ।

प्रसवैः सप्तपर्णानां मदगन्धिभिराहृताः।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः (१) ॥ २३ ॥
सरितः कुर्व्वती गाधाः पथश्चाशु नानकर्दमान्।
यावायै चोदयामास तं शक्तेः प्रथमं शरत् ॥ २४ ॥

प्रसवैरिति। मदस्य इव गन्धः येषां तैः मदगन्धिभिः। "उपमानाच्च" इति समासान्तः इकारः। सप्तपर्णानां इचविशेषाणाम्। "सप्तपर्णी विशालत्वक् शारदो विषमच्छदः" इत्यमरः। प्रसवैः पुष्पैः आहृताः तस्य रघोः नागाः गजाः। "गजेऽपि नागमातङ्गौ" इत्यमरः। असूयया इव आहृतिनिमित्तया स्पर्द्धया इव सप्तधा एव प्रसुस्रुवुः मदं वहवुः। प्रतिगजगन्धाभिमानात् इति भावः। "करात् कटाभ्यां मेदाच्च नेत्राभ्याञ्च मदस्रुतिः" इति पालकाव्ये। करात् नासारन्ध्राभ्याम् इत्यर्थः ॥ २३ ॥

सरित इति। सरितः गाधाः सुप्रतराः कुर्व्वती पथः मार्गान् च आशु नानकर्दमान् एकपङ्कान् कुर्व्वती। संयोगादेरातो धातोर्यण्वत इति श्वतेर्निष्ठातस्य नत्वम्। शरत् शरदृतुः तं रघुं शक्तेः उत्साहशक्तेः प्रथमं प्राक् यावायै दण्डयात्रायै (२) चोदयामास प्रेरयामास। प्रभावमन्त्रशक्तिसम्पन्नस्य शरत् स्वयमुत्साहमुत्पादयामास इत्यर्थः ॥ २४ ॥

---

(१) "प्रसदि मदवाहः" इति पाठः।

(२) दण्डयात्रा is a warlike expedition. See Williams' Dic.

तस्मै सम्यक् हुतो वह्निः वाजिनीराजनाविधौ(१)।
प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ ॥ २५ ॥
स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ॥२६॥

तस्मा इति। वाजिनाम् अश्वानां नीराजनाविधौ नीराजनाख्ये शान्तिकर्म्मणि सम्यक् विधिवत् हुतः होमसमिद्धः वह्निः प्रगता दक्षिणं प्रदक्षिणम्। तिष्ठद्गुप्रभृतित्वात् अव्ययीभावः। प्रदक्षिणं या अर्चिः ज्वाला तस्याः व्याजेन हस्तेन इव तस्मै जयं ददौ। उक्तमाहवयाचायाम्, "इडः प्रदक्षिणगतो हुतभुक् नृपस्य धात्रीं समुद्ररत्नानां वशगां करोति" इति। वाजिग्रहणं गजादीनामप्युपलक्षणं तेषामपि नीराजनाविधानात् ॥ २५ ॥

स इति। गुप्तो मूलं स्वनिवासस्थानं प्रत्यन्तः प्रान्तदुर्गश्च येन सः गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिः उद्धृतपृष्ठशत्रुः सेनया रक्षितपृष्ठदेशो वा अयान्वितः शुभदैवान्वितः। "अयः शुभावहो विधिः" इत्यमरः। स रघुः षड्विधं मौलभृत्यादिरूपं बलं सैन्यम्। "मौलभृत्यः सुहृच्छ्रेणी द्विषदाटविकं बलम्" इति कोषः। आदाय दिशां जिगीषया जेतुमिच्छया प्रतस्थे चचाल ॥ २६ ॥

---

(१) नीरस्य शान्त्युदकस्य अजना क्षेपोऽत्र, निःशेषेण राजनात् वा। पञ्चनीराजनं कुर्य्यात् प्रथमं दीपमालया। द्वितीयं क्षीरफेनेन तृतीयं धौतवाससा। धूपा चलादिपर्वैव चतुर्थं परिकीर्त्तितम्। पञ्चमं प्रणिपातेन साष्टाङ्गेन यथाविधि। इति।
See Professor Tarkavachaspati's Dic.

अवाकिरन् वयोवृद्धाः तं लाजैः पौरयोषितः।
पृषतैर्मन्दरोद्भूतैः क्षीरोर्म्मय इवाच्युतम्(१) ॥ २७॥
स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा(२)।
अहिताननिलोद्भूतैः तर्ज्जयन्निव केतुभिः ॥ २८ ॥

अवाकिरन्निति। वयोवृद्धाः पौरयोषितः तं रघुं प्रयातं लाजैः आचारलाजैः, मन्दरोद्भूतैः पृषतैः विन्दुभिः क्षीरोर्म्मयः क्षीरसमुद्रोर्म्मयः अच्युतं विष्णुम् इव अवाकिरन् पर्य्यक्षिपन्॥२७॥

स इति। प्राचीनबर्हिर्नाम कश्चिन्महाराजः इति केचित्। प्राचीनबर्हिः इन्द्रः। "पर्ज्जन्यो मघवा हरिहयः प्राचीनबर्हिस्तथा" इति इन्द्रपर्य्यायेषु हलायुधाभिधानात्। तेन तुल्यः स रघुः अनिलेन अनुकूलवातेन उद्भूतैः केतुभिः ध्वजैः अहितान् रिपून् तर्ज्जयन् इव भर्त्सयन् इव। तर्ज्जिभर्त्स्योरनुदात्तेऽपि च चिङोऽङ्करणेनानुदात्तेत्त्वनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनात् परस्मैपदमिति यामनः। प्रथमं प्राचीं दिशं ययौ ॥ २८ ॥

---

(१) समुद्रमथनकाले मन्दराधिष्ठितमित्यर्थः।

"In the midst of the milky sea, Hari himself in the form of a tortoise, served as a pivot for the mountain (Mandara) as it was whirled around. The holder of the mace and discus was present, in other forms amongst the gods and demons, assisted to drag the monarch of the serpent race; and in another vast body, he sat upon the summit of the mountain. With one portion of his energy, unseen by gods or demons, he sustained the serpent king, and, with another infused vigour into the gods." See Wilson's V. P.

(२) क्वचिद्ग्रे समुत्पन्नो बहवीनिः सनातनः। प्राचीनबर्हिर्भगवान् इति महाभारते। "प्राचीनाग्राः कुशास्तस्य पृथिव्यां जगतीपतेः। प्राचीनबर्हिर्भगवान्

रजोभिः स्यन्दनोद्भूतैः गजैश्च घनसन्निभैः ।
भुवस्तलमिव व्योम कुर्व्वन् व्योमेव भूतलम् ॥२९॥
प्रतापोऽग्रे(१) ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्रथादीति चतुस्कन्धेव सा चमूः ॥३०॥
मरुपृष्ठान्युदग्भांसि नाव्याः सुप्रतरा नदीः ।

रजोभिरिति । किं कुर्व्वन् स्यन्दनोद्भूतैः रजोभिः घनसन्निभैः वर्णतः क्रियातः परिमाणतश्च मेघतुल्यैः गजैश्च यथाक्रमं व्योम आकाशं भुवः तलम् इव भूतलञ्च व्योम इव कुर्वन् ययौ इति पूर्वेण सम्बन्धः ॥ २९ ॥

प्रताप इति । अग्रे प्रतापः तेजोविशेषः । "स प्रभावः प्रतापश्च यत्तेजः कोशदण्डजम्" इत्यमरः । ततः शब्दः सेनाकलकलः, तदनन्तरं परागः धूलिः । "परागः पुष्परजसि धूलिष्वानीययोरपि" इति विश्वः । पश्चात् रथादि रथाश्वादि चतुरङ्गबलम् इति इत्थं चतुस्कन्धा इव चतुर्व्यूहा इव । "स्कन्धः प्रकाण्डे कायांशे विज्ञानादिषु पञ्चसु । नृपे समूहे व्यूहे च" इति हैमः । सा चमूः ययौ । रथानीकमिति पाठे इतिशब्दाध्याहारेण योज्यम् ॥ ३० ॥

मरुपृष्ठानीति । स रघुः शक्तिमत्त्वात् समर्थत्वात् मरुपृष्ठानि निर्जलस्थानानि । "समानौ मरुधन्वानौ" इत्यमरः । उदग्भांसि

पथिकीगणसंघाष्टि. । यस्येदं दैवयजनमदृश्यं विसृजतः । प्राचीनाग्रैः कुशैस्तीर्णा भूतधात्रस्तम् । " इति भागवतम् ।

(१) "अनूपा अग्रजनवार्ता प्रताप" इति मल्लिनाथः ।

विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार(१) सः ॥२१॥
स सेनां महतीं कर्षन् पूर्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां(२) गङ्गामिव भगीरथः ॥२२॥
त्याजितैः फलमुत्खातैः भग्नैश्च बहुधा नृपैः ।

उद्भूतजलानि चकार, नाव्याः नौभिः तार्य्याः नदीः । "नाव्यं त्रिलिङ्गं नौतार्ये" इत्यमरः । नौवयोधर्म्म विषमूलेत्यादिना यत्प्रत्ययः । सुप्रतराः सुखेन तार्य्याः चकार, विपिनानि अरण्यानि । "अटव्यरण्यं विपिनम्" इत्यमरः । प्रकाशानि निर्द्वाणि च चकार । शक्तिमत्कर्षात् तस्यागम्यं किमपि नासीत् इति भावः ॥ २१ ॥

स इति । महतीं सेनां पूर्वं सागरगामिनीं कर्षन् सः रघुः हरस्य जटाभ्यः भ्रष्टां गङ्गां कर्षन् । सापि पूर्वसागरगामिनी । भगीरथः इव बभौ । भगीरथो नाम कश्चित् कपिलदग्धानां सागराणां नप्ता तत्पावनाय हरकिरीटात् गङ्गाप्रवर्त्तयिता राजा यत्सम्बन्धाद्गङ्गा च भागीरथीति गीयते ॥२२॥

त्याजितैरिति । "फलं फले धने बीजे निष्पत्तौ भोगलाभयोः" इति केशवः । फलं लाभं वृक्षपक्षे प्रसवञ्च त्याजितैः ।

(1) Commenting on the word शक्तिमत्त्वात्, Sankara says that "by means of his supernatural powers; *i e* without having had to use human efforts such as *digging out wells, building bridges &c*" It is not necessary, however, to put such a forced construction on that expression.

(2) A certain part of the Himalaya higher up than Hardwar still goes by the name of Harajata.

तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः ॥ ३३ ॥
पौरस्त्यानेवमाक्रामन् तांस्तान् जनपदान् जयी।
प्राप तालीवनश्यामम् उपकण्ठं महोदधेः ॥ ३४ ॥
अनम्राणां समुद्धर्तुः तस्मात् सिन्धुरयादिव।
आत्मा संरक्षितः सुह्मैः(१) वृत्तिमाश्रित्य वेतसीम् ॥३५

त्यजेर्ण्यन्तात् क्विकर्मकात् अप्रधाने कर्म्मणि क्तः। उत्खातैः स्वपदात् च्यावितैः अन्यत्र उत्पाटितैः बहुधा मग्नैः रणे जितैः अन्यत्र छिन्नैः नृपैः पादपैः दन्तिनः गजस्य इव तस्य रघोः मार्गः उल्बणः प्रकाशः आसीत्। "प्रकाशं प्रकटं स्पष्टम् उल्बणं विशदं स्फुटम्" इति यादवः ॥ ३३ ॥

पौरस्त्यानिति। जयी जयनशीलः। जिदक्षिविश्रीत्यादिना इनिप्रत्ययः। स रघुः एवं पुरः भवान् पौरस्त्यान् प्राच्यान्। "दक्षिणापश्चात्पुरसस्त्यक्" इति त्यक्प्रत्ययः। तान् तान् सर्व्वान् इत्यर्थः। वीप्सायां द्विरुक्तिः। जनपदान् देशान् आक्रामन् तालीवनैः श्यामं महोदधेः उपकण्ठम् अन्तिकं प्राप ॥३४॥

अनम्राणामिति। अनम्राणाणाम्। कर्म्मणि षष्ठी। समुद्धर्तुः उन्मूलयितुः तस्मात् रघोः सकाशात्। "भीत्रार्थानां भयहेतुः" इत्यपादानत्वात् पञ्चमी सिन्धुरयात् नदीवेगात् इव सुह्मैः

(१) सुह्मैः सुह्मदेशीयैः राजभिरिति यावत्। The country of the Suhmas would seem to correspond to the modern Tripura and Aracan

वङ्गानुत्खाय(१) तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान् गङ्गास्रोतोऽन्तरेषु सः ॥३६॥
आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्द्धयामासुः उत्खातप्रतिरोपिताः ॥ ३७ ॥

सुह्मदेशीयैः । सुह्मादयः शब्दाः जनपदवचनाः चक्षियमाचक्षते । वैतसीं वेतसः सम्बन्धिनीं वृत्तिं प्रणतिम् इत्यर्थः आश्रित्य आत्मा संरक्षितः । अत्र कौटिल्यः, "वलीवसाभियुक्तो दुर्बलः सर्वत्रानुप्रणतो वैतसं धर्ममातिष्ठेत" इति ॥ ३५ ॥

वङ्गानिति । नेता नायकः सः रघुः नौभिः साधनैः उद्यतान् सन्नद्धान् वङ्गान् राज्ञः तरसा बलेन । "तरसी बलरंहसी" इति यादवः । उत्खाय उन्मूल्य गङ्गायाः स्रोतसां प्रवाहाणाम् अन्तरेषु द्वीपेषु जयस्तम्भान् निचखान स्थापितवान् इत्यर्थः ॥ ३६ ॥

आपादेति । आपादपद्मम् अङ्घ्रिपद्मपर्य्यन्तं प्रणताः अत एव उत्खाताः पूर्वमुद्धृताः अपि प्रतिरोपिताः पश्चात् स्थापिताः ते वङ्गाः कलमाः इव शालिविशेषाः इव । "शालयः कलमाद्याय षष्टिकाद्याय पुंस्यमी" इत्यमरः । तेऽपि आपादपद्मं पादपद्ममूलपर्य्यन्तं प्रणताः । "पादो बुध्नतुरीयांशगोत्रमूलान्तपर्वताः" इति विश्वः । उत्खातप्रतिरोपिताश्च । रघुं फलैः धनैः अन्यच्च गव्यैः संवर्द्धयामासुः । "फलं फले धने बीजे निष्पत्तौ भोगलाभयोः । गव्ये" इति केशवः ॥ ३७ ॥

(1) (वङ्ग) means here the people of East Bengal.

स तीर्त्वा कपिशां(१) सैन्यैः वज्रद्विरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ॥ ३८ ॥
स प्रतापं महेन्द्रस्य(२) मूर्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः ॥ ३९ ॥

स इति । स रघुः वज्राः द्विरदाः एव सेतवः यैः तैः सैन्यैः कपिशां नाम नदीम् । करभाम् इति केचित् पठन्ति । तीर्त्वा उत्कलैः राजभिः आदर्शितपथः सन्दर्शितमार्गः सन् कलिङ्गाभिमुखः ययौ ॥ ३८ ॥

स इति । स रघुः महेन्द्रस्य कुलपर्वतविशेषस्य । "महेन्द्रो मलयः सह्यः शक्तिमान् ऋक्षपर्वतः । विन्ध्यश्च पारिपात्रश्च सप्तैते कुलपर्वताः" ॥ इति विष्णुपुराणात् । मूर्ध्नि तीक्ष्णं दुःसहं प्रतापं यन्ता सारथिः गम्भीरवेदिनः द्विरदस्य गजविशेषस्य मूर्ध्नि तीक्ष्णं निशितम् अङ्कुशम् इव न्यवेशयत् निक्षिप्तवान् । "खभेदाच्छोणितस्रावात् मांसस्य क्वथनादपि, आत्मानं यो न जानाति स स्याद्गम्भीरवेदिता ॥" इति राजपुत्रीये । "विर-

(1) The Kapisa may be identical with the Suvarnarekha, Kalinga may correspond with the Northern Sircars of the present day. Professor Wilson says Kalinga is the sea-coast west of the mouths of the Ganges, with the upper part of the Coromandal Coast.

(2) Mahendra is probably the name of that chain of hills that extends from Orissa and the northern Sircars to Gondowana, part of which near Ganjam, is still called Mahindra mo Dei, or hills of Mahendra. See V. P. II, 3.1

प्रतिजग्राह कालिङ्गः तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥ ४० ॥
द्विषां विपक्षः काकुत्स्थः तव नाराचदुर्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् (१) ॥४१॥
ताम्बूलीनां दलैस्तव(२) रचितापानभूमयः ।
नारिकेलासवं योधाः शाववच्च पपुर्यशः ॥ ४२ ॥

कालेन यो वेत्ति गिरां परिचितामपि । गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिः ॥" इति मृगयाधर्म्मीये ॥ ३९ ॥

प्रतीति । गजसाधनः सन् कालिङ्गः कलिङ्गानां राजा । तत्र भवः मगधकलिङ्गेत्यादिना अण्प्रत्ययः अस्त्रैः आयुधैः तं रघुं पक्षाणां छेदे उद्यतम् उद्युक्तं शक्रं शिलावर्षी पर्व्वतः इव प्रतिजग्राह प्रत्यभियुक्तवान् ॥ ४० ॥

द्विषामिति । काकुत्स्थः रघुः तव महेन्द्राद्रौ द्विषां नाराचदुर्दिनं नाराचानां बाणविशेषाणां दुर्दिनं सघनया वर्षमुच्यते, विपक्षं सहित्वा सत् यथागात्तं मङ्गलस्नातः इव विजयमङ्गलार्थम् अभिषिक्तः इव जयश्रियं प्रतिपेदे प्राप । "यत्तु सर्व्वौषधिस्नानं तन्माङ्गल्यमुदीरितम्" इति यादवः ॥४१॥

ताम्बूलीनामिति । तव महेन्द्राद्रौ, युध्यन्ते इति योधाः । पक्षाद्यच् । रचिताः कल्पिताः आपानभूमयः पानयोग्यप्रदेशाः

(१) रिपुमरणंजरकालस्तं रघुरीत् व्यजेष्ट इत्यर्थः इति दिनकरः ।
(२) ताम्बूलीनां दलैः पत्रैः रचिता निर्मिता पाठिता इति दायत् पानभूमयः इति भरतः ।

गृहीतप्रतिमुक्तस्य स धर्म्मविजयी (१)नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥४३॥
ततो वेलातटेनैव फलवत्पूगमालिना ।
अगस्त्याचरितामाशाम् अनाशास्यजयो ययौ ॥४४॥

यैः ते तथोक्ताः सन्तः नारिकेलासवं नारिकेलमद्यं ताम्बूलीनां नागवल्लीनां दलैः पपुः तत्र विजक्षुः इत्यर्थः शावं यद्यथ पपुः जक्षुः इत्यर्थः ॥ ४२ ॥

गृहीतेति । धर्म्मविजयी धर्म्मार्थं विजयशीलः सः नृपः रघुः गृहीतश्चासौ प्रतिमुक्तः तस्य महेन्द्रनाथस्य कालिङ्गस्य श्रियं जहार धर्म्मार्थम् इति भावः । मेदिनीं तु न जहार शरणागतवात्सल्यात् इति भावः ॥ ४३ ॥

तत इति । ततः प्राचीविजयानन्तरं फलवत्पूगमालिना फलितक्रमुकश्रेणीमता । व्रीह्यादित्वात् इनिप्रत्ययः । वेलायाः समुद्रकूलस्य तटेन उपान्तेनैव अगस्त्येन आचरिताम् आशां दक्षिणां दिशम् अनाशास्यजयः अयत्नसिद्धत्वात् अप्रार्थनीयजयः सन् ययौ । "अगस्त्यो दक्षिणामाशाम् आश्रित्य नभसि स्थितः । वरुणस्यात्मजो योगी विन्ध्यवातापिमर्दनः" ॥ इति ब्रह्मपुराणे ॥ ४४ ॥

---

(१) "धर्म्मविजयी लोभविजयी असुरविजयी चेति त्रिविधो राजा । यः प्रभूतं निखिलं मदीयं श्रियं मेदिनीं च गृहीत्वा प्रभूतं तत्प्रतिदानेन त्यागेन व्यापयति स धर्म्मविजयी । यः प्रभूतं निखिलं मदीयं श्रियं मेदिनीं च गृहीत्वा प्राणैः सह विकृष्टो लोभविजयी । यः प्रभूतं हत्वा मदीयं श्रियं मेदिनीं च गृह्णाति स असुरविजयी" इति वल्लभः ।

स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत् ॥४५॥
बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः ।
मारीचोद्भ्रान्तहारीताः मलयाद्रेरुपत्यकाः ॥४६॥

स इति । स रघुः गजानां दानेन मदेन सुगन्धिना सुरभिगन्धिना । गन्धस्येत्यादिना इकारादेशः समासान्तः । यद्यपि गन्धस्येत इदेकान्तग्रहणं कर्त्तव्यमिति नैसर्गिकगन्धविवक्षायामेवेकारादेशस्तथापि निरङ्कुशाः कवयः । तथा माघकाव्ये "ववुरयुक्तदृगुच्छसुगन्धयः सततगास्ततगानगिरोऽलिभिः", नैषधे च "अपां हि लक्षाय न वारिधारा, स्वादुः सुगन्धिः स्वदते तुषारा" इति । न कर्मधारयान्मत्वर्थीय इति निषेधादिनिप्रत्ययपक्षोऽपि जघन्य एव । सेनायां समवेताः सैन्याः । "सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते" इत्यमरः । सेनाया वेति ष्यञ्प्रत्ययः । तेषां परिभोगेण कावेरीं नाम सरितं सरितां पत्युः समुद्रस्य शङ्कनीयां अविश्वसनीयामिव अकरोत् । सम्भोगलिङ्गदर्शनाद्भर्तुरविश्वासो भवति इति भावः ॥ ४५ ॥

बलैरिति । विजिगीषोः विजेतुमिच्छोः गताध्वनः तस्य रघोः बलैः सैन्यैः । "बलं शक्तिर्बलं सैन्यम्" इति यादवः । मारीचेषु मरीचवनेषु उद्भ्रान्ताः परिभ्रान्ताः हारीताः पक्षिविशेषाः यासु ताः । "तेषां विशेषा हारीतो भृङ्गः कारण्डवः प्लवः" इत्यमरः । मलयाद्रेः उपत्यकाः आसन्नभूमयः । "उप-

ससञ्जुरश्वक्षुण्णानाम् एलानामुत्पतिष्णवः ।
तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः ॥ ४७ ॥
भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ।
नास्रसत् करिणां यैवं विपदीच्छेदिनामपि(१) ॥४८॥

त्यकाद्देरासन्ना भूमिरुद्भूमधित्यका" इत्यमरः । "उपाधिभ्यां त्यकन्" इत्यादिना त्यकन्प्रत्ययः । अध्युषिताः, उपत्यकासु उषितम् इत्यर्थः । "उपान्वध्याङ्वसः" इति कर्मत्वम् ॥ ४६ ॥

ससञ्जुरिति । अश्वैः क्षुण्णानाम् एलानाम् एलालतानाम् उत्पतिष्णवः उत्पतनशीलाः । अलं क्षमित्यादिना ष्णुच्प्रत्ययः । फलरेणवः फलरजांसि तुल्यगन्धेषु समानगन्धिषु । सर्वधनीति वदिच्छन्तो बहुव्रीहिः । मत्तेभानां कटेषु ससञ्जुः सक्ताः । "गजगण्डे कटीकटौ" इति कोषः ॥ ४७ ॥

भोगीति । चन्दनानां चन्दनद्रुमाणां भोगिवेष्टनमार्गेषु सर्पवेष्टनात् निम्नेषु समर्पितं सञ्चितं विपदीच्छेदिनां पादगृङ्खलच्छेदकानाम् अपि । "विपदी पादबन्धनम्" इति यादवः । करिणां यैवं कण्ठबन्धनम् । "ग्रीवाभ्योऽण् च" इति अण्प्रत्ययः । नास्रसत् न स्रस्तमभूत् । स्रंसु ध्वंसु इति परस्मैपदे पुषादित्वात् अङ्, "अनिदितां" इति नकारलोपः ॥ ४८ ॥

---

(१) "विपदी विद्मीति विपदीच्छेदिनमेषां सुधाकरस्वामिनामपि । इत्या बन्धितस्य गजस्य पदबन्धरज्जुं विपदीमुच्यते" इति मल्लिः ।

दिशि मन्दायते तेजः दक्षिणस्यां रवेरपि।
तस्यामेव रघोः पाण्ड्याः प्रतापं(१)न विषेहिरे ॥४९॥
ताम्रपर्णीसमेतस्य(२) मुक्तासारं महोदधेः।
ते निपत्य ददुस्तस्मै यशः स्वमिव सञ्चितम् ॥५०॥

दिशीति। दक्षिणस्यां दिशि रवेः अपि तेजः मन्दायते मन्दं भवति। लोहितादिलात् क्यप्प्रत्ययः, "वा क्यषः" इत्वाभावः। अनेपदम्। दक्षिणायने तेजोमान्द्यात् इति भावः, तस्याम् एव दिशि पाण्ड्याः पाण्डूनां जनपदानां राजानः पाण्ड्याः। पाण्डोर्ढ्यण् वक्तव्यः। रघोः प्रतापं न विषेहिरे न सोढवन्तः। सूर्यविजयिनोऽपि विजितवानिति नायकस्य महानुत्कर्षो गम्यते ॥ ४९ ॥

ताम्रपर्णीति। ते पाण्ड्याः ताम्रपर्णी नद्या समेतस्य सङ्गतस्य महोदधेः सम्बन्धि सञ्चितं मुक्तासारं मौक्तिकवरम्। "सारो बले स्थिरांशे च न्याय्ये क्लीवं वरे त्रिषु" इत्यमरः। स्वं स्वकीयं सञ्चितं यशः इव तस्मै रघवे निपत्य प्रणिपत्य ददुः।

(1) The country of the Pandyas lies to the east of Travancore and is identical with the present districts of Dindigal and Tinnivelly.

(2) Though noted for its pearls, it is a small rivulet flowing past Pallamcotta and falling into the gulf of Mannar. It is at the southern extremity of the Western Ghats, in the district of Tinnevelly. The Cael of Marco Polo, the most important city and seapor' on the eastern coast of India during the Middle Ages, is identified as Kayal at the mouth of the Tamraparni. Another important city Korkei stands on this river. The

स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ(१) ॥५१॥
असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता ।
नितम्बमिव मेदिन्याः सस्तांशुकमलङ्घयत् ॥ ५२ ॥

यशसः शुभ्रत्वादौपम्यम् । ताम्रपर्णीसङ्गमे मौक्तिकोत्पत्तिरिति प्रसिद्धम् ॥ ५० ॥

स इति । असह्येति च । युग्ममेतत् । असह्यविक्रमः स रघुः तटेषु सानुषु आलीनचन्दनौ व्याप्तचन्दनद्रुमौ । "गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्" इत्यमरः । स्तनपक्षे प्रान्तेषु व्याप्तचन्दनानुलेपौ तस्याः दक्षिणस्याः दिशः स्तनौ इव स्थितौ मलयदर्दुरौ नाम शैलौ यथाकामं यथेच्छं निर्विश्य उपभुज्य । "निर्वेशो भृतिभोगयोः" इत्यमरः । उदकानि अस्य सन्तीति उदन्वान् उदधिः । "उदन्वानुदधौ च" इति निपातः । उदन्वता दूरात् मुक्तं दूरतः त्यक्तम् । "स्तोकान्तिकदूरार्थकृच्छ्राणि क्त्रौ" इति समासः । "पञ्चम्याः स्तोकादिभ्यः" इत्यसुक् । सस्तांशुकं मेदिन्याः नितम्बम् इव स्थितं सह्यं सह्याद्रिम् असङ्घयत् प्रायः अतिक्रान्तो वा ॥ ५१ ॥ ५२ ॥

Greeks called it Kolkhoy, and came to it to purchase pearls, certainly soon after the Christian era. To this Korkei, all native traditions pointed as the cradle of South Indian civilization the place where the three brothers Cheran, Cholan, and Pandyan were said to have been born and brought up, and *from* whence they set forth to dynasties and kingdoms—or, as might more readily be admitted, the place where the rule of the Pandyas commenced and from whence they afterwards migrated to Madura.

(१) मलय is a chain of hills reckoned as one of the Kulachalas and is the southern portion of the Western Ghats.

तस्यानीकैर्विसर्पद्भिः अपरान्तजयोद्यतैः (१)।
रामास्त्रोत्सारितोऽप्यासीत्(२)सह्यलग्नइवार्णवः॥५३
भयोत्सृष्टविभूषाणां तेन केरलयोषिताम्(३)।
अलकेषु चमूरेणुः चूर्णप्रतिनिधीकृतः॥ ५४॥
मुरलामारुतोद्धूतम् अगमत् कैतकं रजः।

सम्प्रति प्रतीचीं दिशमभिययाविलाह, तस्येति। अपरान्तानां पाश्चात्यानां जये उद्यतैः उद्युक्तैः। "अपरान्तास्तु पाश्चात्याः ते च सूर्पारिकादयः" इति यादवः। विसर्पद्भिः गच्छद्भिः तस्य रघोः अनीकैः सैन्यैः। "अनीकं तु रणे सैन्ये" इति विश्वः। अर्णवः रामस्य जामदग्न्यस्य अस्त्रैः उत्सारितः परिसारितः अपि सह्यलग्नः इव आसीत्। सैन्यं द्वितीयोऽर्णव इव अदृश्यत इति भावः॥ ५३॥

भयेति। तेन रघुणा भयेन उत्सृष्टविभूषाणां परित्यक्तभूषणानां केरलयोषितां केरलाङ्गनानाम् अलकेषु चमूरेणुः सेनारजः चूर्णस्य कुङ्कुमादिरजसः प्रतिनिधीकृतः। एतेन योषितां पलायनं चमूनाञ्च तदनुधावनं ध्वनितं॥ ५४॥

मुरलेति। मुरला नाम केरलदेशेषु काचित् नदी। मुरवीति केचित् पठन्ति। तस्याः मारुतेन उद्धूतम् उत्थापितं

(१) "अपरान्ताः कोङ्कणाः" इति वल्लभः।

(२) Sahya is also a Kulachala identical with the northern portion of the western Ghats.

(3) "Kerala was the ancient name of the whole tract comprising the districts of Canara, Cochin and Travancore."

तद्योधवारवाणानाम् अयत्नपटवासताम्(१) ॥५५॥
अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः।
वर्म्मभिः पवनोद्धूतराजतालीवनध्वनिः ॥ ५६ ॥
खर्ज्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ॥५७॥

केतकं केतकसम्बन्धि रजः तद्योधवारवाणानां रघुभटकञ्चुकानाम्। "कञ्चुको वारवाणोऽस्त्री" इत्यमरः। अयत्नपटवासताम् अयत्नसिद्धवस्त्रवासनाद्रव्यत्वम् अगमत्। "पिष्टातः पटवासकः" इत्यमरः ॥ ५५ ॥

अभ्यभूयतेति। चरतां गच्छतां वाहानां वाजिनाम्। "वाजिवाहार्व्वगन्धर्व्वहयसैन्धवसप्तयः" इत्यमरः। गात्रशिञ्जितैः गात्रेषु शब्दायमानैः। कर्त्तरि क्तः। सञ्जितैरिति वा पाठः। सृजतेर्ण्यन्तात् कर्म्मणि क्तः। वर्म्मभिः कवचैः पवनेन उद्भूतानां कम्पितानां राजतालीवनानां ध्वनिः अभ्यभूयत तिरस्कृतः। मर्म्मर इति पाठे वाहानां गात्रशिञ्जितैः गात्रध्वनिभिः इत्यर्थः मर्मरः मरमरायमाणः इति ध्वनेर्विशेषणम्॥५६॥

खर्ज्जूरीति। खर्जूरीणां तृणद्रुमविशेषाणाम्। "खर्ज्जूरः केतकी तालो खर्ज्जूरी च तृणद्रुमाः" इत्यमरः। स्कन्धेषु प्रकाण्डेषु। "यष्टौ प्रकाण्डः स्कन्धः स्यात् मूलाच्छाखाद्यवेस्तरोः" इत्यमरः। नद्धानां बद्धानां करिणां मदोद्गारेण मदस्रावेण

(१) "मणयोऽपक्वभावैः मूलैश्चाङ्गैश्च संयुताः। पटवासः प्रवरोऽयं वरकञ्चुकयोगिनः", इति वराहः।

अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ।
अपरान्तमहीपालव्याजेन रघवे करम् ॥ ५८ ॥
मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम्।
त्रिकूटमेव(१)तयोच्चैः जयस्तम्भं चकार सः ॥५९॥

सुगन्धिषु। गन्धस्येत्यादिना इकारः। कटेषु गण्डेषु पुन्नागेभ्यः नागकेसरेभ्यः पुन्नागपुष्पाणि विहाय। ल्यब्लोपे पञ्चमी। अलिवाणौ अलयः पेतुः। "अलिवाणौ अलिमुखौ" इत्यमरः। ततोऽपि सौगन्ध्यातिशयात् इति भावः ॥ ५७ ॥

अवकाशमिति। उदन्वान् उदधिः रामाय जामदग्न्याय अभ्यर्थितः याचितः सन् अवकाशं स्थानं ददौ, किलेति प्रसिद्धौ। रघवे तु अपरान्तमहीपालव्याजेन करं बलिं ददौ। "बलिहस्तांशवः कराः" इत्यमरः। अपरान्तानां समुद्रमध्यदेशवर्त्तित्वात् तैर्दत्ते करे समुद्रदत्तत्वोपचारः। करदानञ्च भीत्या न तु याञ्चयेति रामाद्रघोरुत्कर्षः ॥ ५८ ॥

मत्तेति। तत्र स रघुः मत्तानाम् इभानां रदनोत्कीर्णानि दन्तक्षतानि एव। भावे क्तः। व्यक्तानि स्फुटानि विक्रमलक्षणानि पराक्रमचिह्नानि विजयवर्णावलिस्थानानि यस्मिन् तं तयोक्तं त्रिकूटम् एव उच्चैः जयस्तम्भं चकार। गाढ़प्रकाशस्त्रिकूटोऽद्रिरेवोत्कीर्णवर्णस्तम्भ इव रघोर्जयस्तम्भोऽभूत् इत्यर्थः ॥ ५९ ॥

---

(1) There were several hills known as Trikuta or "Three-peaked." That which is referred to here is probably a hill in Northern Konkan. It is called त्रिकूट by पद्म।

पारसीकांस्ततो(१) जेतुं प्रतस्थे स्थलवर्त्मना ।
इन्द्रियाख्यानिव रिपून् तत्त्वज्ञानेन संयमी ॥६०॥
यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाज्ञानाम् अकालजलदोदयः ॥६१॥

पारसीकानिति । ततः स रघुः संयमी योगी तत्त्वज्ञानेन इन्द्रियाख्यान् इन्द्रियनामकान् रिपून् इव पारसीकान् राज्ञः जेतुं स्थलवर्त्मना प्रतस्थे न तु निर्दिष्टेनापि जलपथेन समुद्र-यानस्य निषिद्धत्वात् (२) इति भावः ॥ ६० ॥

यवनीति । सः रघुः यवनीनां यवनस्त्रीणाम् । जातिरस्त्री-विषयादयोपधादिति ङीप् । मुखानि पद्मानि इव मुख-पद्मानि । उपमितसमासः । तेषां मधुना मद्येन यः मदः मद-रागः । कार्यकारणभावयोरभेदेन निर्देशः । तं न सेहे । कमिव अकाले प्रावृड्व्यतिरिक्ते काले जलदोदयः प्रायेण

(1) The country beyond the western frontiers of India was formerly called Persia of Pars or Fars. The people of Pars are called Parasikas or Paratakas and the word Paradas is used in the Pauranic lists, to represent people, who live beyond the Indus. The Paradas figure as a northern people in the Bengal Recension of the Ramayana. See V. P. vol II. page 183.

(२) कस्मै एव समुद्रयानस्य निषिद्धत्वं, मनु वेतायामिति टीकाकारीयं द्रष्टव्यम्। यदुक्तं ब्रह्मवैवर्ते—"समुद्रयानस्वीकारः कमण्डलुविधारणं। द्विजानामसवर्णासु कन्योपयमनक्रिया। देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्वधः। इतायार्थे वकन्याया पुनर्दानं परन्तप। दीर्घकालं ब्रह्मचर्यं गवालम्भनमेधकौ। महाप्रस्थानगमनं गोमेधश्च तथा मखः। इमान् धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः"॥

संग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः ।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥ ६२ ॥
भल्लापवर्जितैस्तेषां गिरीभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स चौद्रपटलैरिव ॥ ६२ ॥

राहपि पद्मविकाग्रस्याप्रसक्तत्वात् अज्ञानां सम्बन्धिनं बालातपम् इव(२) । अनहितत्वादज्ञसम्बन्धित्वं सौरातपस्य ॥ ६१ ॥

संग्राम इति । तस्य रघोः अश्वसाधनैः वाजिसैन्यैः, "साधनं सिद्धिसैन्ययोः" इति हैमः । पश्चाद्भवैः पाश्चात्यैः यवनैः सह । "दक्षिणापश्चात्पुरसस्त्यक्" । सहार्थे तृतीया । शृङ्गाणां विकाराः शार्ङ्गाणि धनूंषि तेषां कूजितैः शब्दैः । "शार्ङ्गं पुनर्धनुषि शार्ङ्गिणः, जये च शृङ्गविहिते चापेऽप्याह विशेषतः" इति केशवः । अथवा शार्ङ्गैः शृङ्गसम्बन्धिभिः कूजितैः विज्ञेयाः अनुमेयाः प्रतियोधाः प्रतिभटाः यस्मिन् तस्मिन् रजसि तुमुलः संग्रामः सङ्कुलम् युद्धम् अभूत् । "तुमुलं रणसङ्कुले" इत्यमरः ॥ ६२ ॥

भल्लेति । सः रघुः भल्लापवर्जितैः बाणविशेषयुक्तैः । "क्षुद्रीदलफलो भल्लः" इति यादवः । श्मश्रुलैः प्रहृद्मुखरोमवद्भिः । सिध्मादित्वात् लच्प्रत्ययः । तेषां पाश्चात्यानां गिरीभिः, सरघाभिः मधुमक्षिकाभिः व्याप्तैः । "सरघा मधुमक्षिकाः" इत्यमरः । क्षुद्राः सरघाः । "क्षुद्रा व्यङ्गा नटी वेश्या सरघा

(२) बालातपपक्षपातात् तद्भिन्नानामज्ञानां सौहित्येन मधुपानासक्तयवनौष्ठसदृशत्वस्य साम्यं दृश्यते ।

अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ।
प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ॥६४॥
विनयन्ते स्म तद्योधाः मधुभिर्विजयश्रमम् ।
आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु(१) ॥६५॥

कण्ठकारिका" इत्यमरश्रुतौ । क्षुद्राभिः क्षतानि क्षौद्राणि मधूनि । "मधु क्षौद्रं माक्षिकादि" इत्यमरः । "क्षुद्राभ्रमरवटर-पादपादंश" इति संज्ञायामञ् प्रत्ययः । तेषां पटलैः सञ्चयैः इव । "पटलं तिलके नेत्ररोगे छन्दसि सञ्चये । पटिके परिवारे च" इति हैमः । महीं तस्तार आच्छादयामास ॥ ६३ ॥

अपनीतेति । शेषाः हतावशिष्टाः अपनीतशिरस्त्राणाः अपसारितशीर्षरक्षाः सन्तः । "शीर्षकं शीर्षरक्षश्च शिरस्त्रे" इत्यमरः । शरणागतलक्षणमेतत् । तं रघुं शरणं ययुः, तथाहि महात्मनां संरम्भः कोपः । "संरम्भः सम्भ्रमे कोपे" इति विश्वः । प्रणिपातः प्रणतिरेव प्रतीकारः यस्य सः । महतां परकीयमौद्धत्यमेवासह्यं न तु जीवितम् इति भावः ॥ ६४ ॥

विनयन्त इति । तस्य रघोः योधाः भटाः आस्तीर्णानि अजिनरत्नानि चर्मश्रेष्ठानि यासु तासु द्राक्षावलयानां भूमिषु "मृद्वीका गोस्तनी द्राक्षा स्वादी मधुरसेति च" इत्यमरः मधुभिः द्राक्षाफलप्रकृतिकैर्मद्यैः विजयश्रमं युद्धखेदं विनयन्ते

(1) The vine is grown in Kabul. Hence it seems not improbable, that Kabul was formerly included within the limits of ancient Persia.

ततः प्रतस्थे कौवेरीं भास्वानिव रघुर्दिशम्।
शरैरुत्तरकायेव उदीच्यान् उद्धरिष्यन् रसानिव ॥ ६६ ॥
विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः।
दुधुवुर्वाजिनः स्कन्धान् लग्नकुङ्कुमकेसरान् ॥६७॥

अ अपनीतवन्तः। "कर्तृस्थे चाशरीरे कर्म्मणि" इत्याश्रनेपदं, "लटः स्मे" इति भूतार्थे लट् ॥ ६५ ॥

तत इति। ततः रघुः भास्वान् सूर्यः इव शरैः बाणैः उत्तरैः किरणैः इव। "किरणोत्तमयूखांशुगभस्तिहरिदश्मयः" इत्यमरः। उदीच्यान् उदग्भवान् नृपान् रसान् उदकानि इव उद्धरिष्यन् कौवेरीं कुबेरसम्बन्धिनीं (कुबेरगुप्तां) दिशम् उदीचीं प्रतस्थे। अनेकेनैवशब्देनेयमुपमा यथाह दण्डी, "एकानेकैवशब्दत्वात् सा वाक्यार्थोपमा द्विधा" इति ॥ ६६ ॥

विनीतेति। सिन्धुर्नाम काश्मीरदेशेषु कश्चिन्नदविशेषः। "देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः। सिन्धोः तीरे विचेष्टनैः अङ्गपरिवर्त्तनैः विनीताध्वश्रमाः तस्य "रघोः वाजिनः अश्वाः लग्नाः कुङ्कुमकेसराः कुङ्कुमकुसुमकिञ्जल्काः येषां तान्, यद्वा लग्नकुङ्कुमाः केसराः सटाः येषां तान्। "अथ कुङ्कुमं काश्मीरजन्म" इत्यमरः। "केसरी नागकेसरे, तुरङ्गसिंहयोः स्कन्धकेशेषु महत्तरुभे। पुन्नागवृक्षे किञ्जल्के स्यात्" इति हेमः। स्कन्धान् कायान्। "स्कन्धः प्रकाण्डे कायांशे विभागादिषु पञ्चसु। नृपे समूहे व्यूहे च" इति हेमः। दुधुवुः कम्पयन्ति स्म ॥ ६७ ॥

तत्र हूणावरोधानां (१)भर्तृषु व्यक्तविक्रमम्।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ॥ ६८ ॥
काम्बोजाः(२) समरे सोढुं तस्य वीर्य्यं मनीश्वराः।
गजालानपरिक्लिष्टैः रत्नोटैः(३)सार्द्धं मानताः ॥६९॥

तत्रेति। तत्र उदीच्यां दिशि भर्तृषु व्यक्तविक्रमं भर्तृबन्धेन स्फुटपराक्रमम् इत्यर्थः रघुचेष्टितं रघुव्यापारः हूणाः जनपदाख्याः क्षत्रियाः तेषाम् अवरोधाः अन्तःपुरस्त्रियः, तासां कपोलेषु पाटलस्य पाटलिम्नः ताड़नादिकृतारुण्यस्य आदेशि उपदेशकं बभूव। अथवा पाटलः आदेशो आदेशः यस्य तत् बभूव स्वयं लेख्यापयत इत्यर्थः (४) ॥ ६८ ॥

काम्बोजा इति। काम्बोजाः राजानः समरे तस्य रघोः वीर्य्यं प्रभावं। "वीर्य्यं तेजःप्रभावयोः" इति हैमः। सोढुम् अमनीश्वराः अशक्ताः सन्तः गजानाम् आलानं बन्धनम्। भावे

(1) Sankara Pandit understands by Hunas the white Huns or Indo Scythians, who settled down in the Punjab and along the Indus at the commencement of the Christian era, forgetting apparently, that the expendition of Raghu occurred many centuries earlier. The coincidence of appellation may be merely accidental See note V P II. 3.

(2) The country of the Kambojas was in the northwestern corner of India. It must have been a hilly elevated tract of land, otherwise that kind of walnut, called रत्नोट from which the Bengali word আক্‌রোট is corrupted, could not have grown there.

तेषां सदश्वभूयिष्ठाः तुङ्गा द्रविणराशयः ।
उपदा विविशुः शश्वत् नोत्सेकाः कोशलेश्वरम् ॥७०॥
ततो गौरीगुरुं शैलम् आरुरोहाश्वसाधनः ।
वर्धयन्निव तत्कूटान् उद्धूतैर्धातुरेणुभिः ॥ ७१ ॥
शशंस तुल्यसत्वानां सैन्यघोषेऽप्यसम्भ्रमम् ।

स्फुटि विभाषा लीयतेरित्वात्वम् । तेन परिक्लिष्टैः परिचतैः अचोटैः हचविशेषैः सार्धम् आनताः ॥ ६९ ॥

तेषामिति । तेषां काम्बोजानां सद्भिः अश्वैः भूयिष्ठाः बहुलाः तुङ्गाः द्रविणानां हिरण्यानाम् । "हिरण्यं द्रविणं युग्मम्" इत्यमरः । राशयः एव उपदाः उपायनानि । "उपायनमुपयाच्ञमुपहारस्तथोपदा" इत्यमरः । कोशलेश्वरं कोशलदेशाधिपतिं तं रघुं शश्वत् असकृत् विविशुः । "मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत् समाः" इत्यमरः । तथापि उत्सेकाः गर्वास्तु न विविशुः सत्यपि गर्वकारणे न जगर्व्व इत्यर्थः ॥ ७० ॥

तत इति । ततः अनन्तरम् अश्वसाधनः सन् गौर्य्याः गुरुं पितरं शैलं हिमवन्तम् उद्धूतैः अश्वखुरोद्धूतैः धातूनां गैरिकादीनां रेणुभिः तत्कूटान् तस्य शृङ्गाणि । "कूटोऽस्त्री शिखरं शृङ्गम्" इत्यमरः । वर्धयन् इव आरुरोह । उत्पतद्भूलिदर्शनादिरिगिरुरहिम्नो जायत इति भावः ॥ ७१ ॥

शशंसेति । तुल्यसत्वानां सैन्यैः समानबलानां गुहासु शेरते इति गुहाशयाः तेषाम् । "अधिकरणे शेतेः" इत्यचप्रत्ययः ।

गुहाशयानां सिंहानां परिवृत्यावलोकितम्(१) ॥७२॥
भूर्जेषु मर्म्मरीभूताः कीचकध्वनिहेतवः ।
गङ्गास्रोतःकरिणो मार्गे मरुतस्तं सिषेविरे ॥ ७३ ॥

"दरी तु कन्दरो वा स्त्री देवखातबिले गुहा" इत्यमरः। सिंहानां हरीणाम्। "सिंहो मृगेन्द्रः पञ्चास्यो हर्य्यक्षः केशरी हरिः" इत्यमरः। सम्बन्धि परिवृत्य परावृत्य अवलोकितं शयित्वैव ग्रीवाभङ्गेनावलोकनं कर्तृ सैन्यघोषे सेनाकलकले सम्भ्रमकारणे सत्यपि असम्भ्रमम् अन्तःक्षोभविरहितम्। नञः प्रसज्यप्रतिषेधेऽपि समास इष्यते। शशंस कथयामास। सैन्येभ्य इत्यर्थो लभ्यते। वाह्यचेष्टितमेव मनोवृत्तेरनुमापकम् इति भावः। असम्भ्रान्तत्वे हेतुः तुल्यसत्त्वानामिति। न हि समबलः समबलादिभेति इति भावः ॥ ७२ ॥

भूर्जेष्विति। भूर्जेषु भूर्जपत्रेषु। "भूर्जपत्री भुजो भूर्जो मृदुत्वक् चर्मिका मता" इति यादवः। मर्म्मरः शुष्कपर्णध्वनिः। "मर्म्मरः शुष्कपर्णानाम्" इति यादवः। अयञ्च शुष्कादिशब्दवत् गुणिनि अपि वर्त्तते प्रयोज्यते च "मर्म्मरैरनुषक्तपूगनिभिः" इति। अतः मर्म्मरीभूताः मर्म्मरशब्दवन्तो भूताः इत्यर्थः। कीचकानां वेणुविशेषाणां ध्वनिहेतवः श्रोत्रसुखाय इति भावः।

निशथमुर्नमेरूणां छायास्वध्यास्य सैनिकाः।
दृषदो वासितोत्सङ्गाः निषण्णमृगनाभिभिः ॥७४॥
सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः।
आसन्नोषधयो नेतुः नक्तमस्नेहदीपिकाः ॥ ७५ ॥
तस्योत्सृष्टनिवासेषु कण्ठरज्जुच्चतत्वचः।

गङ्गासीकरिणः शीतलाः इत्यर्थः। मरुतः वाताः मार्गे तं सिषेविरे ॥ ७३ ॥

विशश्रमुरिति। सैनिकाः सेनायां समवेताः। प्राग्वहतीयष्टक्प्रत्ययः। नमेरूणां सुरपुन्नागानां छायासु निषण्णानां दृषदुपविष्टानां मृगाणां कस्तूरीमृगाणां नाभिभिः वासितोत्सङ्गाः सुरभिततलाः दृषदः शिलाः अध्यास्य अधिष्ठाय। "अधिशीङ्स्थासां कर्म्म" इति कर्मत्वम्। दृषत्सु अधिरुह्य इत्यर्थः विश्रयमुः विश्रान्ताः ॥ ७४ ॥

सरलेति। सरलेषु देवदारुविशेषेषु आसक्तानि अवरूढ इभानां गजानां ग्रीवासु भवानि ग्रैवेयाणि, न हि शूराः "ग्रीवाभ्योऽण् च" इति चकारात् ढक्प्र॥
त्विषः प्रतिफलितभासः ओषधयः ज्वल लौहित्या नाम नदी नक्तं रात्रौ नेतुः नायकस्य रवोः अदे गतिपाणां जनपदानाम् प्रदीपाः (अतैलपूरप्रदीपाः) आसन्

तस्येति। तस्य रघोः सैनानिवेशेषु कण्ठरज्जुभिः गल येषां ते देवदारवः किरातेभ्यः यनच

Brahmaputra. The country in Assam. The king of a conspicuous part in the

परस्परेण विज्ञातः तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारः राज्ञः सारो हिमाद्रिणा ॥७९॥
तत्राचोभ्यं यशोराशिं निवेशयावरुरोह सः ।
पौलस्त्यतुलितस्याद्रेः आदधान इव क्रियम् ॥८०॥
चकम्पे तीर्णलौहित्ये(१)तस्मिन् प्राग्ज्योतिषेश्वरः ।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ॥ ८१ ॥

परस्परेणेति । तेषु गणेषु उपायनयुक्ताः पाणयः येषां तेषु सत्सु, परस्परेण अन्योन्यं राज्ञा हिमवतः सारः धनरूपः विज्ञातः हिमाद्रिणा अपि राज्ञः सारः बलरूपः विज्ञातः । एतेन तत्तत्यवस्तूनामनर्घ्यत्वं गणानामभूतपूर्वत्वं पराजय इति ध्वन्यते ॥ ७९ ॥

तत्रेति । स रघुः तत्र हिमाद्रौ अचोभ्यम् अक्षय्यं यशोराशिं निवेश्य निधाय पौलस्त्येन रावणेन तुलितस्य चालितस्य अद्रेः कैलासस्य क्रियम् आदधानः जनयन् इव अवरुरोह अवततार कैलासमगत्वैव प्रतिनिवृत्तः इत्यर्थः । न हि शूराः परेण पराजितमभियुञ्जन्ते इति भावः ॥ ८० ॥

चकम्प इति । तस्मिन् रघौ तीर्णा लौहित्या नाम नदी येन तस्मिन् तीर्णलौहित्ये सति प्राग्ज्योतिषाणां जनपदानाम्

---

(१) लौहित्य is identical with the Brahmaputra. The country of the प्राग्ज्योतिष's corresponds to Eastern Assam. The king of this people भगदत्त in a later age played a conspicuous part in the wars of Kurukshetra.

गजवर्म किरातेभ्यः(१) शशंसुर्देवदारवः ॥ ७६ ॥
तत्र जन्यं रघोर्घोरं पार्वतीयैर्गणैरभूत् ।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ॥ ७७ ॥
शरैरुत्सवसङ्केतान्(२)स क्ष्त्वा विरतोत्सवान् ।
जयोदाहरणं बाह्वोः गापयामास किन्नरान् ॥७८॥

"वर्म देहप्रमाणयोः" इत्यमरः । शशंसुः कथितवन्तः । देवदारुस्कन्धत्वक्चैर्गजानामौन्नत्यमनुमीयते इत्यर्थः ॥ ७६ ॥

तत्रेति । तत्र हिमाद्रौ रघोः पर्वते भवैः पार्वतीयैः । "पर्वताच्च" इति छप्रत्ययः । गणैः उत्सवसङ्केताख्यैः सप्तभिः सह । "गणानुत्सवसङ्केतान् अजयत् सप्त पाण्डवः" इति महाभारते । नाराचानां बाणविशेषाणां क्षेपणीयानां भिन्दिपालानाम् अश्मनाञ्च निष्पेषेण सङ्घर्षेण उत्पतिताः अनलाः यस्मिन् तत् तथो-

"क्षेपणीयो भिन्दिपालः खड्गो दीर्घो महाफलः" इति

घोरं भीमं जन्यं युद्धम् अभूत् । "युद्धमायोधनं जन्यम्"

"मर्म रः शुक्लपर्ण।

वत् गुणिनि अपि वर्त्म रघुः शरैर्बाणैः उत्सवसङ्केतान् नाम गणान्

इति। अतः मर्मरीभूताः ा इत्यर्थः, किन्नरान् बाह्वोः स्वभुजयोः

कानां वेणुविशेषाणां ध्वनिबन्धविशेषं गापयामास । गतिबुधो-

म् ॥ ७८ ॥

(१) "प्रकरणात् स इत्यध्याहियते ।

गुहासु स्थितानां सिंहानां केसरीखादविडपि यस्य तथा मित्यम् । मित्याक्रयस्य कर्षणं, वक्षीकर्म शशंस वर्णादीत्" इति दिनकरः । वल्लभ probably the region अ-

क्षितमित्यस्य विशेषणं कृत्वा दिनकरवत् व्याचष्टे ।

परस्परेण विज्ञातः तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारः राज्ञः सारो हिमाद्रिणा ॥७९॥
तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः ।
पौलस्त्यतुलितस्याद्रेः आदधान इव श्रियम् ॥८०॥
चकम्पे तीर्णलौहित्ये(१)तस्मिन् प्राग्ज्योतिषेश्वरः ।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ॥ ८१ ॥

परस्परेणेति । तेषु गणेषु उपायनयुक्ताः पाणयः येषां तेषु सत्सु, परस्परेण अन्योन्यं राज्ञा हिमवतः सारः धनरूपः विज्ञातः हिमाद्रिणा अपि राज्ञः सारः बलरूपः विज्ञातः । एतेन तत्तुल्यवस्तूनामनर्घ्यत्वं गणानामभूतपूर्वत्वं पराजय इति ध्वन्यते ॥ ७९ ॥

तत्रेति । स रघुः तत्र हिमाद्रौ अक्षोभ्यम् अक्षुब्धं यशोराशिं निवेश्य निधाय पौलस्त्येन रावणेन तुलितस्य चालितस्य अद्रेः कैलासस्य श्रियम् आदधानः जनयन् इव अवरुरोह अवततार कैलासमगत्वैव प्रतिनिवृत्तः इत्यर्थः । न हि शूराः परेण पराजितमभियुञ्जते इति भावः ॥ ८० ॥

चकम्प इति । तस्मिन् रघौ तीर्णा लौहित्या नाम नदी येन तस्मिन् तीर्णलौहित्ये सति प्राग्ज्योतिषाणां जनपदानाम्

---

(१) लौहित्य is identical with the Brahmaputra. The country of the प्राग्ज्योतिष's corresponds to Eastern Assam. The king of this people भगदत्त in a later age played a conspicuous part in the wars of Kurukshetra.

न प्रसेहे स रुद्धार्कम् अधारावर्षदुर्दिनम् ।
रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम् ॥ ८२ ॥
तमीशः कामरूपाणाम्(१) अत्याखण्डलविक्रमम् ।
भेजे भिन्नकटैर्नागैः अन्यानुपरुरोध यैः ॥ ८३ ॥
कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम् ।
रत्नपुष्पोपहारेण छायामानर्च पादयोः ॥ ८४ ॥

ईश्वरः तस्य रघोः गजानाम् आलानतां प्राप्तैः कालागुरुद्रुमैः कृष्णागुरुद्रुमैः सह चकम्पे कम्पितवान् ॥ ८१ ॥

सः इति । सः प्राग्ज्योतिषेश्वरः रुद्धार्कम् आवृतसूर्यम् । अधारावर्षञ्च तत् दुर्दिनञ्च धाराहृष्टिं विना दुर्दिनभूतम् अस्य रघोः रथवर्त्मरजः अपि न प्रसेहे पताकिनीं सेनां कुतः एव प्रसेहे न कुतोऽपि इत्यर्थः ॥ ८२ ॥

तमिति । कामरूपाणां नाम देशानाम् ईशः अत्याखण्डलविक्रमम् अतीन्द्रपराक्रमं तं रघुं भिवाः स्रवन्मदाः कटाः गण्डाः येषां तैः नागैः गजैः साधनैः भेजे नागान् दत्वा शरणं गतः इत्यर्थः । कीदृशैर्नागैः यैः अन्यान् रघुव्यतिरिक्तान् नृपान् उपरुरोध । शूराणामपि शूरो रघुः इति भावः ॥ ८३ ॥

कामरूपेश्वर इति । कामरूपेश्वरः हेमपीठस्य अधिदेवतां तस्य रघोः पादयोः छायां कनकमयपादपीठव्यापिनीं कान्तिं

(1) Kamarupa corresponds to the western portion of Assam, noted to this day, for elephants of superior strength.

इति जित्वा दिशो जिष्णुः न्यवर्त्तत रथोद्धतम्।
रजो विश्रामयन् राज्ञां छत्रशून्येषु मौलिषु ॥ ८५ ॥
स विश्वजितमाजह्रे(१) यज्ञं(२) सर्व्वस्वदक्षिणम्।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥ ८६ ॥

रत्नानि एव पुष्पाणि तेषाम् उपहारेण समर्पणेन आनर्च अर्च्चयामास ॥ ८४ ॥

इतीति। जिष्णुः जयशीलः। ग्लाजिस्थश्च क्नुरिति क्नुप्रत्ययः। सः रघुः इति इत्थं दिशः जित्वा रथैः उद्धतं रजः छत्रशून्येषु रघोरेकच्छत्रकत्वात् इति भावः। राज्ञां मौलिषु किरीटेषु। "मौलिः किरीटे धम्मिल्ले चूड़ाकङ्के शिमूर्द्धजे" इति हैमः। विश्रामयन् संक्रामयन् इत्यर्थः न्यवर्त्तत निवृत्तः ॥ ८५ ॥

स इति। स रघुः सर्वस्वं दक्षिणा यस्य तं सर्व्वदक्षिणम्। "विश्वजित् सर्व्वस्वदक्षिणः" इति श्रुतेः। विश्वजितं नाम यज्ञम् आजह्रे कृतवान् इत्यर्थः। युक्तश्चैतदित्याह, सतां साधूनां, वारिमुचां मेघानाम् इव, आदानम् अर्जनं विसर्गाय त्यागाय हि पात्रविनियोगस्य इत्यर्थः ॥ ८६ ॥

---

(१) विश्वजिति सर्वं सर्वस्वं यस्मादिदं वा दक्षिणा इति त्रयः कथा वर्त्तन्ते। सर्व शादमाद्यादिसाध्यः। सर्व सर्वस्वमितिपदेन बाह्यभूम्यादिहोमोपकरणस्य ह्यमिश्र सकलं वसु गृह्यते।

(२) चारेर्मे इति पाठान्तरम्।

सत्रान्ते सचिवसखः पुरस्क्रियाभिः
गुर्वीभिः शमितपराजयव्यलीकान् ।
काकुत्स्थश्चिरविरहोत्सुकावरोधान्
राजन्यान् स्वपुरनिवृत्तयेऽनुमेने ॥ ८७ ॥
ते रेखाध्वजकुलिशातपत्रचिह्नं (१)
संराजश्चरणयुगं प्रसादलभ्यम् ।

सत्रान्ते इति । काकुत्स्थः रघुः सत्रान्ते यज्ञान्ते । "सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च" इत्यमरः । सचिवानाम् अमात्यानां सखा इति सचिवसखः सन् । "सचिवो भृतकेऽमात्ये" इति हैमः । तेषामत्यनुसरणद्योतनार्थं राज्ञः सखित्वव्यपदेशः । "राजाहःसखिभ्यष्टच्" । गुर्वीभिः महतीभिः । "गुरुर्महत्यां श्वश्रूयां पितादौ धर्म्यदेशके" इति हैमः । पुरस्क्रियाभिः पूजाभिः शमितं पराजयेन व्यलीकं दुःखं वैलक्ष्यं वा येषां तान् । "दुःखे वैलक्ष्ये व्यलीकम्" इति यादवः । चिरविरहेण उत्सुकाः उत्कण्ठिताः अवरोधाः अन्तःपुराङ्गनाः येषां तान् । राज्ञः अपत्यानि राजन्याः क्षत्रियाः तान् । "राजश्वशुराद्यत्" इति अपत्यार्थे यत्प्रत्ययः । "मूर्धाभिषिक्तो राजन्यः बाहुजः क्षत्रियो विराट्" इत्यमरः । स्वपुरं प्रति निवृत्तये प्रतिगमनाय अनुमेने अनुज्ञातवान् ॥ ८७ ॥

त इति । ते राजानः रेखाः एव ध्वजाय कुलिशानि च

(१) अत्रत्यपद्यवादिचिह्नानि महाभाग्यवत्त्वं परमैश्वर्यञ्च सूचयन्तीति व्याख्यातारः ।

प्रस्थानप्रणतिभिरङ्गुलीषु चक्रुः
मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥ ८८ ॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
रघुदिग्विजयो नाम चतुर्थः सर्गः।

आतपत्राणि च ध्वजाद्याकाररेखाः इत्यर्थः। तानि चिह्नानि यस्य तत् तथोक्तं प्रसादेन एव लभ्यं प्रसादलभ्यं सम्राजः सार्वभौमस्य रघोः चरणयुगं प्रस्थाने प्रयाणसमये याः प्रणतयः नमस्काराः ताभिः करणैः अङ्गुलीषु, मौलिषु केशबन्धनेषु याः स्रजः मालाः तासां च्युतैः मकरन्दैः पुष्परसैः। "मकरन्दः पुष्परसः" इत्यमरः। रेणुभिः परागैश्च। "परागः सुमनोरजः" इत्यमरः। गौरं गौरवर्णं चक्रुः ॥ ८८ ॥

इति श्रीमल्लिनाथसूरिविरचितायां
रघुवंशटीकायां सञ्जीवनीसमाख्यायां चतुर्थः सर्गः।

पञ्चमः सर्गः ।

तमध्वरे विश्वजितं क्षितीशं
निःशेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी
कौत्सः प्रपेदे वरतन्तुशिष्यः ॥ १ ॥

इन्दीवरदलश्याममिन्दिरानन्दकन्दलम् ।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम् ॥

तमिति । विश्वजितं विश्वजिन्नाम्नि अध्वरे यज्ञे । "यज्ञ सवोऽध्वरो यागः" इत्यमरः । निःशेषं विश्राणितं दत्तम् । श्रण दाने शुरादिः । कोषाणाम् अर्थराशीनां जातं समूहः येन तं तथोक्तम् । "कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः" इत्यमरः । "जातं जनिसमूहयोः" इति शाश्वतः । एतेन कौत्सस्यानवसरप्राप्तिं सूचयति । तं क्षितीशं रघुम् उपात्तविद्य लब्धविद्यः वरतन्तोः शिष्यः कौत्सः । ऋष्यन्धकेत्यण् इवोऽप यादः । गुरुदक्षिणार्थी । पुष्करादिभ्यो देशे इत्यत्र अर्थाद्वासन्नि हिते तदर्थाच्चेतीनिः । अप्रत्याख्येय इति भावः । प्रपेदे प्राप । अस्मिन् सर्गे इन्द्रवज्रोपजातिः । तल्लक्षणन्तु, "स्यादिन्द्रवज्रा यदि तौ जगौ गः । उपेन्द्रवज्रा जतजास्ततो गौ । अनन्तरौदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः" ॥ इति ॥ १ ॥

स मृण्मये वीतहिरण्मयत्वात्
पात्रे निधायार्घ्यमनर्घ्यशीलः(१)।
श्रुतप्रकाशं यशसा प्रकाशः
प्रत्युज्जगामातिथिमातिथेयः॥ २॥
तमर्चयित्वा विधिवद्विधिज्ञः
तपोधनं मानधनाग्रयायी।

स इति। अनर्घ्यशीलः अमूल्यस्वभावः असाधारणस्वभावः इत्यर्थः। "मूल्ये पूजाविधावर्घः" इति "शीलं स्वभावे सद्वृत्ते" इति च अमरशास्त्रतौ। यशसा कीर्त्या प्रकाशते इति प्रकाशः। पचाद्यच्। अतिथिषु साधुः आतिथेयः। "पथ्यतिथिवसतिस्वपतेर्ढञ्" इति ढञ्। स रघुः हिरण्यस्य विकारः हिरण्मयम् दाण्डिनायनादिसूत्रेण निपातः। वीतहिरण्मयत्वात् अपगतसुवर्णपात्रत्वात्। यज्ञस्य सर्व्वस्वदक्षिणाकत्वात् इति भावः। मृण्मये मृद्विकारे पात्रे अर्घार्थमिदं अर्घ्यम्। "पादार्घाभ्याञ्च" इति यत्। पूजार्थं द्रव्यं निधाय श्रुतेन शास्त्रेण प्रकाशं प्रसिद्धं श्रूयते इति श्रुतं वेदशास्त्रम्। "श्रुतं शास्त्रावभृतयोः" इत्यमरः। अतिथिम् अभ्यागतं कौत्सम्। "अतिथिर्नो गृहागते" इत्यमरः। प्रत्युज्जगाम॥ २॥

तमिति। विधिज्ञः शास्त्रज्ञः अकरणे प्रत्यवायभीरुः

(१) अर्घं पूजां अर्हतीति अर्घ्यः पूज्यः; नास्ति अर्घ्यो यस्मात् स अनर्घ्यः पूज्यतमः इत्यर्थः। "अनर्घ्यं शीलं यस्य इति विग्रहे अनर्घ्यशीलः। बहुव्रीहिपदवत् अनर्घ्यशब्देन पूज्यतमत्वं प्रतीयते। यथा माघे "जगदर्घ्यानघस्वभावभृता न यदियत्तु सत्त्वभाविभावभृता। प्रसभं नियतीभिरञ्चितां गतिरदस्तया शुद्धमुत्तमं तमः"।

विशाम्पतिर्विष्टरभाजमारात्
कृताञ्जलिः कृत्यविदित्युवाच ॥ ३ ॥
अप्ययणीर्मन्यकृतामृषीणां(१)
कुशाग्रबुद्धे कुशली गुरुस्ते ।
यतस्त्वया ब्रह्मनमशेषमाप्तं
लोकेन चैतन्यमिवोषारश्मेः ॥ ४ ॥

इत्यर्थः । मानधनानाम् अग्रयायी अग्रेसरः अपयशोभीरुः इत्यर्थः । कृत्यवित् कार्यज्ञः आगमनप्रयोजनमवश्यं प्रष्टव्यमिति कृत्यवित् विशाम्पतिः मनुजेश्वरः । "द्वौ विशौ वैश्यमनुजौ" इत्यमरः । विष्टरभाजम् आसनगतम् उपविष्टम् इत्यर्थः । "विष्टरो विटपी दर्भमुष्टिः पीठावमासनम्" इत्यमरः । ष्ठा-सनयोर्विष्टरः इति निपातः । तं तपोधनं विधिवत् विध्यर्हं यथाशास्त्रम् इत्यर्थः । तदर्हमिति वत्प्रत्ययः । अर्चयित्वा आरात् समीपे । "आराद् दूरसमीपयोः" इत्यमरः । कृताञ्जलिः सन् इति वक्ष्यमाणप्रकारेण उवाच ॥ ३ ॥

अप्ययणीरिति । हे कुशाग्रबुद्धे सूक्ष्मबुद्धे "कुशाग्रीयमतिः पोक्तः सूक्ष्मदर्शी च यः पुमान्" इति हलायुधः । मन्यकृतां मन्यस्तुतीनाम् । सुकर्मपापमन्त्रेत्यादिना क्विप् । ऋषीणाम् अपयणीः श्रेष्ठः ते तव गुरुः कुशली अपि, क्षेमवान् किम्, अपि

(1) The word मन्यकृत् means a composer or reciter of hymns. Here it is used as an empty title, in as much as वसिष्ठ does not figure either as a composer or reciter of hymns like अत्रि, to whom the same epithet is applied. See Canto I. st 61.

कायेन वाचा मनसापि शश्वत्
यत् सम्भृतं वासवधैर्य्यलोपि।
आपाद्यते न व्ययमन्तरायैः
कच्चिन्महर्षेस्तविधं तपस्तत्(१) ॥ ५ ॥
आधारवन्धप्रमुखैः प्रयत्नैः
संवर्द्धितानां सुतनिर्विशेषम्।

प्रत्ये। "गर्हासमुच्चयप्रश्नयद्वासम्भावनास्वपि" इत्यमरः। यतः यस्मात् गुरोः सकाशात् त्वया अयेषं ज्ञानं, लोकेन उषसः सूर्य्यात् चैतन्यं प्रबोधः इव, आप्तं स्वीकृतम् ॥ ४ ॥

कायेनेति। कायेन उपवासादिलक्षच्छ चान्द्रायणादिना, वाचा वेदपाठेन, मनसा गायत्रीजपादिनापि, कायेन, वाचा, मनसापि, करणेन, वासवस्य इन्द्रस्य धैर्य्यं लुम्पतीति वासवधैर्य्यलोपि स्वपदापहारमङ्गलनकम् इत्यर्थः। यत् तपः शश्वत् असकृत्। "मुहुः पुनः पुनः शश्वत् अभीक्ष्णमसकृत्समाः" इत्यमरः। सम्भृतं सञ्चितं महर्षेः वरतन्तोः त्रिविधं वाङ्मनःकायजं तत् तपः अन्तरायैः विघ्नैः इन्द्रप्रेरितासरःमापैः व्ययं नाशं न आपाद्यते कच्चित्, न नीयते किम्, "कच्चित् कामप्रवेदने" इत्यमरः ॥ ५ ॥

आधारेति। आधारवन्धप्रमुखैः आलवालनिर्म्माणादिभिः प्रयत्नैः उपायैः। "आधार आलवालेऽम्बुबन्धेऽधिकरणेऽपि च"

(१) कच्चिदिति किमर्थे इति मल्लः।

कच्चिन्न वायुादिरुपप्लवो वः
श्रमच्छिदामाश्रमपादपानाम् ॥६॥
क्रियानिमित्तेष्वपि वत्सलत्वात्
अभग्नकामा मुनिभिः कुशेषु ।
तदङ्कशय्याच्युतनाभिनाला
कच्चिन्मृगीणामनघा प्रसूतिः ॥७॥
निर्वर्त्यते ते यैर्नियमाभिषेकः
येभ्यो निवापाञ्जलयः पितॄणाम् ।

इति विश्वः । सुतेभ्यः निर्गतः विशेषः अतिशयः यस्मिन् कर्म्मणि तत् तथा संवर्द्धितानां श्रमच्छिदां वः आश्रमपादपानां वायुादिः । आदिशब्दात् दावानलादिरुपप्लवो बाधकः न कश्चित् नास्ति किम् ॥ ६ ॥

क्रियेति । क्रियानिमित्तेषु अपि अनुष्ठानसाधनेषु अपि कुशेषु मुनिभिः वत्सलत्वात् मृगस्नेहात् अभग्नकामा अप्रतिहतेच्छा, तेषां मुनीनाम् अहाः एव शय्याः तासु च्युतानि नाभिनालानि यस्याः सा तथोक्ता, मृगीणां प्रसूतिः सन्ततिः अनघा अव्यसना कच्चित् अनपायिनी किम् इत्यर्थः । "दुःखेनोपद्रवेऽघम्" इति यादवः । ते हि व्याघ्रभयात् दशरात्रमर्भकं एव धारयन्ति ॥ ७ ॥

निर्वर्त्यत इति । यैः तीर्थजलैः नियमाभिषेकः नित्यस्नानादिः निर्वर्त्यते निष्पाद्यते, येभ्यः जलेभ्यः, इङ्ग्य इति शेषः ।

तान्युच्छषष्ठाङ्कितसैकतानि(१)
शिवानि वस्तीर्थजलानि कञ्चित् ॥८॥
नीवारपाकोदि कडङ्गरीयैः
आमृश्यते जानपदैर्न कञ्चित्।
कालोपपन्नातिथिकल्पभागं(२)
वन्यं शरीरस्थितिसाधनं वः ॥ ९ ॥

पितृणाम् अग्निष्वात्तादीनां निवापाञ्जलयः तर्पणाञ्जलयः। "पिण्डदानं निवापः स्यात्" इत्यमरः। निर्वर्त्यन्ते उच्छानां प्रकीर्णोद्धृतधान्यानां षष्ठैः षष्ठभागैः पालकत्वात् राजग्राह्यैः अङ्कितानि सैकतानि पुलिनानि येषां तानि तथोक्तानि वः युष्माकं तानि तीर्थजलानि शिवानि भद्राणि कञ्चित्, अनुपप्लवानि किम् इत्यर्थः। "उञ्छो धान्यांशकादानं कणिशाद्यर्जनं शिलम्" इति यादवः। "षष्टाष्टमाभ्यां च" इति षष्ठशब्दात् भागार्थे अच्प्रत्ययः। अतएवापूरणार्थत्वात् पूरणगुणेत्यादिना न षष्ठीसमासप्रतिषेधः। सिकताः येषु सन्ति सैकतानि। "सिकतामर्करा-भ्यां च" इति अण्प्रत्ययः ॥ ८ ॥

नीवारेति। कालेषु योग्यकालेषु उपपन्नानाम् आगतानाम्

---

(१) "मुनयो हि वृषोद्देशेन वयं मार्गं तीरे विदध्मः। योऽस्मान् पालयति तस्मै षष्ठांशं विसृजेत" इति वचनम्। एवंप्रकारादिगृहीतधनमुनयः; मनुष्यैरदत्तानेक-भागोदयत्व सिद्धः इति कुल्लूकभट्टः। मनु ८। ३।

(२) तिथ्यादयस्तु अतीतत्वे षष्ठ्यादौ नादिष्टाः। तथा च मुनयभाषणे ब्राह्मणोऽतिथिर्नोपवसेत्। मनु ३। १००। यदिच—अतिथिर्यस्य भग्नाशः गृहात् प्रतिनिवर्तते। स तस्मै दुष्कृतं दत्वा पुण्यमादाय गच्छति। इति।

अपि प्रसन्नेन महर्षिणा त्वं
सम्यग्विनीयानुमतो गृहाय।
कालो(१) ह्ययं संक्रमितुं द्वितीयं
सर्व्वोपकारक्षममाश्रमं ते (२)॥ १०॥

अतिथीनां कल्पाः भागाः यस्य तत् तथोक्तं, वने भवं वन्यं, शरीरस्थितेः जीवितस्य साधनं वः युष्माकम्। पच्यते इति पाकः, फलं, धान्यम् इति यावत्। नीवारपाकादि। आदिशब्दाच्छ्यामाकादिधान्यसंग्रहः। जनपदेभ्यः आगतैः जानपदैः। तत आगत इति अण्। कड़ङ्करीयैः कड़ङ्करं वुषम् अर्हन्तीति कड़ङ्करीयाः। "कड़ङ्करो वुषं क्लीवे धान्यत्वचि तुषः पुमान्" इत्यमरः। "कड़ङ्करदक्षिणाच्छ च" इति छप्रत्ययः। तैः गोमहिषादिभिः नाम्यते कर्षित् न भक्ष्यते किम् इत्यर्थः॥ ८॥

अपीति। किञ्च त्वं प्रसन्नेन सता महर्षिणा सम्यक् विनीय, शिक्षयित्वा विद्यामुपदिश्य इत्यर्थः, गृहाय गृहस्थाश्रमं प्रवेष्टुम्। क्रियार्थोपपदेत्वादिना चतुर्थी। अनुमतः अपि अनुज्ञातः किम्, हि यस्मात् ते तव सर्वेषाम् आश्रमाणां ब्रह्मचर्य्यवानप्रस्थयतीनाम् उपकारे क्षमं शक्तम्। "क्षमं शक्ते हिते त्रिषु" इत्य-

(१) "चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः। द्वितीयमायुषो भागं कृतदारो गृहे वसेत्"। मनु ४।१।

(२) "देवे हवि मनुष्ये च तिर्य्यग्योनिभिरेव च। गृहस्थैः सेव्यते यस्मात् तस्मात् ज्येष्ठो गृहाश्रमीति" याज्ञवल्क्येन आश्रमान्तरोपजीवनमुक्तम्। अधिच— सर्व्वेषामपि चैतेषां वेदश्रुति विधानतः। गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्त्ति हि। यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिम्, तथैवाश्रमिणः सर्व्वे गृहस्थे यान्ति संस्थितिं। ६।८९।९० मनु।

तवार्हतो नाभिगमेन तृप्तं
मनो नियोगक्रिययोत्सुकं मे।
अप्याज्ञया शासितुरात्मना वा
प्राप्तोऽसि सम्भावयितुं वनान्माम् ॥११॥
इत्यर्घ्यपावानुमितव्ययस्य
रघोरुदारामपि गां निशम्य।

मरः। द्वितीयम् आश्रमं गार्हस्थ्यं संक्रमितुं प्राप्तुम् अयं कालः। विद्याग्रहणानन्तर्यात् तस्य इति भावः। "कालसमयवेलासु तुमुन्" इति तुमुन्। सर्व्वोपकारक्षममित्यनेन मनुः, "यथा मातरमाश्रित्य सर्व्वे जीवन्ति जन्तवः। वर्त्तन्ते गृहिणस्तद्वत् आश्रित्येतर आश्रमाः" ॥ इति ॥ १० ॥

कुशलप्रश्नं विधायागमनप्रयोजनप्रश्नं चिकीर्षुराह, तवेति। अर्हतः पूज्यस्य प्रशस्तस्य। अर्हः प्रशंसायामिति शतृप्रत्ययः। तव अभिगमनेन आगमनमात्रेण मे मनः न क्षणं न तुटं, किन्तु नियोगक्रियया आज्ञाकरणेन उत्सुकं सोत्कण्ठम्। "इष्टार्थोद्युक्त उत्सुकः" इत्यमरः। "प्रसितोत्सुकाभ्यां तृतीया च" इति समभ्यर्हे तृतीया। शासितुः गुरोः आज्ञया अपि आत्मना स्वतो वा। प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया। मां सम्भावयितुं (सम्मानयितुं) वनात् प्राप्तोऽसि गुर्व्वर्थं स्वार्थं वागमनम् इत्यर्थः ॥११॥

इतीति। अर्घ्यपावेण मूल्यमयेन अनुमितः व्ययः सर्व्वस्वत्यागः यस्य तस्य रघोः इति उक्तप्रकाराम् उदाराम् औदार्य-

अपि प्रसन्नेन महर्षिणा त्वं
सम्यग्विनीयानुमतो गृहाय।
कालो(१) ह्ययं संक्रमितुं द्वितीयं
सर्व्वोपकारक्षममाश्रमं ते (२)॥ १०॥

अतियोनां कल्पाः भागाः यस्य तत् तथोक्तं, वने भवं वन्यं, शरीरस्थितेः जीवितस्य साधनं वः युष्माकम्। पच्यते इति पाकः, फलं, धान्यम् इति यावत्। नीवारपाकादि। आदिशब्दाच्छ्यामाकादिधान्यसंग्रहः। जनपदेभ्यः आगतैः जानपदैः। तत आगत इति अण्। कड़ङ्करीयैः कड़ङ्करं वुषम् अर्हन्तीति कड़ङ्करीयाः। "कड़ङ्करो वुषे क्लीवे धान्यवर्चि तुषः पुमान्" इत्यमरः। "कड़ङ्करदक्षिणाच्छ च" इति छप्रत्ययः। तैः गोमहिषादिभिः नाम्यते कश्चित् न भक्ष्यते किम् इत्यर्थः॥ ९॥

अपीति। किञ्च त्वं प्रसन्नेन सता महर्षिणा सम्यक् विनीय, शिक्षयित्वा विद्यामुपदिश्य इत्यर्थः, गृहाय गृहस्थाश्रमं प्रवेष्टुम्। क्रियार्थोपपदेत्यादिना चतुर्थी। अनुमतः अपि अनुज्ञातः किम्, हि यस्मात् ते तव सर्वेषाम् आश्रमाणां ब्रह्मचर्य्यवानप्रस्थयतीनाम् उपकारे क्षमं शक्तम्। "क्षमं शक्ते हिते त्रिषु" इत्य-

(१) "चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः। द्वितीयमायुषो भागं कृतदारो गृहे वसेत्"। मनु ४।१।

(२) "देवेभ्यापि मनुष्येभ्य तिर्य्यग्योनिभ्य एव च। गृहस्थैः सेव्यते यस्मात् तस्मात् ज्येष्ठो गृहाश्रमीति" शातातपोक्तेश्च। यदिच— सर्व्वेषामपि चैतेषां वेदस्मृतिविधानतः। गृहस्थ उच्यते ज्येष्ठः स त्रीनेतान् बिभर्त्ति हि। यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिम्। तथैवाश्रमिणः सर्व्वे गृहस्थे यान्ति संस्थितिं। ६।८९।९०। मनु।

तवार्हतो नाभिगमेन तृप्तं
मनो नियोगक्रिययोत्सुकं मे।
अप्याज्ञया शासितुरात्मना वा
प्राप्तोऽसि सम्भावयितुं वनान्माम् ॥११॥
इत्यर्घ्यपातानुमितव्ययस्य
रघोरुदारामपि गां निशम्य।

मरः। द्वितीयम् आश्रमं गार्हस्थ्यं संक्रमितुं प्राप्तुम् अयं कालः। विद्याग्रहणानन्तर्यात् तस्य इति भावः। "कालसमयवेलासु तुमुन्" इति तुमुन्। सर्वोपकारत्वमभिप्रेत्य मनुः, "यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः। वर्त्तन्ते गृहिणस्तद्वत् आश्रित्येतर आश्रमाः" ॥ इति ॥ १०॥

कुशलप्रश्नं विधायागमनप्रयोजनप्रश्नं चिकीर्षुराह, तवेति। अर्हतः पूज्यस्य प्रशस्तस्य। अर्हः प्रशंसायामिति शतृप्रत्ययः। तव अभिगमनेन आगमनमात्रेण मे मनः न तृप्तं न तुष्टं, किन्तु नियोगक्रियया आज्ञाकरणेन उत्सुकं सोत्कण्ठम्। "इष्टार्थोद्युक्त उत्सुकः" इत्यमरः। "प्रसितोत्सुकाभ्यां तृतीया च" इति सप्तम्यर्थे तृतीया। शासितुः गुरोः आज्ञया अपि आत्मना स्वतो वा। प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया। मां सम्भावयितुं (सम्मानयितुं) वनात् प्राप्तोऽसि गुर्वर्थं स्वार्थं वागमनम् इत्यर्थः ॥११॥

इतीति। अर्घ्यपातेन मृण्मयेन अनुमितः व्ययः सर्वस्वत्यागः यस्य तस्य रघोः इति उक्तप्रकाराम् उदाराम् औदार्य-

स्वार्थोपपत्तिं प्रति दुर्बलाशः
तमित्यवोचद् वरतन्तुशिष्यः ॥१२॥
सर्वं(१) नो वार्त्तमवेहि राजन्
नाथे कुतस्त्व्यंशुभं प्रजानाम्।
सूर्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा ॥१३॥

युष्मान् अपि गां वार्त्तं "मनोनियोगक्रिययोत्सुकं" मे इत्येवंरूपाम्। "स्वर्गे पुपशुवाग्वज्रदिङ्नेत्रदृष्णिभूजले। लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः" इत्यमरः। निशम्य श्रुत्वा वरतन्तुशिष्यः कौत्सः स्वार्थोपपत्तिं स्वकार्यसिद्धिं प्रति दुर्बलाशः मृण्मयपात्रदर्शनात् शिथिलमनोरथः सन् तं रघुम् इति वक्ष्यमाणप्रकारेण अवोचत् ॥१२॥

सर्वमिति। हे राजन् त्वं सर्वं नः अस्माकं वार्त्तं स्वास्थ्यम् अवेहि जानीहि। "वार्त्तं वलुन्यरोगे च" इत्यमरः। "वार्त्तं पाटवमारोग्यं भव्यं स्वास्थ्यमनामयम्" इति यादवः। न चैतदाश्चर्यमित्याह, नाथ इति। त्वयि नाथे ईश्वरे सति प्रजानाम् अशुभं दुःखं कुतः, तथाहि, अर्थान्तरं न्यस्यति सूर्य इत्यादिना। सूर्ये तपति प्रकाशमाने सति तमिस्रा तमस्ततिः। "तमिस्रं तिमिरं रोगे तमिस्रा तु तमस्ततौ। कृष्णपक्षे निशायां च" इति विश्वः। तमिस्रमिति पाठे तमिस्रं तिमिरं। "तमिस्रं तिमिरं तमः" इत्यमरः। लोकस्य जनस्य। "लोकस्तु

(१) सर्वत्र गृह्यीयमतरूपमिति वदति दिनकरः।

भक्तिः प्रतीच्येषु कुलोचिता ते
पूर्वान् महाभाग(१) तयातिशेषे।
व्यतीतकालस्त्वहमभ्युपेतः
त्वामर्थिभावादिति मे विषादः॥ १४॥
शरीरमात्रेण नरेन्द्र तिष्ठन्
आभासि तीर्थप्रतिपादितर्द्धिः।

भुवने जने" इत्यमरः। दृष्टेः आवरणाय कथं कल्पेत दृष्टिमावरितुं नालम् इत्यर्थः। क्लृपेरलमर्थत्वात् तद्योगे नमःस्वस्तीत्यादिना चतुर्थी। अलमिति पर्य्याप्त्यर्थग्रहणमिति भगवान् भाष्यकारः। कल्पेत सम्पद्येत इत्यर्थः, क्लृपि सम्पद्यमाने चतुर्थीति वक्तव्यात्॥ १३॥

तवार्हत इत्यादिनोक्तं यत् तत्र चित्रमित्याह, भक्तिरिति। प्रतीच्येषु पूज्येषु। "पूज्यः प्रतीच्यः" इत्यमरः। भक्तिः अनुरागविशेषः, ते तव कुलोचिता कुलाभ्यस्ता। "अभ्यस्तेऽप्युचितं न्याय्यम्" इति यादवः। हे महाभाग सार्वभौम तया भक्त्या पूर्वान् (पूर्वपुरुषान्) अतिशेषे अतिवर्त्तसे। किन्तु सर्वत्र वार्त्तं चेत् तर्हि कथं खेदखिन्न इव दृश्यसे, अत आह, व्यतीतेति। अहं व्यतीतकालः अतिक्रान्तकालः सन् अर्थिभावात् त्वाम् अभ्युपेतः इति मे विषादः॥ १४॥

शरीरेति। हे नरेन्द्र तीर्थे सत्पात्रे प्रतिपादिता दत्ता ऋद्धिः

(१) महाभागतया उत्कृष्टभाग्यवत्त्वेन इति दिनकरः।

आरण्यकोपात्तफलप्रसूतिः
स्तम्बेन नीवार इवावशिष्टः ॥ १५ ॥
स्थाने भवानेकनराधिपः सन्
अकिञ्चनत्वं मखजं व्यनक्ति ।
पर्य्यायपीतस्य सुरैर्हिमांशोः (१)
कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥ १६ ॥

येन स तथोक्तः । "योनौ जलावतारे च मन्त्रगाद्यष्टादशस्वपि । मुख्यक्षेत्रे तथा पात्रे तीर्थं स्याद् दयनेष्वपि" इति हलायुधः । शरीरमात्रेण तिष्ठन् आरण्यकाः अरण्ये भवाः मनुष्याः मुनिप्रमुखाः । "अरण्यान्मनुष्ये" इति वुञ्प्रत्ययः । तैः उपात्ता फलम् एव प्रसूतिः यस्य स स्तम्बेन काण्डेन अवशिष्टः । प्रकृत्यादित्वात् टतीया । नीवारः इव आभासि शोभसे ॥ १५ ॥

स्थान इति । भवान् एकनराधिपः सार्वभौमः सन् मखजं मखजन्यं न विद्यते किञ्चन यस्य इति अकिञ्चनः । मयूरव्यंसकादित्वात् तत्पुरुषः । तस्य भावः तत्त्वं निर्धनत्वं व्यनक्ति प्रकटयति स्थाने युक्तम् । "युक्ते हि साम्प्रतं स्याने" इत्यमरः । तथाहि सुरैः देवैः पर्य्यायेण क्रमेण पीतस्य हिमांशोः कलाक्षयः वृद्धेः उपचयात् श्लाघ्यतरः हि वरः खलु । "मणिः शाणोल्लीढः समरविजयी हेतिनिहतः, मदक्षीणो नागः शरदि सरितः श्यान-

(१) "मत्स्यो विष्णौ मक्षिरिंशोर्यां विष्णौ रविः । विष्णे देवाशुनोर्यां तु पशुर्यां वह्निदीपिः । मत्स्यौ तु वषट्कारः पशौ विष्णौ यादवः । सप्तमीमत्स्यौ दिव्या षष्ठीमत्स्य एकपात् । नवमीं कच्छपस्तस्य वपुः शार्ङ्गाति यं भवान् । दशमीं विष्णे वायुः

तदन्यतस्तावदनन्यकार्य्यः
गुर्वर्थमाहर्त्तुमहं यतिष्ये।
स्वस्त्यास्तु ते निर्गलिताम्बुगर्भं
शरद्घनं नार्दति चातकोऽपि ॥ १७ ॥

पुलिनाः। कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः"। इति भावः। अत्र कामन्दकः, "धर्म्मार्थं क्षीणकोशस्य क्षीणत्वमपि शोभते। सुरैः पीतावशेषस्य क्षणदाचे विधोरिव"। इति ॥ १६ ॥

तदिति। तत् तस्मात् तावत् अनन्यकार्य्यः। "यावत् तावच्च साकल्येऽवधौ गानेऽवधारणे" इति विश्वः। प्रयोजनान्तररहितः अहम् अन्यतः वदान्यान्तरात् गुर्व्वर्थं गुरुधनम् आहर्त्तुं अर्जयितुं यतिष्ये उद्योक्ष्ये ते तुभ्यं स्वस्ति शुभमस्तु। नमःस्वस्तीत्यादिना चतुर्थी। तथाहि, चातकोऽपि, "धरणीपतितं तोयं चातकानां रजाकरम्" इति हेतोः अनन्यगतिकोऽपि इत्यर्थः, निर्गलितः अम्बु एव गर्भः यस्य तं शरद्घनं न अर्हति

पिवत्येकादशीमुमा। द्वादशीं पितरः सर्व्वे समं प्राश्नन्ति भागशः॥ त्रयोदशीं धनाध्यक्षः कुबेरः पिबते कलाम्। चतुर्दशीं पशुपतिः पञ्चदशीं प्रजापतिः॥" वषट्कारो वेदीक्षानामष्टवसूद्वादश्यादित्यैकादशरुद्रप्रजापतिवषट्काराणामन्यतमः। अज एकपात् रुद्राणामन्यतमः। The above quoted passage partially conflicts with the text, and commentary of विष्णुपुराण, which says "पिबन्ति दिकलाकारशिष्टा तस्य कला तु या। सुधामयतमी पुष्णा तामिन्दोः पितरो सुने।" On this, the commentator observes "पञ्चदशी या कला सा पितरः पिबन्ति न तु षोडशीम्। See Wilson's V. P. vol II page 302—3.

एतावदुक्त्वा प्रतियातुकामं
शिष्यं महर्षेर्नृपतिर्निषिध्य ।
किं वस्तु विद्वन् गुरवे प्रदेयं
त्वया कियद्वेति तमन्वयुङ्क्त ॥ १८ ॥

ततो यथावद्विहिताध्वराय
तस्मै समावेशविवर्जिताय ।
वर्णाश्रमाणां गुरवे स वर्णी
विचक्षणः प्रस्तुतमाचचक्षे ॥ १९ ॥

नु याचने । अर्ह गतौ याचने चेति धातुः । "याचनार्थे रणेऽर्हणम्" इति यादवः ॥ १७ ॥

एतावदिति । एतावत् वाक्यम् उक्त्वा प्रतियातुं कामः यस्य तं प्रतियातुकामं गन्तुकामम् । सुप् कामममनसोरपीति मकारलोपः । महर्षेः, वरतन्तोः शिष्यं कौत्सं नृपतिः रघुः निषिध्य निवार्य, हे विद्वन् त्वया गुरवे प्रदेयं वस्तु किं किमात्मकं, कियत् किंपरिमाणं वा इत्येवं तं कौत्सम् अन्वयुङ्क्त अपृच्छत् । "प्रश्नोऽनुयोगः पृच्छा च" इत्यमरः ॥ १८ ॥

तत इति । ततः यथावत् यथार्हम् । अर्हार्थे वतिः । विहिताध्वराय विधिवत् अनुष्ठितयज्ञाय सदाचाराय इत्यर्थः । समावेशविवर्जिताय गर्व्याभिनिवेशशून्याय अनुद्धताय इत्यर्थः । वर्णानां ब्राह्मणादीनाम् आश्रमाणां ब्रह्मचर्यादीनाञ्च गुरवे नियामकाय । "वर्णाः सुवर्णब्राह्मणादयः" इति, "ब्रह्मचारी गृही

समाप्तविद्येन(१) मया महर्षिः
विज्ञापितोऽभूद् गुरुदक्षिणायै ।
स मे चिरायास्खलितोपचारां(२)
तां भक्तिमेवागणयत् पुरस्तात् ॥ २० ॥
निर्बन्धसञ्जातरुषार्थकार्श्यम्
अचिन्तयित्वा गुरुणाहमुक्तः ।

वानप्रस्थो भिक्षुर्यतुष्टये । आश्रमोऽस्त्री" इति च अमरः । सर्व्व-कार्यनिर्वाहकाय इत्यर्थः । तस्मै रघवे विचक्षणः विद्वान् वर्णी ब्रह्मचारी । "वर्णिनो ब्रह्मचारिणः" इत्यमरः । "वर्णाद्(३) ब्रह्मचारिणि" इति इनिप्रत्ययः । स कौत्सः प्रभुतं प्रभवतम् आचचक्षे ॥ १९ ॥

समाप्तेति । समाप्तविद्येन मया महर्षिः गुरुदक्षिणायै गुरु-दक्षिणास्वीकारार्थं विज्ञापितः अभूत् । स च गुरुः चिराय अस्खलितोपचारां तां दुष्करां मे भक्तिम् एव पुरस्तात् प्रथमम् अगणयत् संख्यातवान्, भक्त्यैव सन्तुष्टः किं दक्षिणयेत्युक्तवान् इत्यर्थः । 'अथवा भक्तिम् एव तां दक्षिणाम् अवदत्' इति योज्यम् ॥ २० ॥

वित्तस्य विद्यापरिसंख्यया मे
कोटीश्चतस्रो दश चाहरेति ॥ २१ ॥
सोऽहं सपर्य्याविधिभाजनेन
मत्वा भवन्तं प्रभुशब्दशेषम् ।
अभ्युत्सहे सम्प्रति नोपरोद्धुम्
अल्पेतरत्वाच्छुतनिष्क्रयस्य ॥ २२ ॥

निर्बन्धेति । निर्बन्धेन प्रार्थनातिशयेन सञ्जातरुषा सञ्जातक्रोधेन गुरुणा अर्थकार्श्यं दारिद्र्यम् अचिन्तयित्वा अविचार्य्य अहं वित्तस्य धनस्य चतस्रः दश च कोटीः चतुर्दश कोटीः मे मह्यम् आहर आनय इति विद्यापरिसंख्या विद्यापरिसंख्यानुसारेणैव उक्ताः । अत्र मनुः, "अङ्गानि वेदाश्चत्वारः मीमांसा न्यायविस्तरः । पुराणं धर्म्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश" ॥(१) इति ॥ २१ ॥

सोऽहमिति । सः अहं सपर्य्याविधिभाजनेन अर्घ्यपात्रेण भवन्तं प्रभुशब्दः एव शेषः यस्य तं मत्वा निःस्वं निर्धनं इत्यर्थः श्रुतनिष्क्रयस्य विद्यामूल्यस्य अल्पेतरत्वात् अतिमहत्त्वात् सम्प्रति उपरोद्धुं निर्बन्धुं न अभ्युत्सहे ॥ २२ ॥

---

(१) अन्यत्रापि विद्या चतुर्दशविधापि । यदुक्तं, यत्रचतुरो वेदा मीमांसा न्यायविस्तरः । आयुर्वेदो धनुर्वेदो गान्धर्वश्चेदशाक्षरम् । पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश इति । यत्रचतुरो वेदा धर्मो व्याहरणं निरुक्तं ज्योतिषं गमः । शिक्षा निरुक्तिश्छन्दश्च वेदस्य इत्यरे ।

इत्थं द्विजेन द्विजराजकान्तिः
आवेदितो वेदविदां वरेण।
एनोनिहत्तेन्द्रियवृत्तिरेनं
जगाद भूयो जगदेकनाथः ॥ २३ ॥
गुर्वर्थमर्थी श्रुतपारदृश्वा
रघोः सकाशादनवाप्य कामम्।
गतो वदान्यान्तरमित्ययं मे
मा भूत् परीवादनवावतारः ॥ २४ ॥

इत्थमिति। द्विजराजकान्तिः चन्द्रकान्तिः। "द्विजराजः शशधरः नक्षत्रेशः क्षपाकरः" इत्यमरः। "तस्मात् सोमो राजा नो ब्राह्मणानाम्" इति श्रुतेः। द्विजराजकान्तित्वेनार्यानामिवैराग्यं वारयति। एनसः पापात् निहत्ता इन्द्रियवृत्तिः यस्य स जगदेकनाथः रघुः वेदविदां वरेण श्रेष्ठेन द्विजेन कौत्सेन इत्थम् आवेदितः निवेदितः सन् एनं कौत्सं भूयः पुनः जगाद ॥२३॥

गुर्वर्थमिति। श्रुतस्य पारं दृष्टवान् श्रुतपारदृश्वा। दृशेः क्वनिविति क्वनिप्। गुर्वर्थं गुरुदक्षिणार्थं यथा तथा अर्थी याचकः। विशेषणद्वयेनापि अस्याप्रत्याख्येयत्वमाह। रघोः सकाशात् कामं मनोरथम् अनवाप्य अप्राप्य वदान्यान्तरं गतः। "सुवदान्यस्थूललक्ष्यदानयौण्ड्या वहुप्रदे" इत्यमरः। इत्येवंरूपः अयं परीवादस्य अपवादस्य नवः नूतनः प्रथमः अवतारः आविर्भावः मे माभूत् अस्तु। रघोरिति स्वनामग्रहणं

स त्वं प्रशस्ते महिते मदीये
वसंश्चतुर्थोऽग्निरिवाग्न्यगारे(१)।
दिनाण्यहान्यर्हसि सोढुमर्हन्
यावद्यते साधयितुं त्वदर्थम् ॥ २५ ॥
तथेति तस्याविततथं प्रतीतः
प्रत्यग्रहीत् सङ्गरमग्रजन्मा।
गामात्तसारां रघुरप्यवेक्ष्य
निष्क्रष्टुमर्थं चकमे कुबेरात् ॥ २६ ॥

सभावितत्वद्योतनार्थम्। तथाच, "सभावितस्य चाकीर्तिः मरणादतिरिच्यते" इति भावः ॥ २४ ॥

स इति। स त्वं महिते पूजिते प्रशस्ते प्रसिद्धे मदीये अग्न्यगारे त्रेताग्निशालायां, चतुर्थः अग्निः असन् इव, दिनानि त्रीणि वा अहानि दिनानि। "संख्ययाव्ययासन्नादूराधिकसंख्याः संख्ये" इति बहुव्रीहिः। बहुव्रीहौ संख्येये डजबहुगणादिति डच्, सोढुम् अर्हसि, हे अर्हन् मान्य त्वदर्थं तव प्रयोजनं साधयितुं यावत् यते यतिष्ये। यावत्पुरानिपातयोर्लट् इति भविष्यदर्थे लट् ॥ २५ ॥

तथेतीति। अथ अजन्मा ब्राह्मणः प्रतीतः प्रीतः सन्, तस्य रघोः अविततथम् अमोघं सङ्गरं प्रतिज्ञाम्। "अथ प्रतिज्ञा-

(१) "पिता वै गार्हपत्यः माता दक्षिणाग्निर्गार्हपत्यादेव दक्षिणाग्निर्जायते" इति श्रुतिः। दक्षिणाग्नीयम् यज्ञियं वेश्म अग्नीध्रशाला। कल्प। २। २५।

वसिष्ठमन्त्रोक्षणजात् प्रभावात्
उदन्वदाकाशमहीधरेषु।
मरुत्सखस्येव बलाहकस्य (१)
गतिर्विजघ्ने न हि तद्व्रतस्य ॥ २७ ॥
अथाधिशिश्रे प्रयतः प्रदोषे
रथं रघुः कल्पितशस्त्रगर्भम्।

जिसंविदायत्तु सङ्गरः" इत्यमरः। तां गिरम् इति केचित् पठन्ति। तथा इति प्रत्यगृह्णात्। रघुः अपि गां भूमिम् आत्तसारां गृहीतधनाम् अवेक्ष्य कुबेरात् अर्थं निष्कृष्टुम् आहर्त्तुं चकमे इत्येष ॥ २६ ॥

वसिष्ठेति। वसिष्ठस्य यत् मन्त्रेण उक्षणम् अभिमन्त्र्य प्रोक्षणं तज्जात् प्रभावात् सामर्थ्यात् हेतोः उदन्वदाकाशमहीधरेषु उदन्वति उदधौ आकाशे महीधरेषु वा, मरुत्सखस्य, मरुतः सखा इति तत्पुरुषः, बहुव्रीहौ समासान्ताभावात्। ततो वायुसहायस्येति लभ्यते। वारीणां वाहकः बलाहकः। पृषोदरादित्वात् साधु। तस्य इव मेघस्य इव, तद्व्रतस्य गतिः सञ्चारः न विजघ्ने न विहता हि ॥ २७ ॥

अथेति। अथ प्रदोषे रजनीमुखे तत्काले यत्नाधिरोहणविधानात् प्रयतः धीरः रघुः समन्तात् भवः सामन्तः

(१) "बलाहकेन गत्यर्थं वायोरपेक्षितत्वात् मरुत् सखा यस्येति अभिमतः समासः। एवं सति "राजाहःसखिभ्यष्टच्" इति टच्प्रत्ययो न स्यात् तस्य तत्पुरुषेऽभिधानात्, अतस्त्यक्तमेतत्" इति दिनकरः।

सामन्तसम्भावनयैव धीरः
कैलासनाथं तरसा जिगीषुः ॥ २८ ॥
प्रातः प्रयाणाभिमुखाय तस्मै
सविस्मयाः कोषगृहे नियुक्ताः ।
हिरण्मयीं कोषगृहस्य मध्ये
वृष्टिं शशंसुः पतितां नभस्तः ॥ २९ ॥
तं भूपतिर्भासुरहेमराशिं
लब्धं कुबेरादभियास्यमानात् ।

राजमात्रम् इति सम्भावनया एव कैलासनाथं कुबेरं तरसा बलेन जिगीषुः जेतुम् इच्छुः सन् कल्पितं सज्जितं अस्त्रं गर्भे यस्य तं रथम् अधिगिरये रथे शयितवान् इत्यर्थः । अधि-शीङ-स्थासां कर्मेति कर्मत्वम् ॥ २८ ॥

प्रातरिति । प्रातः प्रयाणाभिमुखाय तस्मै रघवे कोषगृहे नियुक्ताः अधिकृताः भाण्डारिकाः सविस्मयाः सन्तः कोषगृहस्य मध्ये नभस्तः नभसः । पञ्चम्यास्तसिल्प्रत्ययः । पतितां हिरण्मयीं सुवर्णमयीम् । दाण्डिनायनेत्यादिना निपातनात् साधु । वृष्टिं शशंसुः कथयामासुः ॥ २९ ॥

तमिति । भूपतिः रघुः अभियास्यमानात् अभिगमिष्यमाणात् कुबेरात् लब्धं वज्रेण कुलिशेन भिन्नं सुमेरोः पादं(१) प्रत्यन्तपर्वतम् इव स्थितम् । "पादाः प्रत्यन्तपर्वताः" इत्यमरः ।

(1) Both Dinakara and Vallabha read भग्नम् instead of पतितम् ।

दिदेश कौत्साय समस्तमेव
पादं सुमेरोरिव वज्रभिन्नम् ॥ ३० ॥
जनस्य(१)साकेतनिवासिनस्तौ
द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिस्पृहोऽर्थी
नृपोऽर्थिकामादधिकप्रदश्च ॥ ३१ ॥
अथोष्ट्रवामीशतवाहितार्थं
प्रजेश्वरं प्रीतमना महर्षिः ।

पादं सुमेरोरिति क्वचित् पाठः। तं भासुरं भास्वरम्। भस्म-भासमिदोघुरजिति घुरच्। हेमराशिं समस्तं तत्सममेव कौत्साय दिदेश ददौ न तु चतुर्दशकोटिमात्रमित्येवकारार्थः ॥ ३० ॥

जनस्येति। तौ अर्थिदातारौ द्वौ अपि साकेतनिवासिनः अयोध्यावासिनः। "साकेतः स्यादयोध्यायां कोशला नन्दिनी च सा" इति यादवः। जनस्य अभिनन्द्यसत्त्वौ स्तुत्यव्यवसायौ अभूताम्। "द्रव्यासूद्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इत्यमरः। कौ द्वौ गुरुप्रदेयात् अधिके अतिरिक्तद्रव्ये निस्पृहः अर्थी, अर्थिकामात् अर्थिमनोरथात् अधिकं प्रददातीति तथोक्तः। "प्रेदाभ्र" इति कप्रत्ययः। नृपश्च ॥ ३१ ॥

अथेति। अथ प्रीतमनाः महर्षिः कौत्सः संप्रस्थितः प्रस्था-

(१) "अधिक्षिपो याचनवीक्षदद्भुतः" इत्यादौ यथा अधिक्षिपामिति विशेषणं तथात्र वाचो विशेषणयोगादाधेति चित्रम्" इति दिनकरः।

स्पृशन् करेणानतपूर्वकायं
संप्रस्थितो वाचमुवाच कौत्सः ॥ ३२ ॥
किमत्र चित्रं यदि कामसूर्भूः
दुग्धे स्थितस्याधिपतेः प्रजानाम् ।
अचिन्तनीयस्तु तव प्रभावः
मनीषितं द्यौरपि येन दुग्धा ॥ ३३ ॥
आशास्यमन्यत् पुनरुक्तभूतं
श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।

स्यमानः सन् । आशंसायां भूतवच्चेति भविष्यदर्थे क्तः । उष्ट्राणां क्रमेलकानां वामीनां वड़वानाञ्च गतैः वाहितार्थं प्रापितधनम् आनतपूर्वकायं विनयनम्रम् इत्यर्थः प्रजेश्वरं रघुं करेण स्पृशन् वाचम् उवाच ॥ ३२ ॥

किमिति । दुग्धे स्थितस्य । "न्यायेनार्जनमर्थस्य, वर्द्धनं पालनं तथा । सत्पात्रे प्रतिपत्तिश्च राजदुग्धं चतुर्विधम् ॥" इति कामन्दकः । तस्मिन् दुग्धे स्थितस्य प्रजानाम् अधिपतेः नृपस्य भूः कामान् सूते इति कामसूः यदि । सर्वधातुभ्य इन्नित्यादिना क्विप् । अत्र कामप्रसवने किं चित्रं न चित्रम् इत्यर्थः । किन्तु तव प्रभावः महिमा तु अचिन्तनीयः येन त्वया द्यौः अपि मनीषितम् अभिलषितं दुग्धा । दुहेर्द्विकर्मकत्वादप्रधाने कर्मणि क्तः । "प्रधानकर्मण्याख्येये लादीनाद्विकर्मणाम् । अप्रधाने दुहादीनां प्रयोक्तुश्च कर्मणः" ॥ इति स्मरणात् ॥ ३३ ॥

पुत्रं लभस्वात्मगुणानुरूपं
भवन्तमीड्यं भवतः पितेव ॥ २४ ॥
इत्थं प्रयुज्याशिषमग्रजन्मा(१)
राज्ञे प्रतीयाय गुरोः सकाशम् ।
राजापि लेभे सुतमाशु तस्मात्
आलोकमर्कादिव जीवलोकः ॥ २५ ॥

आयास्यमिति । सर्व्वाणि श्रेयांसि शुभानि अधिजग्मुषः प्राप्तवतः ते तव अन्यत् पुत्रातिरिक्तम् आयास्यम् आयीःसाध्यम् आयंसनीयं वा पुनरुक्तभूतं सर्व्वं सिद्धम् इत्यर्थः । किन्तु ईड्यं स्तुत्यं भवन्तं भवतः पिता इव, आत्मगुणानुरूपं त्वया तुल्य-गुणम् इत्यर्थः, पुत्रं लभस्व प्राप्नुहि ॥ २४ ॥

इत्यमिति । अग्रजन्मा ब्राह्मणः । "अग्रजन्मा द्विजे ज्येष्ठे भ्रातरि ब्रह्मणि स्मृतः" इति विश्वः । इत्थं राज्ञे आशिषं प्रयुज्य दत्वा गुरोः सकाशं समीपं प्रतीयाय प्राप । राजा अपि जीवलोकः जीवसमूहः । "जीवः प्राणिनि गीष्पतौ" इति विश्वः । अर्कात् आलोकं प्रकाशम् इव, चैतन्यम् इति पाठे ज्ञानम् इव, तस्मात् ऋषेः अत्रेयः आशु सुतं लेभे प्राप ॥ २५ ॥

---

(१) अग्रे जनिवाद्यृदोरिति प्रत्ययः अग्रजन्मा ब्राह्मणः । यदाह मनुः, "उत्पत्तिरेवास्य हि काण्डात् ब्रह्मजन्मैव धारणात् । सर्व्वस्यैवास्य सर्गस्य धर्म्मतो ब्राह्मणो गुरुः" । "तद्धात् आशिषः प्रयोगात्" इति वल्लभः ।

ब्राह्मे(१) मुहूर्त्ते किल तस्य देवी
कुमारकल्पं सुषुवे कुमारम्।
अतः पिता ब्रह्मण एव नाम्ना
तमात्मजन्मानमजं चकार ॥ ३६ ॥
रूपं तदोजस्वि तदेव वीर्य्यं
तदेव नैसर्गिकमुन्नतत्वम्।

ब्राह्म इति। तस्य रघोः देवी महिषी ब्राह्मे। तस्येदमित्यण्। ब्रह्मदेवताके अभिजिन्नामके मुहूर्त्ते किल ईषत् असमाप्तं कुमारं कुमारकल्पं, स्कन्दसदृशम्। ईषदसमाप्तौ-इत्यादिना कल्पप्प्रत्ययः। कुमारं पुत्रं सुषुवे। "कुमारो बालके स्कन्दे" इति विश्वः। अतो ब्राह्ममुहूर्त्तोत्पन्नत्वात् पिता रघुः, ब्रह्मणः विधेः इव, नाम्ना तम् आत्मजन्मानं पुत्रम् अजम् अजनामकं चकार। "अजो हरौ हरे कामे विधौ छागे रघोः सुते" इति विश्वः ॥ ३६ ॥

रूपमिति। ओजस्वि तेजस्वि बलिष्ठं वा। "ओजस्तेजसि धातूनाम् अवष्टम्भप्रकाशयोः। ओजो बले च दीप्तौ च" इति विश्वः। रूपं वपुः। "अथ रूपं नपुंसकम्। स्वभावाकृति-

---

(१) सूर्योदयात् पूर्वं तृतीये मुहूर्त्ते इत्यर्थः। "रात्रेश्च पश्चिमे यामे मुहूर्त्तौ ब्राह्म उच्यते"। "रात्रेः कलारघटिकापतुष्टयं ब्राह्ममुहूर्त्तः" इति दिनकरः। आर्द्रमते रात्रेः; पौष्यमुहूर्त्तोऽभिजिदादयः पञ्चदशमुहूर्त्ता ब्रह्मदैवताः इति उच्यते, श्रीपतिमते तु पौष्यमुहूर्त्त एव ब्राह्ममुहूर्त्तत्वेनाभिधीयते।

न कारणात् स्वाद् विभिदे कुमारः
प्रवर्त्तितो दीप इव प्रदीपात् ॥ ३७ ॥
उपात्तविद्यं विधिवद् गुरुभ्यः
तं यौवनोद्भेदविशेषकान्तम् ।
श्रीः साभिलाषापि गुरोरनुज्ञां
धीरेव कन्या पितुराचकाङ्क्ष ॥ ३८ ॥

सौन्दर्य्यवपुषि श्लोकशब्दयोः" इति विश्वः। तत् एव पैढकम् एव, वीर्य्यं शौर्य्यं तत् एव, नैसर्गिकं स्वाभाविकम् उन्नतत्वं तत् एव तादृशमेव इत्यर्थः। कुमारः बालकः, प्रवर्त्तितः उत्पादितः दीपः प्रदीपात् स्वोत्पादकदीपात् इव, स्वात् स्वकीयात्। पूर्व्वादिभ्यो नवभ्यो वेति स्माङ्गावो वैकल्पिकः। कारणात् जनकात् न विभिदे भिन्नो नाभूत्, सर्व्वांशेना तादृश एवाभूत् इत्यर्थः॥३७॥

उपात्तेति। गुरुभ्यः विधिवत् यथाशास्त्रम् उपात्तविद्यं लब्धविद्यम्। यौवनस्य उद्भेदात् आविर्भावात् हेतोः विशेषेण कान्तं सौम्यं तम् अजं प्रति साभिलाषा अपि श्रीः, धीरा स्थिरा उन्नतचित्ता। "स्थिरा चित्तोन्नतिर्या तु तद्धैर्य्यमिति संज्ञितम्" इति भूपालः। कन्या पितुः इव, गुरोः रघोः अनुज्ञाम् आचकाङ्क्ष इयेष। यौवराज्याहोंऽभूत् इत्यर्थः। अनुज्ञाशब्दात् पिढपारतन्त्र्यानुपमासामर्थ्यात् पाणिग्रहण-योग्यता च ध्वन्यते ॥ ३८ ॥

अथेश्वरेण क्रथकैशिकानां(१)
स्वयंवरार्थं स्वसुरिन्दुमत्याः ।
आप्तः कुमारानयनोत्सुकेन
भोजेन दूतो रघवे विसृष्टः ॥ ३९
तं श्लाघ्यसम्बन्धमसौ विचिन्त्य
दारक्रियायोग्यदशञ्च पुत्रम् ।
प्रस्थापयामास ससैन्यमेनम्
कृद्धां विदर्भाधिपराजधानीम्(२) ॥४०॥

अथेति । अथ स्वसुः भगिन्याः इन्दुमत्याः स्वयंवरार्थं कुमारस्य अजस्य आनयने उत्सुकेन क्रथकैशिकानां विदर्भदेशानाम् ईश्वरेण स्वामिना भोजेन राज्ञा आप्तः हितः दूतः रघवे विसृष्टः प्रेषितः । क्रियामात्रयोगेऽपि चतुर्थी ॥ ३९ ॥

तमिति । असौ रघुः तं भोजं श्लाघ्यसम्बन्धम् अनूचान(२)त्वादिगुणयोगात् स्पृहणीयसम्बन्धं विचिन्त्य विचार्य पुत्रं च दारक्रियायोग्यदशं विवाहयोग्यवयसं विचिन्त्य ससैन्यम् एनं पुत्रम् कृद्धां समृद्धां विदर्भाधिपस्य भोजस्य राजधानीं पुरीं प्रस्थापयामास । धीयतेऽस्यामिति धानी । करणाधिकरणयोरिति अधिकरणे ल्युट्प्रत्ययः । राज्ञां धानी हि विषयः ॥४०॥

(1) Kratha and Kaisika were the sons of Vidarbha (a king of yadava branch of the lunar dynasty) ; and the name क्रथकैशिक is applied to the people and country of Vidarbha, the modern Berar.

(2) It was a large and powerful, kingdom, The name

तस्योपकार्य्यरचितोपचारा
वन्येतरा जानपदोपदाभिः।
मार्गे निवासा मनुजेन्द्रसूनोः
बभूवुरुद्यानविहारकल्पाः॥ ४१॥

तस्येति। उपकार्य्यासु राजयोग्येषु पटभवनादिषु। "सौधोऽस्त्री राजसदनमुपकार्य्योपकारिका" इति अमरवचनव्याख्याने क्षीरस्वामी, उपक्रियते उपकरोति वा पटमण्डपादि राजसदनमिति। रचिताः उपचाराः शयनाद्यः यैषु ते तथोक्ताः जानपदानां जनपदेभ्यः आगतानाम् उपदाभिः उपायनैः वन्याः वने भवाः इतरे येषां ते वन्येतराः अवन्याः इत्यर्थः। न बहुव्रीहाविति सर्वनामसंज्ञानिषेधः। तत्पुरुषे सर्वनामसंज्ञा दुर्वारैव। तस्य मनुजेन्द्रसूनोः अजस्य मार्गे निवासाः वासनिकाः उद्यानानि आक्रीडाः। "पुमानाक्रीड उद्यानम्" इत्यमरः। तानि एव विहाराः विहारस्थानानि तत्कल्पाः तत्सदृशाः इत्यर्थः। ईषदसमाप्ताविति कल्पप्प्रत्ययः। बभूवुः॥ ४१॥

---

remains in Beder which may have been the ancient capital. Vidarbha seems to have corresponded with the great part of Berar and Khandesh. Jayamagha father of Vidarbha having received nothing from his father went forth to settle where he might. He conquered the country along the Narmada and Rikshavat mountains and dwelt in Suktimati. The Bhojas, were the discendants of Mahabhoja, a pious prince of the yadava line, and they were called Mrittikavates, being the princes of Mrittikavati by the Parnasa, a river in Malwa. See V. P. Book IV. Chap. XIII.

स नर्मदारोधसि सीकरार्द्रैः
मरुद्भिरानर्त्तितनक्तमालैः ।
निवेशयामास विलङ्घिताध्वा
क्लान्तं रजोधूसरकेतु सैन्यम् ॥ ४२ ॥
अधोपरिष्टाद् भ्रमरैर्भ्रमद्भिः
प्राक्सूचितान्तःसलिलप्रवेशः ।
निर्धौतदानामलगण्डभित्तिः
वन्यः सरित्तो गज उन्ममज्ज ॥ ४३ ॥

स इति । विलङ्घिताध्वा अतिक्रान्तमार्गः स अजः सीकरार्द्रैः शीतलैः इत्यर्थः मरुद्भिः वातैः आनर्त्तिताः कम्पिताः नक्तमालाः चिरविल्वाख्यवृक्षभेदाः । "चिरविल्वो नक्तमालः करजश्च करञ्जके" इत्यमरः। यस्मिन् तस्मिन् निवेशार्हे इत्यर्थः। नर्मदायाः रोधसि रेवायाः तीरे क्लान्तं श्रान्तं रजोभिः धूसराः केतवः ध्वजाः यस्य तत् सैन्यं निवेशयामास ॥ ४२ ॥

अधेति । अध उपरिष्टात् ऊर्द्धम् । उपर्य्युपरिष्टादिति निपातः । भ्रमद्भिः मदलोभात् इति भावः । भ्रमरैः प्राक् उन्मज्जनात् पूर्वं सूचितः ज्ञापितः अन्तःसलिले प्रवेशः यस्य सः तथोक्तः निर्धौतदाने क्षालितमदे अत एव अमले गण्डभित्तौ यस्य स तथोक्तः । "दानं गजमदे त्यागे" इति शाश्वतः । प्रशस्तौ गण्डौ गण्डभित्तौ । "प्रशंसावचनैश्च" इति समासः । भित्तिशब्दः प्रशस्तार्थः । तथा च गण्यरत्नमहोदधौ, "मतङ्गजको-

निःशेषविच्छालितधातुनापि
वप्रक्रियामृक्षवतस्तटेषु (१) ।
नीलोर्ध्वरेखाश्वलेन शंसन्
दन्तद्वयेनाश्मविकुण्ठितेन ॥ ४४ ॥
संहारविक्षेपलघुक्रियेण
हस्तेन तीराभिमुखः सशब्दम् ।

द्वमित्याः स्युः प्रकाण्डस्थलभित्तयः" इति । भित्तिः प्रदेशो वा । "भित्तिः प्रदेशे कुड्येऽपि" इति विश्वः । निर्द्दीतदानेन अमदा गण्डभित्तिः यस्य इति वा । वन्यः गजः सरित्तः नर्म्मदायाः सकाशात् । पञ्चम्यास्तसिल्प्रत्ययः । उन्मज्ज उत्थितः ॥ ४३ ॥

निःशेषेति । कथम्भूतो गजः, निःशेषविच्छालितधातुना अपि धौतगैरिकादिना अपि नीलाभिः ऊर्द्ध्वाभिः रेखाभिः तटाभिघातजनिताभिः श्वलेन कर्बुरेण । "चित्रं किम्मीरकल्माषश्वलैताश्च कर्बुरे" इत्यमरः । अश्मभिः पाषाणैः विकुण्ठितेन कुण्ठीकृतेन दन्तद्वयेन ऋक्षवान् नाम कश्चित् तच्चयः पर्व्वतः तस्य तटेषु वप्रक्रियां वप्रक्रीड़ाम् उत्खातकेलिम् इत्यर्थः । "उत्खातकेलिः शृङ्गादेर्वप्रक्रीड़ा निगद्यते" इति शब्दार्णवः । शंसन् कथयन् सूचयन् इत्यर्थः । सशब्दम् । ॥ ४४ ॥

संहारेति । संहारविक्षेपयोः सङ्कोचनप्रसारणयोः लघु-

(1) Rikshavan (meaning abounding in bears) is one of the Kulachalas of India ; it is identified by Professor Wilson with the mountains of Gondvana.

बभौ स भिन्दन् द्रुततरङ्गान्
वार्य्यर्गलाभङ्गः(१) इव प्रवृत्तः ॥ ४५ ॥
शैलोपमः शैवलमञ्जरीणां
जालानि कर्णेन रसा स पश्चात् ।
पूर्वं तदुत्पीडितवारिराशिः
सरित्प्रवाहस्तटमुत्ससर्प ॥ ४६ ॥
तस्यैकनागस्य(२) कपोलभित्त्योः
जलावगाहक्षणमोक्षशान्ता ।

क्रियेण क्षिप्रव्यापारेण । "लघुक्षिप्रमरं द्रुतम्" इत्यमर. । हस्तेन शुण्डादण्डेन । "हस्तो नक्षत्रभेदे स्यात् करेभकरयोरपि" इति विश्व । सम्यक् सपीपं द्रुततः तरङ्गान् भिन्दन् विदारयन् तीराभिमुख. स गज,, वारी गजबन्धनस्थानम् । "वारी तु गजबन्धनी" इति यादव. । वार्या. अर्गलाया. विष्कम्भस्य भङ्गे भञ्जने प्रवृत्त. इव, बभौ ॥ ४५ ॥

शैलेति । शैलोपम. स गज. शैवलमञ्जरीणां जालानि हृद्यानि उरसा कर्णेन पश्चात् तटम् उत्ससर्प पूर्वं तेन गजेन उत्पीडित. मुक्त. वारिराशिः यस्य स. सरित्प्रवाहः तटम् उत्ससर्प ॥ ४६ ॥

तस्येति। तस्य एकनागस्य एकाकिन. गजस्य कपोलभित्त्यो.

---

(१) वारी गजबन्धनी चैव यवना तथा भङ्गे इति दिनकरः ।

(२) यत्र एव तुल्य नागस्य, 'एवे तुल्यार्थकेवला' इत्यमर. ।

वन्येतरानेकपदर्शनेन
पुनर्दिदीपे मददुर्दिनश्रीः ॥ ४७ ॥
सप्तच्छदक्षीरकटुप्रवाहम्(१)
असह्यमाघ्राय मदं तदीयम् ।
विलङ्घिताधोरणतीव्रयत्नाः (२)
सेनागजेन्द्रा विमुखा बभूवुः ॥ ४८ ॥

जलावगाहेन क्षणमात्रं शान्ता निवृत्ता मददुर्दिनश्रीः मदवर्षलक्ष्मीः वन्येतरेषां ग्राम्याणाम् अनेकपानां द्विपानां दर्शनेन पुनः दिदीपे प्रज्वलितेव ॥ ४७ ॥

सप्तच्छदेति। सप्तच्छदस्य वृक्षविशेषस्य क्षीरवत् कटुः सुरभिः प्रवाहः प्रसारः यस्य तम्। "कटुतिक्तकषायास्तु सौरभ्येऽपि प्रकीर्त्तिताः" इति यादवः। असह्यं तदीयं मदम् आघ्राय सेनागजेन्द्राः विलङ्घितः तिरस्कृतः आधोरणानां हस्तिपकानां तीव्रः महान् यत्नः यैः ते तथोक्ताः सन्तः। "आधोरणा हस्तिपका हस्त्यारोहा निषादिनः" इत्यमरः। विमुखाः पराङ्मुखाः बभूवुः ॥ ४८ ॥

---

(१) सप्तच्छदक्षीरस्य बलवत्तु तीव्रः, न सुरभिः। तीव्रमदमाघ्रायैव सेनागजानां विमुखत्वं युज्यते। अतः "क्षीरवत् कटुः सुरभिः" इति यत् टीकाकारेण व्याख्यातं तच्चिन्त्यम्।

(२) धाङ्पूर्वकात् धीरवेर्गतिविशायुपसर्गकादनट्। यद्वा बलानां गतिघातश्चेत् आगतौ उपादिमयि च स एवाधोरणः।

स छिन्नबन्धद्रुतयुग्यशून्यं
भग्नाक्षपर्य्यस्तरथं क्षणेन ।
रामापरित्राणविहस्तयोधं
सेनानिवेशं तुमुलं चकार ॥ ४९ ॥
तमापतन्तं नृपतेरवध्यः
वन्यः करीति श्रुतवान् कुमारः ।
निवर्त्तयिष्यन् विशिखेन कुम्भे
जघान नात्यायतकृष्टशार्ङ्गः ॥ ५० ॥

स इति । स गजः छिन्नाः बन्धाः यैः ते छिन्नबन्धाः द्रुताः पलायिताः युगं वहन्तीति युग्याः वाहा यस्मिन् सः चासौ शून्यश्च तं, भग्नाः अक्षाः (१) रथावयवाः दारुविशेषाः । "अक्षौ रथस्यावयवे पाशकेऽप्यक्षमिन्द्रियम्" इति मात्स्यतः । यैषां ते भग्नाक्षाः अत एव पर्य्यस्ताः पतिताः रथाः यस्मिन् तं रामाणां स्त्रीणां परित्राणे संरक्षणे विहस्ताः व्याकुलाः । "विहस्तव्याकुलौ समौ" इत्यमरः । योधाः यस्मिन् तं सेनानिवेशं शिविरं क्षणेन तुमुलं सङ्कुलं चकार ॥ ४९ ॥

तमिति । नृपतेः राज्ञः वन्यः करी अवध्यः इति श्रुतवान् मात्स्यात् ज्ञातवान् कुमारः आपतन्तम् अभिधावन्तं तं गजं निवर्त्तयिष्यन् न तु मारयिष्यन् अत एव नात्यायतम् अतिदीर्घं यथा स्यात् । नञर्थस्य नशब्दस्य सुप्सुपेति समासः ।

(१) यथा पुत्रजीवका इति दिनकरः ।

स विद्धमात्रः किल नागरूपम्
उत्सृज्य तद्विस्मितसैन्यदृष्टः।
स्फुरत्प्रभामण्डलमध्यवर्त्ति
कान्तं वपुर्व्योमचरं(१) प्रपेदे ॥ ५१ ॥
अथ प्रभावोपनतैः कुमारं
कल्पद्रुमोत्थैरवकीर्य्य पुष्पैः।
उवाच वाग्मी दशनप्रभाभिः
संवर्द्धितोरःस्थलतारहारः ॥ ५२ ॥

ईषदाकृष्टचापः सन् विमुखेन बाणेन कुम्भे जघान। अत्र चाक्षुषः। "लक्ष्मीकामो युद्धादन्यत्र करिवधं न कुर्य्यात् श्रियं हि श्रीर्यै करिणः", इति। अत एव युद्धादन्यत्रेति द्योतनार्थमेव वन्यग्रहणं कृतम् ॥ ५० ॥

स इति। स गजः विद्धमात्रः ताड़ितमात्रः किल न तु प्रहृतः तथापि नागरूपं गजशरीरम् उत्सृज्य तेन वृत्तान्तेन विस्मितैः तद्विस्मितैः सैन्यैः दृष्टः सन् स्फुरतः प्रभामण्डलस्य मध्यवर्त्ति कान्तं मनोहरं व्योमचरं वपुः प्रपेदे प्राप ॥ ५१ ॥

अथेति। अथ प्रभावेन उपनतैः प्राप्तैः कल्पद्रुमोत्थैः कल्पवृक्षोत्पन्नैः पुष्पैः कुमारम् अजम् अवकीर्य्य अभिहत्य दशनप्रभाभिः दन्तकान्तिभिः संवर्द्धिताः उरःस्थले ये तारहाराः

(१) व्योमि चे चरतीति व्योमचरं दिव्यम्।

मतङ्गशापादवलेपमूलात्
अवाप्तवानस्मि मतङ्गजत्वम् ।
अवेहि गन्धर्वपतेस्तनूजं(१)
प्रियंवदं मां प्रियदर्शनस्य ॥ ५३ ॥
स चानुनीतः प्रणतेन पश्चात्
मया महर्षिर्मृदुतामगच्छत् ।

स्थूलमुक्ताहाराः ते येन स तथोक्तः, वाचोऽस्य सन्तीति वाग्मी वक्ता । "वाचोग्मिनि," इति ग्मिनिः । स पुरुषः उवाच ॥५२॥

मतङ्गेति । अवलेपमूलात् गर्व्वहेतुकात् । "अवलेपस्तु गर्वे स्याद्भूषणेऽपि च" इति विश्वः । मतङ्गस्य मुनेः शापात् मतङ्गजत्वम् अवाप्तवान् अस्मि, मा प्रियदर्शनस्य प्रियदर्शनाख्यस्य गन्धर्वपतेः गन्धर्वराजस्य(२) तनूजं पुत्रम् । "स्त्रियां मूर्त्तौ तनुस्तनूः" इत्यमरः । तन्वादेर्वेत्यूङिति केचित् । प्रियंवदं प्रियवदाख्यम् अवेहि जानीहि । प्रियं वदतीति प्रियंवदः । "प्रियवशे वदः खच्" इति खच्प्रत्ययः ॥ ५३ ॥

स इति । स महर्षिश्च प्रणतेन मया अनुनीतः सन् पश्चात् मृदुतां शान्तिम् अगच्छत्, तथाहि जलस्य उष्णत्वम् अग्नेः

(1) The Gandharvas live in the sky, guard the Soma, and are governed by Varuna In epic poetry, they are the celestial musicians, or heavenly singers, who form the orchestra at the banquets of the gods and they belong, together with the Apsaras (their wives), to Indras' heaven, sharing also in his battles. See William's Sans, Dic. See also my note on Apsara further on

(2) चित्ररथस्य ।

उष्णत्वमग्नेरातपसंप्रयोगात्
शैत्यं हि यत् सा प्रकृतिर्जलस्य ॥ ५४ ॥
इक्ष्वाकुवंशप्रभवो यदा ते
भेत्स्यत्यजः कुम्भमयोमुखेन।
संयोक्ष्यसे स्वेन वपुर्महिम्ना
तदेत्यवोचत् स तपोनिधिर्माम् ॥ ५५ ॥
संमोचितः सत्ववता त्वयाहं
शापाच्चिरप्रार्थितदर्शनेन।
प्रतिप्रियं चेद्भवतो न कुर्यां
वृथा हि मे स्यात् सपदोपलब्धिः ॥ ५६ ॥

आतपस्य वा संप्रयोगात् सम्पर्कात् न तु प्रकृत्या उष्णत्वं, यत् शैत्यं सा प्रकृतिः स्वभावः। विधेयप्राधान्यात् सेति स्त्रीलिङ्ग-निर्देशः। महर्षीणां शान्तिरेव स्वभावो न क्रोधः इत्यर्थः ॥५४॥

इक्ष्वाकिति। इक्ष्वाकुवंशः प्रभवः यस्य स अजः यदा ते कुम्भम् अयोमुखेन लोहाग्रेण शरेण भेत्स्यति विदारयिष्यति तदा स्वेन वपुषः महिम्ना पुनः संयोक्ष्यसे संङ्गंस्यसे इति स तपोनिधिः माम् अवोचत् ॥ ५५ ॥

संमोचित इति। चिरं प्रार्थितं दर्शनं यस्य तेन सत्ववता बलवता त्वया अहं शापात् संमोचितः मोक्षं प्रापितः, भवतः प्रतिप्रियं प्रत्युपकारं न कुर्यां चेत्, मे सपदोपलब्धिः सोपान-

संमोहनं (१) नाम सखे ममास्त्रं
प्रयोगसंहारविभक्तमन्त्रम् ।
गान्धर्व्वमादत्स्व यतः प्रयोक्तुः
नचारिहिंसा विजयश्च हस्ते ॥ ५७ ॥
अलं ह्रिया मां प्रति(२) यन्मुहूर्त्तं
दयापरोऽभूः प्रहरन्नपि त्वम् ।
तस्मादुपच्छन्दयति प्रयोज्यं
मयि त्वया न प्रतिषेधरौक्ष्यम् ॥ ५८ ॥

प्राप्तिः । "पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः । हया स्यात् हि । तदुक्तम्, "प्रतिकर्त्तुमयक्तस्य जीवितान्मरणं वरम्" इति ॥ ५६ ॥

संमोहनमिति । हे सखे सखिशब्देन समप्राणतोक्ता । यथोक्तम्, "अत्यागसहनो बन्धुः सदैवानुमतः सुहृत् । एकक्रियं भवेन्मित्रं समप्राणः सखा मतः" ॥ इति । प्रयोगसंहारयोः विभक्तमन्त्रं गान्धर्व्वं गन्धर्व्वदेवताकंसंमोह्यते अनेन इति संमोहनं नाम मम अस्त्रम् आदत्स्व गृहाण, यतः अस्मात् प्रयोक्तुः अस्त्रप्रयोगिणः अरिहिंसा न च, विजयश्च हस्ते हस्तगतो विजयो भवति इत्यर्थः ॥ ५७ ॥

"वधलज्जितः कथमस्त्रग्रहणपरः स्यामिति चेत् तत्राह, अलमिति । किंच, मां प्रति ह्रिया प्रहारनिमित्तया अलम् ।

(१) "इत्यापाठमन्त्रम्" इति दिनकरः ।
(२) 'मां प्रति दयापरोऽभूस्त्वमपी दिनकरेणानुमतः ।

तथेत्युपस्पृश्य पयः पवित्रं
सोमोद्भवायाः(१) सरितो नृसोमः ।
उदङ्मुखः सोऽस्खविदस्खमन्त्रं
जजाप तस्मान्निगृहीतशापात् (२) ॥ ५९ ॥

कुतः यत् यतः हेतोः त्वं मां प्रहरन् अपि मुहूर्तं दयापरः कृपालुः अभूः, तस्मात् उपच्छन्दयति प्रार्थयमाने मयि त्वय प्रतिषेधः परिहारः स एव रौक्ष्यं पारुष्यं तत् न प्रयोज्यं न कर्त्तव्यम् ॥ ५८ ॥

तथेति । नृसोमः चन्द्रः इव नृसोमः । उपमितसमासः । "सोम ओषधिचन्द्रयोः". इति शाश्वतः । पुरुषश्रेष्ठः इत्यर्थः ।

(1) Williams says the river Narmada is called सोमोद्भवा, either because it is supposed to spring from the moon, or because it is considered to be the source of the celestial nectar सोम. The Narmada is also called मेखलकन्यका, because it issues from a hill called मेखल or मेकल. Vishnupurana says, that it rises in the Vindhya mountains, while Vayupurana describes it as rising in the Riksha mountains in Gondvana. Mekhala is therefore either a part of the Vindhya or Riksha mountains. It was probably noted in olden times for सोमलता or moonplants; hence the Narmada may have been supposed to take its rise from Soma-juice, as the Jambunada is fabled to have issued from the juice of the fruits of the Jambutree growing at the confines of the Jambudvipa. But in the Vayu Purana it is said that "तृष्णा ये समादां ते सोमपाः वै वदेः सुताः,

एवं तयोरध्वनि दैवयोगात्
आसेदुषोः सख्यमचिन्त्यहेतु ।
एको ययौ चैत्ररथप्रदेशान्(१)
सौराज्यरम्यानपरो(२) विदर्भान् ॥ ६० ॥
तं तस्थिवांसं नगरोपकण्ठे
तदागमारूढगुरुप्रहर्षः ।

अस्खलित् अस्खन्नः स अजः तयेति, (तथास्तु इति) सोमः उद्भवः यस्याः सा तस्याः सोमोद्भवायाः सरितः नर्मदायाः । "रेवा तु नर्मदा सोमोद्भवा मेखलकन्यका" इत्यमरः । पवित्रं पयः उपस्पृश्य पीत्वा आचम्य इत्यर्थः । उदङ्मुखः सन् निगृहीतशापात् निवर्त्तितशापात् उपकृतात् इत्यर्थः । तस्मात् प्रियंवदात् अस्खलन्मन्त्रं जग्राह ॥ ५९ ॥

एवमिति । एवम् अध्वनि मार्गे दैवयोगात् दैवयशात् अचिन्त्यहेतु अनिर्ज्ञेयहेतुकं सख्यं सखित्वम् । सख्युर्यं इति यप्रत्ययः । आसेदुषोः प्राप्तवतोः तयोः मध्ये एकः गन्धर्वः चैत्ररथस्य कुबेरोद्यानस्य प्रदेशान् । अस्योद्यानं "चैत्ररथम्" इत्यमरः । अपरः अजः सौराज्येन राजन्वत्तया रम्यान् विदर्भान् विदर्भदेशान् ययौ ॥ ६० ॥

तमिति । नगरस्य उपकण्ठे समीपे तस्थिवांसं स्थितं

---

(१) चित्ररथस्य गन्धर्वपतेरिमे चैत्ररथाः तान् । चित्ररथवनात्र प्रियदर्शनगतार्थिदृक् । चैत्ररथस्य कुबेरोद्यानस्य प्रदेशानिति टीकाकारैरेव मूलमेव तथा समीक्षणम् ।

(२) सु सौष्ठवः राज्ञा सुराज्ञा तस्य भावः सौराज्यं ।

प्रत्युज्जगाम क्रथकैशिकेन्द्रः
चन्द्रं प्रहर्षोर्मिरिवोर्मिमाली ॥ ६१ ॥
प्रवेश्य चैनं पुरमग्रयायी
नीचैस्तथोपाचरदर्पितश्रीः (१) ।
मेने यथा तत्र जनः समेतः
वैदर्भमागन्तुमजं गृहेशम् ॥ ६२ ॥
तस्याधिकारपुरुषैः प्रणतैः प्रदिष्टां
प्राग्द्वारवेदिविनिवेशितपूर्णकुम्भाम् (२) ।

तम् अजं तस्य अजस्य आगमेन आगमनेन आरूढः उत्पन्नः गुरुः प्रहर्षः यस्य सः क्रथकैशिकेन्द्रः विदर्भराजः, प्रहर्षोर्मिः ऊर्मिमाली समुद्रः चन्द्रम् इव प्रत्युज्जगाम ॥ ६१ ॥

प्रवेश्येति । एनम् अजम् अग्रयायी सेवाधर्म्मेण पुरो गच्छन् इत्यर्थः नीचैः नम्रः पुरं प्रवेश्य प्रवेशं कारयित्वा प्रीत्या अर्पितश्रीः तथा तेन प्रकारेण उपाचरत् उपचरितवान् यथा येन प्रकारेण तत्र पुरे समेतः मिलितः जनः वैदर्भं भोजम् आगन्तुं प्राघुणिकं मेने, अजं गृहेशं गृहपतिं मेने ॥ ६२ ॥

तस्येति । रघुप्रतिनिधिः रघुकल्पः रघुतुल्यः इत्यर्थः ।

---

(१) अर्पिता अजाय दत्ता श्रीः राजलक्ष्म्यसम्पत्तिः निजानुचरवर्गपालनप्रजारञ्जनादिरूपा येन तथोक्तः ।

(२) प्राक् द्वारं यस्याः सा प्राग्द्वारा, सा चासौ वेदिश्च । तत्र विनिवेशितः क्षेपः पूर्णः यस्याः सा इति विग्रहः ।

रम्यां रघुप्रतिनिधिः स नवोपकार्यां
बालात् परामिव दशां मदनोऽध्युवास ॥ ६३ ॥
तत्र स्वयंवरसमाहृतराजलोकं
कन्यालला(१)म कमनीयमजस्य लिप्सोः ।
भावावबोधकलुषा दयितेव रात्री
निद्रा चिरेण नयनाभिमुखी बभूव ॥ ६४ ॥

उल्लङ्घ दण्डिना सादृश्यवाचकप्रस्तावे, "कल्पदेशीयदेश्यादि-प्रख्यप्रतिनिधी अपि" इति । सः अजः प्रणतैः नमस्कृतवद्भिः । कर्त्तरि क्तः । तस्य भोजस्य अधिकारः नियोगः तस्य पुरुषैः अधिकृतैः इत्यर्थः । मदिष्टां निर्दिष्टां प्राग्द्वारस्य वेद्यां विनिवेशितः प्रतिष्ठापितः पूर्णकुम्भः यस्याः तां स्थापितमङ्गलकलशाम् इत्यर्थः । रम्यां रमणीयां नवोपकार्यां नूतनं राजभवनम् । "उपकार्यां राजसद्मन्युपचारचितेऽन्यवत्" इति विश्वः । मदनः बाल्यात् परां यौवनात् अनन्तरां दशाम् इव यौवनम् इव इत्यर्थः अध्युवास अधिष्ठितवान् तत्रोषितवान् इत्यर्थः । "उपान्वध्याङ् वसः" इति कर्मत्वम् ॥ ६३ ॥

तत्रेति । तत्र उपकार्यायां स्वयंवरनिमित्तं समाहृतः संमेलितः राजलोकः येन तत् कमनीयं स्पृहनीयं कन्यालला(१)म कन्यासु श्रेष्ठम् । "ललामोऽस्त्री ललामापि प्रभावे पुरुषे ध्वजे । श्रेष्ठभूषाणपङ्क्तिपुच्छचिह्नाग्रलिङ्गिषु" ॥ इति

(1) Śaṅkara explains this by "dissatisfied with her husband by her knowledge of his infidelity."

तं कर्णभूषणनिपीड़ितपीवरांसं
शय्योत्तरच्छदविमर्दकृशाङ्गरागम् ।
सूतात्मजाः(१) सवयसः प्रथितप्रबोधं
प्रावोधयन्नुषसि वाग्भिरुदारवाचः ॥ ६५ ॥
रात्रिर्गता मतिमतां वर मुञ्च शय्यां
धात्रा द्विधैव ननु धूर्जगतो विभक्ता ।

यादवः । लिप्सोः लब्धुम् इच्छोः । लभेः सनन्ताद्उप्रत्ययः । अजस्य भावावबोधे पुरुषस्य अभिप्रायपरिज्ञाने कलया अल्पमर्या दयिता इव, रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव । "राजानं कामिनं चौरं प्रविशन्ति प्रजागराः" इति भावः । अभिमुखीभवन्ती ईषन्तः चुम्बन्ती वा ॥ ६४ ॥

तमिति । कर्णभूषणाभ्यां निपीड़ितौ पीवरौ पीनौ अंसौ यस्य तं शय्यायाः उत्तरच्छदस्य उपर्य्यास्तरणपटस्य विमर्देन घर्षेण कृशः विरलः अङ्गरागः यस्य तं, न त्वङ्गनासङ्गात् इति भावः । प्रथितप्रबोधं प्रकटज्ञानं तम् एनम् अजं सवयसः समानवयस्काः उदारवाचः प्रगल्भगिरः सूतात्मजाः वन्दिपुत्राः, वैतालिका इति वा पाठः । "वैतालिका बोधकराः" इत्यमरः । वाग्भिः स्तुतिपाठैः उषसि प्रावोधयन् प्रबोधयामासुः ॥ ६५ ॥

रात्रिरिति । हे मतिमतां वर, निर्द्धारणे षष्ठी । रात्रिः गता, शय्यां मुञ्च विनिद्रो भव इत्यर्थः । विनिद्रत्वे फलमाह,

(1) A Suta was both a bard and a charioteer. The patriarch of the race was लोमहर्षण, who recited the Puranas to Saunaka and

तामेकतस्तव विभर्त्ति गुरुर्विनिद्रः
तस्या भवानपरधुर्य्यपदावलम्बी ॥ ६६ ॥
निद्रावशेन भवतान्यनपेक्षमाणा
पर्य्युत्सुकत्वमबला निशि खण्डितेव ।

धात्रेति । धात्रा ब्रह्मणा जगतः धूः भारः । "धूः स्यादानमुखे भारे" इति यादवः । द्विधा एव द्वयोरेव इत्यर्थः । एवकारः तृतीयनिषेधार्थः । विभक्ता ननु विभज्य स्थापिता खलु । तत् किमत आह, तां धुरम् एकतः एककोटौ तव गुरुः पिता विनिद्रः सन् बिभर्त्ति, तस्याः धुरः भवान् धुरं वहतीति धुर्य्यः भारवाही तस्य पदं वहनस्थानम् अपरं यत् धुर्य्यपदं तदवलम्बी ततो विनिद्रो भव इत्यर्थः । न ह्युभयवाह्यम् एको वहति इति भावः ॥ ६६ ॥

निद्रेति । चन्द्रारविन्दराजवनादयो लक्ष्मीनिवासस्थानानीति प्रसिद्धिमाश्रित्योच्यते । निद्रावशेन निद्राधीनेन स्वरन्तरासङ्गो ध्वन्यते । भवता पर्य्युत्सुकत्वम् अपि त्वय्यनुरक्तत्वमपि

---

his companions in the Naimisaranya in Oude. "ब्राह्मण्यात् पुराणादि श्रुतौ वै सौमदर्शनः । सूतायां क्षत्रियात् पुत्रः मौग्रपायन: । क्षत्रबीज्य सावर्णिः षट् शिष्यास्तस्य चाभवन्" इति । This caste was originated both from Brahmans and Kshatriyas as observed by the sage याज्ञवल्क्य (ब्राह्मण्यां क्षत्रियात् सूतः). The dignity of their office and the sacredness of their person are evinced by the following verses quoted from the Vayupurana. "वैवस्वतस्य यज्ञेऽस्मिन् वर्त्तमाने महात्मनः । सूतायामभवत् पुत्रः प्रथमं वर्षकर्त्तृकः । ऐन्द्रेण हविषा तस्य ऋषिः पुत्रं व्यजायत । पुरा-वेदार्थ दैवेन ततः स्तुतो व्यजायत । विष्वक्सेनेन सम्भूतमभिभूतं गुरोर्हविः । चक्रीवत्यारेण जगे तत् वर्षकर्त्तृकं" । सूतायां यज्ञस्वामे सूतवर्षः ।

लक्ष्मीर्विनोदयति येन दिगन्तलम्बी
सोऽपि त्वदाननरुचिं विजहाति चन्द्रः(१) ॥६७॥

इत्यर्थः। प्रसितोत्सुकाभ्यां द्वतीया चेति सप्तम्यर्थे द्वतीया। अपिशब्दस्त्वद्विषयानुरागस्यानुपेक्षत्वद्योतनार्थः। निशि खण्डिता भर्तुः अन्यासङ्गज्ञानकलुषिता अबला इव नायिका इव। "ज्ञातेऽन्यासङ्गविक्लवे खण्डितेर्ष्याकषायिता" इति दशरूपके। अनपेक्षमाणा अविचारयन्ती सतो उपेक्षमाणा इत्यर्थः लक्ष्मीः येन चन्द्रेण सह त्वदाननसदृश्यत्वात् इति भावः विनोदयति विनोदं करोति। विनोदशब्दात् "तत् करोति तदाचष्टे" इति णिच्। सादृश्यदर्शनादयो हि विरहिणां विनोदस्थानानि इति भावः। स चन्द्रोऽपि दिगन्तलम्बी पश्चिमाशां गतः सन् अस्तं गच्छन् इत्यर्थः अत एव त्वदाननरुचिं विजहाति त्वन्मुखसादृश्यं त्यजति इत्यर्थः। अतो निद्रां विहाय तां लक्ष्मीमनन्यशरणां परिगृहाण इति भावः। अथवा निद्रावशेन भवता अनपेक्ष्यमाणा अनिरीक्ष्यमाणा। कर्मणि शानच्। लक्ष्मीः प्रयोजककर्त्री येन चन्द्रेण प्रयोज्येन पर्य्युत्सुकत्वं त्वद्विरहवेदनाम्। "कालाक्षमत्वमौत्सुक्यं मनस्तापज्वरादिकृत्" इत्यलङ्कारे।

(1) Dinakara says that this stanza is an interpolation (क्षेपोऽयम्) He explains अनपेक्षमाणा by अनभिलषन्ती। Vallabha reads "भवता अनपेक्षमाणा" and explains it saying भवता निद्रावशेन अनपेक्षमाणा अवीक्ष्यमाणा सती &c। He explains खण्डिता by quoting "निद्रावशात्सुप्तेऽन्यासङ्गतिलक्षणेन: वारोनखक्षतविशेषविचित्रिताङ्गः। यस्याः कुतोऽपि गतमेति हृतिः प्रमाष्टे सा खण्डितेति कथिता कविभिः पुराणैः॥"

तद्वल्गुना युगपदुन्मिषितेन तावत्
सद्यः परस्परतुलामधिरोहतां द्वे ।
प्रस्पन्दमानपरुषेतरतारमन्तः
चक्षुस्तव प्रचलितभ्रमरञ्च पद्मम् ॥ ६८ ॥
हन्ताच्छुथं हरति पुष्पमनोकहानां(१)
संसृज्यते सरसिजैरुणांशुभिन्नैः ।

विनोदयति निरासयतीति योजना । शेषं पूर्ववत् । नाथस्तु, "अर्थोपपत्तिमपश्यन् इमं पक्षमुपेक्षिष्ट" ॥ ६७ ॥

तदिति । तत् तस्मात् लक्ष्मीपरिग्रहणात् वल्गुना मनोज्ञेन । "वल्गु स्याने मनोज्ञे च वल्गु भाषितमन्यवत्" इति विश्वः । युगपत् तावत् उन्मिषितेन युगपत् एव उन्मीलितेन सद्यः द्वे अपि परस्परतुलाम् अन्योन्यसादृश्यम् अधिरोहतां प्राप्नुताम् । प्रार्थनायां लोट् । के द्वे अन्तः प्रस्पन्दमाना चलन्ती परुषेतरा स्निग्धा तारा कनीनिका यस्य तथोक्तम् । "तारकाक्ष्णः कनीनिका" इत्यमरः । तव चक्षुः, अन्तः प्रचलितभ्रमरं चलद्भृङ्गं पद्मञ्च । युगपदुन्मेषे सति सम्पूर्णसादृश्यलाभः इति भावः ॥ ६८ ॥

हन्तादिति । विभातवायुः स्वाभाविकं नैसर्गिकं ते तव मुखमारुतस्य निश्वासपवनस्य सौरभ्यं तादृक् सौगन्ध्यम् इत्यर्थः परगुणेन अन्यदीयगुणेन सांक्रामिकगन्धेन इत्यर्थः ईप्सुः आप्तुमिच्छुः इव । आपॢप्यृधामीति ईकारादेशः । अनोकहानां वृक्षाणां अयं गिरिस्थं पुष्पं हन्तात् पुष्पबन्धनात् । "वृन्तं प्रसव-

(१) अनसा शकटानां अर्कं गतिं श्नोति अनोकहः । अनः शकटसारथीरित्यमरः ।

स्वाभाविकं परगुणेन विभातवायुः
सौरभ्यमीप्सुरिव ते मुखमारुतस्य ॥ ६९ ॥
ताम्रोदरेषु पतितं तरुपल्लवेषु
निर्धौतहारगुलिकाविशदं हिमाम्भः।
आभाति लब्धपरभागतयाऽधरोष्ठे
लीलास्मितं सदशनार्चिरिव त्वदीयम् ॥ ७० ॥
यावत् प्रतापनिधिराक्रमते न भानुः
अङ्काय तावदरुणेन तमो निरस्तम्।

वन्धनम्" इत्यमरः। हरति आदत्ते, "अरुणांशुभिर्वैः तरणिकिरणोद्बोधितैः सरसि जातैः सरसिजैः कमलैः सह। "तत्पुरुषे कृति बहुलम्" इति सप्तम्या अलुक्। संहृष्यते सङ्कुच्यते। हृषेर्दैवादिकात् कर्तरि लट् ॥ ६९ ॥

ताम्रेति। ताम्रोदरेषु अरुणाभ्यन्तरेषु तरुपल्लवेषु पतितं निर्धौता या हारगुलिका मुक्तामणयः तद्वत् विशदं हिमाम्भः लब्धपरभागतया लब्धोत्कर्षतया। "परभागो गुणोत्कर्षे" इति यादवः। अधरोष्ठे त्वदीयं सदशनार्चिः दन्तकान्तिसहितं लीलास्मितम् इव आभाति शोभते ॥ ७० ॥

यावदिति। प्रतापनिधिः तेजोनिधिः भानुः यावत् न आक्रमते न उद्गच्छति। "आङ उद्गमने" इत्यात्मनेपदम्। भानावनुदित एव इत्यर्थः। अङ्काय झटिति। "द्राक् झटित्यञ्जसाङ्काय" इत्यमरः। अरुणेन अनूरुणा। "सूरस्तोऽरुणोऽनूरुः" इत्यमरः।

आयोधनायसरतां(१) त्वयि वीर याते
किंवा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति ॥ ७१ ॥
शय्यां जहत्युभयपक्षविनीतनिद्राः(२)
स्तम्बेरमा मुखरशृङ्खलकर्षिणस्ते ।
येषां विभान्ति तरुणारुणरागयोगात्
भिन्नाद्रिगैरिकतटा इव दन्तकोशाः ॥ ७२ ॥

तावत् तमः निरस्तम् । तथाहि, हे वीर त्वयि आयोधनेषु युद्धेषु । "युद्धमायोधनं जन्यम्" इत्यमरः । अग्रसरतां पुरःसरतां याते सति तव गुरुः पिता रिपून् स्वयम् उच्छिनत्ति किंवा नोच्छिनत्त्येव इत्यर्थः । न खलु योग्यपुत्रन्यस्तभाराणां स्वामिनां स्वयं व्यापारखेदः इति भावः ॥ ७१ ॥

शय्यामिति । उभाभ्यां पक्षाभ्यां पार्श्वाभ्यां विनीता निद्रा येषां ते उभयपक्षविनीतनिद्राः । अत्र समासविषये उभशब्दस्थाने उभयशब्दप्रयोग एव साधुः इत्यनुसन्धेयम् । यथाह कैयटः, "उभादुदात्तो नित्यमिति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषये उभशब्दस्य प्रयोगो मा भूत् उभयशब्दस्यैव यथा स्यात् उभयपुत्र इत्यादि भवति" इति । मुखराणि उत्थानचलनात् शब्दायमानानि शृङ्खलानि निगडानि कर्षन्तीति तथोक्ताः ते तव स्तम्बे रमन्तीति स्तम्बेरमाः हस्तिनः । स्तम्बकर्णयोरमिजपोरित्यच्प्रत्ययः । हस्तिसूचकयोरिति वक्तव्यात् ।

(१) "त्वयि संग्रामावतीर्ण प्राप्ते सतीति" वल्लभः ।

(२) "विनीता विरिक्ता" इति दिनकरः ।

दीर्घेषुमौ नियमिताः पटमण्डपेषु
निद्रां विहाय वनजाश्च वनायुदेश्याः (१)।
वक्त्रोष्मणा मलिनयन्ति पुरोगतानि
लेह्यानि सैन्धवशिलाशकलानि वाहाः ॥ ७३ ॥
भवति विरलभक्तिर्मानपुष्पोपहारः

"द्रुमः स्तम्बेरमः पद्मी" इत्यमरः। तत्पुरुषे कृति बहुलमिति समस्या अलुक्। श्रव्यां जहति त्यजन्ति। येषां स्तम्बेरमाणां दन्ताः कोशाः इव दन्तकोशाः दन्तकुड्मलाः तरुणारुणरागयोगात् बालार्कारुणसम्पर्कात् हेतोः भिन्नाद्रिगैरिकतटाः इव विभान्ति धातुरक्ता इव भान्ति इत्यर्थः ॥ ७२ ॥

दीर्घेत्यिति। हे वनजाश्च नीरजाश्च "वनं नीरं वनं सलम्" इति शाश्वतः। दीर्घेषु पटमण्डपेषु नियमिताः बद्धाः वनायुदेश्याः वनायुदेशे भवाः। "पारसीका वनायुजाः" इति हलायुधः। अमी वाहाः अश्वाः निद्रां विहाय पुरोगतानि लेह्यानि आस्वाद्यानि सैन्धवशिलाशकलानि। "सैन्धवोऽश्मजे सितशिवं माणिमन्थश्च सिन्धुजः" इत्यमरः। वक्त्रोष्मणा मलिनयन्ति मलिनानि कुर्वन्ति। उक्तञ्च सिद्धयोगसंग्रहे, "पूर्वाह्णकाले घोटकानां प्रायशो लवणं हितम्। शूलगोहविबन्धघ्नं लवणं सैन्धवं वरम्" इत्यादि ॥ ७३ ॥

---

(1) The Vanayus were a people of the north-west of India, celebrated for their horses.

स्वकिरणपरिवेषोद्गन्धाः प्रदीपाः।
अयमपि च गिरं नरत्वत्प्रबोधप्रयुक्ताम्
अनुवदति शुकस्ते मञ्जुवाक् पञ्जरस्थः ॥ ७४ ॥
इति विरचितवाग्भिर्वन्दिपुत्रैः कुमारः
सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार।
मदपटु निनदद्भिर्बोधितो राजहंसैः
सुरगज इव गाङ्गं सैकतं सुप्रतीकः ॥ ७५ ॥

भवतीति। स्नानः पुष्पोपहारैः पुष्पपूजा स्नानत्वादेव विरलभक्तिः विरलरचनः भवति। प्रदीपाश्च स्वकिरणानां परिवेषस्य मण्डलस्य उद्वेदेन स्फुरणेन शून्याः भवन्ति निस्तेजस्का भवन्ति इत्यर्थः। अपि च अयं मञ्जुवाक् मधुरवचनः पञ्जरस्थः ते तव शुकः त्वत्प्रबोधनिमित्ते प्रयुक्ताम् उच्चारितां नः अस्माकं गिरं वाणीम् अनुवदति अनुकृत्य वदति इत्यर्थः। इत्थं प्रभातलिङ्गानि वर्त्तन्ते अतः प्रबोद्धव्यम् इति भावः ॥ ७४ ॥

इतीति। इति इत्थं विरचितवाग्भिः वन्दिपुत्रैः वैतालिकैः। पुत्रग्रहणं समानवयस्कत्वद्योतनार्थम्। सपदि विगतनिद्रः कुमारः तल्पं शय्याम्। "तल्पं शय्यादृदारेषु" इत्यमरः। उज्झाञ्चकार विससर्ज। इजादेश्च गुरुमतोऽनृच्छ इत्याम्प्रत्ययः। कथमिव मदेन पटु मधुरं निनदद्भिः राजहंसैः बोधितः सुप्रतीकाख्यः सुरगजः ऐरावतदिग्गजः गङ्गायाः इदं गाङ्गं सैकतं पुलिनम् इव। "तोयोत्थितं तत् पुलिनं सैकतं सिकतामयम्"

अथ विधिमवसाप्य शास्त्रदृष्टं
दिवसमुखोचितमन्वितार्चिषम्नाः।
कुशलविरचितानुकूलवेषः
क्षितिपसमाजमगात् स्वयंवरस्थम् ॥ ७६ ॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ अज-स्वयंवराभिगमनो नाम पञ्चमः सर्गः।

इत्यमरः। "सिकताश्मकराभ्यां च" इत्यण्प्रत्ययः। सुमतीकग्रहणं प्रायशः कैलासवासिनस्तस्य नित्यं गङ्गातटविहारसम्भवादित्यनुसन्धेयम् ॥ ७५ ॥

अथेति। अथ उत्थानानन्तरम् अन्वितानि चारूणि अर्चिःपक्ष्माणि यस्य स अजः शास्त्रे दृष्टम् अवगतं दिवसमुखोचितं प्रातःकालोचितं विधिम् अनुष्ठानम् अवसाय समाप्य। सतेर्ण्यन्तात् ल्यप्। कुशलैः प्रसाधनदक्षैः विरचितः अनुकूलः स्वयंवरोचितः वेषः नेपथ्यं यस्य स तथोक्तः सन् स्वयंवरस्थं क्षितिपसमाजं राजसमूहम् अगात् अगमत्। "इणो गा लुङि" इति गादेशः। पुष्पितायाहत्तमेतत् तल्लक्षणम्, "अयुजि नयुगरेफतोयकारो युजि च नजौ जरगाश्च पुष्पितायाः" इति ॥ ७६ ॥

इति श्रीमहामहोपाध्यायदक्षिणावर्तमल्लिनाथसूरि-विरचितायां रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायां पञ्चमः सर्गः।

षष्ठः सर्गः ।

स तत्र मञ्चेषु मनोज्ञवेषान्
सिंहासनस्थानुपचारवत्सु ।
वैमानिकानां मरुतामपश्यत्(१)
आकृष्टलीलान् नरलोकपालान् ॥ १ ॥

जाह्नवी मूर्द्धि पादे वा कालः कण्ठे वपुष्यथ ।
कामारिं कामतातं वा कस्मिन्हेवं जगामहे ॥

स इति । स अजः तत्र स्थाने उपचारवत्सु राजोपचारवत्सु मञ्चेषु पर्य्यङ्केषु सिंहासनस्थान् मनोज्ञवेषान् मनोहरनेपथ्यान् वैमानिकानां विमानैश्चरताम् । चरतीति ठक्प्रत्ययः । मरुताम् अमराणाम् । "मरुतो पवमामरौ" इत्यमरः । आकृष्टलीलान् गृहीतसौभाग्यान् आकृष्टमरुल्लीलान् इत्यर्थः । सापेक्षत्वेऽपि गमकत्वात् समासः । नरलोकं पालयन्तीति नरलोकपालाः । कर्म्मण्यण्प्रत्ययः । तान् भूपालान् अपश्यत् । सर्गेऽस्मिन्नुपजातिः छन्दः ॥ १ ॥

(1) In the vedic hymns the Maruts are represented as allies to Indra. They are called इन्द्रज्येष्ठा. having Indra for their senior, or chief, पृश्निमातरः having पृश्नि (earth) for their mother, and स्वरतः विद्युतो जाताः produced from the blazing lightning. The Maruts are invoked to kill वृत्र under Indra—"इन्द्रज्येष्ठा मरुद्गण वृत्रहणो वृषाकपेः । या नो दुःशंस ईशते" । Rig. i 23. 7 12. They are also represented as allied to Agni and described as conver-

रतेर्गृहीतानुनयेन कामं
प्रत्यर्पितस्वाङ्गमिवेश्वरेण।
काकुत्स्थमालोकयतां नृपाणां
मनो बभूवेन्दुमतीनिराशम् ॥ २ ॥

रतेरिति। "रतिः स्मरप्रियायाञ्च रागे च सुरते स्मृता" इति विश्वः। रतेः कामप्रियायाः गृहीतानुनयेन स्वीकृतप्रार्थनेन गृहीतरत्यनुनयेन इत्यर्थः। सापेक्षत्वेऽपि गमकत्वात् समासः। ईश्वरेण हरेण प्रत्यर्पितस्वाङ्गं कामम् इव स्थितं काकुत्स्थम् अजम् आलोकयतां नृपाणां मनः इन्दुमतीनिराशं वैदर्भीनिस्पृहं बभूव। इन्दुमती सत्पतिमेनं विहाय नान्यान् वरिष्यतीति निश्चिकुः इत्यर्थः। सर्व्वातिशयसौन्दर्य्यमस्य इति भावः ॥ २ ॥

---

sant with the phenomenon of rain, fierce-looking, unconquerable, devourers of foes, propelling the clouds, agitating the sea, sitting above the sun and extending to the sky with their rays. Rig i 19. 1-9. In the Puranas they are represented as sons of Diti and 49 in number. The story of their birth runs thus—Diti, retired one night without performing the ablution of her feet, and fell asleep. On which the Thunderer divided with his thunderbolt the embryo in her womb into seven portions. The child, thus mutilated, cried bitterly. Indra tried to console it by saying (मा रोदीः weep not), but failing in this, was so incensed as to divide each of the seven portions into seven, thereby calling into existence the forty-nine gods, known as Maruts. In later Sanskrit the word मरुत् came to be used as a term signifying gods in general,

वैदर्भनिर्दिष्टमसौ कुमारः
क्रमेण सोपानपथेन मञ्चम् ।
शिलाविभङ्गैर्मृगराजशावः
तुङ्गं नगोत्सङ्गमिवारुरोह(१) ॥ ३ ॥
पराङ्मुखवर्णास्तरणोपपन्नम्
आसेदिवान् रत्नवदासनं सः ।
भूयिष्टमासीदुपमेयकान्तिः
मयूरपृष्ठाश्रयिणा गुहेन ॥ ४ ॥

वैदर्भेति । असौ कुमारः वैदर्भेण भोजेन निर्दिष्टं प्रदर्शितं मञ्चं पर्यङ्कं क्रमेण सुविहितेन सोपानपथेन, मृगराजशावः सिंहपोतः । "पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः" इत्यमरः । शिलानां विभङ्गैः भङ्गीभिः तुङ्गम् उन्नतं नगोत्सङ्गं शैलाग्रम् इव, आरुरोह ॥ ३ ॥

पराङ्मुखेति । पराङ्मुखाः श्रेष्ठाः वर्णाः नीलपीतादयः यस्य तेन आस्तरणेन कम्बलादिना उपपन्नं सङ्गतं रत्नवत् रत्नखचितम् आसनं सिंहासनम् आसेदिवान् अधिष्ठितवान् स अजः मयूरपृष्ठाश्रयिणा गुहेन सेनान्या सह । "सेनानीरग्निभूर्गुहः" इत्यमरः । भूयिष्ठम् अत्यर्थम् उपमेयकान्तिः आसीत् । मयूरस्य विचित्ररूपत्वात् तत्साम्यं रत्नासनस्य तद्वारा च तदारूढयोरपि इति भावः ॥ ४ ॥

(१) "सोपीतृपदमप्यधिरुरोह साक्ष भद्रमधिरुहा" इत्यत्रापि उपरिभागरूपार्थे उत्तरपदमात्रं प्रयुक्तम् ।

तासु श्रिया(१) राजपरम्परासु
प्रभाविशेषोदयदुर्निरीक्ष्यः।
सहस्रधात्मा व्यरुचद्विभक्तः
पयोमुचां पङ्क्तिषु विद्युतेव ॥ ५ ॥
तेषां महार्हासनसंस्थितानाम्
उदारनेपथ्यभृतां स मध्ये।
रराज धाम्ना रघुसूनुरेव
कल्पद्रुमाणामिव पारिजातः ॥ ६ ॥

तास्विति। तासु राजपरम्परासु श्रिया लक्ष्म्या कर्त्र्या, पयोमुचां मेघानां पङ्क्तिषु विद्युता इव, सहस्रधा विभक्तः तरङ्गेषु तरणिरिव स्वयमेक एव प्रत्येकं संक्रामितः इत्यर्थः। प्रभाविशेषस्य उदयेन आविर्भावेन दुर्निरीक्ष्यः दुर्दर्शनः आत्मा श्रियः स्वरूपं व्यरुचत् व्यद्योतिष्ट। युद्रुगो लुङीति परस्मैपदं द्युतादिखादङ्प्रत्ययः। तस्मिन् समये प्रत्येकं संक्रान्तलक्ष्मीकतया तेषां किमपि दुरासदं तेजः प्रादुरासीत् इत्यर्थः ॥ ५ ॥

तेषामिति। महार्हासनसंस्थितानां श्रेष्ठसिंहासनस्थानाम् उदारनेपथ्यभृतां उज्ज्वलवेषधारिणां तेषां राज्ञां मध्ये, कल्पद्रुमाणां मध्ये पारिजातः इव सुरद्रुमविशेषः इव। "पञ्चैते देवतरवो मन्दारः पारिजातकः। सन्तानः कल्पवृक्षश्च पुंसि

(१) श्रिया कान्त्याधिष्ठात्र्या देव्या इत्यर्थः।

नेत्रव्रजाः पौरजनस्य तस्मिन्
विहाय सर्व्वान् नृपतीन् निपेतुः ।
मदोत्कटे रेचितपुष्पवृक्षाः
गन्धद्विपे(१) वन्य इव द्विरेफाः ॥ ७ ॥
अथ स्तुते वन्दिभिरन्वयज्ञैः
सोमार्कवंशौ नरदेवलोके ।

वा हरिचन्दनम् ॥" इत्यमरः । स रघुसूनुः एव धाम्ना तेजसा रराज । भूम्नेति पाठे अतिशयेन इत्यर्थः । अत्र कल्पद्रुमशब्दः पद्मान्यतमविशेषवचनः उपकल्पयन्ति मनोरथानिति व्युत्पत्त्या सुरद्रुममात्रोपलक्षकतया प्रयुक्तइत्यनुसन्धेयम् । कल्पाः इति द्रुमाः कल्पद्रुमाः इति विग्रहः ॥ ६ ॥

नेत्रेति । पौरजनस्य नेत्रव्रजाः सर्व्वान् नृपतीन् विहाय तस्मिन् अजे निपेतुः स एव सर्व्वोत्कर्षेण ददृशे इत्यर्थः । कथमिव मदोत्कटे मदेन उद्भिन्नगण्डे निर्भरमदे वा वन्ये गन्धद्विपे गन्धप्रधाने द्विपे गजे रेचिताः रिक्तीकृताः पुष्पाणां वृक्षाः यैः ते त्यक्तपुष्पवृक्षाः इत्यर्थः द्विरेफाः भृङ्गाः इव । द्विपस्य वन्यविशेषणं द्विरेफाणां पुष्पवृक्षत्यागसम्भावनार्थं कृतम् ॥७॥

अथेति, पुरेति, मनुर्येति च विभिर्विशेषकम् । अथ अन्वयज्ञैः राजवंश्याभिज्ञैः वन्दिभिः स्तुतिपाठकैः । "वन्दिनः

(१) "यद्यत् अस्य समाचाय न विहन्ति इतिक्रिया । तं गन्धहस्तिनं प्राहुः पंडिते [पंडिताः] रिक्तवारणम्" इति शब्दशास्त्रकारा" इति दिनकरः ।

सञ्चारिते चागुरुसारयोनौ
धूपे समुत्सर्पति (१) वैजयन्तीः ॥ ८ ॥
पुरोपकण्ठोपवनाश्रयाणां
कलापिनामुद्गतनृत्यहेतौ ।
प्रध्मातशङ्खे परितो दिगन्तान्
तूर्य्यस्वने मूर्च्छति मङ्गलार्थे ॥ ९ ॥
मनुष्यवाह्यं चतुरश्रयानम्
अध्यास्य कन्या परिवारशोभि ।

स्तिपाठकाः" इत्यमरः । सोमार्कवंश्ये सोमसूर्य्यवंशभवे नरदेवलोके सुते सति, विवेयेत्युत्तरेण सम्बन्धः, एवमुत्तरत्रापि योज्यम् । सञ्चारिते समन्तात् प्रचारिते अगुरुसारः योनिः कारणं यस्य तस्मिन् धूपे च वैजयन्तीः पताकाः समुत्सर्पति सति अतिक्रम्य गच्छति सति ॥ ८ ॥

किञ्च, पुरस्य उपकण्ठे समीपे उपवनानि आश्रयः येषां तेषां कलापिनां बर्हिणाम् उद्गतनृत्यहेतौ मेघध्वनिसादृश्यात् ताण्डवकारणे प्रध्माताः पूरिताः शंखाः यत्र तस्मिन् मङ्गलार्थे मङ्गलप्रयोजनके तूर्य्यस्वने वाद्यरवे परितः सर्वतः दिगन्तान् मूर्च्छति व्याप्नुवति सति ॥ ९ ॥

पतिं वृणीतेति पतिंवरा स्वयंवरा । "अथ स्वयंवरा पतिंवरा च यया च" इत्यमरः । संज्ञायां भृतृवृजीत्यादिना खच्-

(1) Dinakara reads "धूमे दिगाभावितकेतुमार्गे" ।

विवेश मञ्चान्तरराजमार्गं
पतिंवरा कृत्तविवाहवेषा ॥ १० ॥
तस्मिन् विधानातिशये विधातुः
कन्यामये नेत्रशतैकलक्ष्ये ।
निपेतुरन्तःकरणैर्नरेन्द्राः
देहैः स्थिताः केवलमासनेषु ॥ ११ ॥
तां प्रत्यभिव्यक्तमनोरथानां
महीपतीनां प्रणयाग्रदूत्यः ।

प्रत्ययः । कृत्तविवाहवेषा कन्या इन्दुमती मनुष्यैः वाह्यं परिवारेण परिजनेन शोभि चतुरस्रयानं (१) चतुरस्रवाहनशिविकाम् अध्यास्य आरुह्य मञ्चान्तरे मञ्चमध्ये यः राजमार्गः, तं विवेश ॥ १० ॥

तस्मिन्निति । नेत्रशतानाम् एकलक्ष्ये एकदृश्ये कन्यामये कन्यारूपे तस्मिन् विधातुः विधानातिशये सृष्टिविशेषे नरेन्द्राः अन्तःकरणैः निपेतुः, आसनेषु देहैः केवलं देहैः एव स्थिताः, देहानपि विस्मृत्य तत्रैव दत्तचित्ता बभूवुः इत्यर्थः । अन्तःकरणकर्तृके निपतने नरेन्द्राणां कर्तृत्वव्यपदेशः आदरातिशयार्थः ॥ ११ ॥

तामिति । ताम् इन्दुमतीं प्रति अभिव्यक्तमनोरथानां प्रवृद्धाभिलाषाणां महीपतीनां राज्ञां प्रणयाग्रदूत्यः । प्रणयः

(1) Vallabha reads "चतुरं च यानं" instead of चतुरस्रयानं and explains चतुरम् by मनोज्ञम् ।

प्रवालशोभा इव पादपानां
शृङ्गारचेष्टा विविधा बभूवुः ॥ १२ ॥
कश्चित् कराभ्यामुपगूढनालम्
आलोलपत्राभिहतद्विरेफम् ।

प्रार्थना प्रेम वा । "प्रणयास्त्वमी विस्रम्भयाच्ञाप्रेमाणः" इत्यमरः । प्रणयेषु अग्रदूत्यः प्रथमदूतिकाः । प्रणयप्रकाशकत्वसाम्यात् दूतीत्वव्यपदेशः । विविधाः शृङ्गारचेष्टाः शृङ्गारविकाराः पादपानां प्रवालशोभाः पल्लवसम्पदः इव बभूवुः उत्पन्नाः । अत्र शृङ्गारलक्षणं रससुधाकरे, "विभावैरनुभावैश्च सोचितैर्व्यभिचारिभिः । नीता सदस्यरस्यत्वं रतिः शृङ्गार उच्यते ॥" रतिः इच्छाविशेषः । तच्चोक्तं तत्रैव, "यूनोरन्योन्यविषयस्थायिनीच्छा रतिः स्मृता" इति । चेष्टाशब्देन तदनुभावविशेषा उच्यन्ते । तेऽपि तत्रैवोक्ताः, "भावं मनोगतं साक्षात् सूचयितुं व्यञ्जयन्ति ये । तेऽनुभावा इति ख्याता भ्रूविक्षेपस्मितादयः । ते चतुर्धा चित्तगात्रवाग्बुद्ध्यारम्भसम्भवाः ॥" इति । तत्र गात्रारम्भसम्भवान् चेष्टाशब्दोक्तानुभावान् "कश्चित्" इत्यादिभिः श्लोकैर्वक्ष्यति । शृङ्गाराभासत्वायम् एकत्रैव प्रतिपादनात् । तदुक्तम्, "एकत्रैवानुरागश्चेत् तिर्यक्स्थगतोऽपि वा । योषितां बहुसन्निधेत् रसाभासस्तदा मतः" ॥ इति ॥ १२ ॥

शृङ्गारचेटा बभूवुरित्युक्तं ता एव दर्शयति, कश्चिदिति । कश्चित् राजा कराभ्यां पाणिभ्याम् उपगूढनालं गृहीतनालम् आलोलैः चञ्चलैः पत्रैः अभिहताः ताडिताः द्विरेफाः भ्रमराः येन

रजोभिरन्तःपरिवेषबन्धि(१)
लीलारविन्दं भ्रमयाञ्चकार(२) ॥ १३ ॥
विस्रस्तमंसादपरो विलासी
रत्नानुविद्धाङ्गदकोटिलग्नम् ।
प्रालम्बमुत्क्षिप्य यथावकाशं
निनाय साचीकृतचारुवक्त्रः (३) ॥ १४ ॥

तत् तथोक्तं रजोभिः परागैः अन्तः परिवेषं मण्डलं बध्नातीति अन्तःपरिवेषबन्धि लीलारविन्दं भ्रमयाञ्चकार । करस्थलीलारविन्दवत् त्वयाहं भ्रमयितव्यः इति नृपाभिप्रायः । हस्तघूर्णकोऽयमपलक्षणकः इति इन्दुमत्यभिप्रायः ॥ १३ ॥

विस्रस्तमिति । विलसनशीलः विलासी । "वी कपलस कत्थस्नभः" इति विणुन्प्रत्ययः । अपरः राजा अंसात् विस्रस्तं रत्नानुविद्धं रत्नखचितं यत् अङ्गदं केयूरं तस्य कोटिलग्नं प्रालम्बम् ऋजुलम्बिनीं स्रजम् । "प्रालम्बमृजुलम्बि स्यात् कण्ठात्" इत्यमरः । प्रावारपाठे उत्तरीयवस्त्रम् । उत्कृष्य उद्धृत्य साचीकृतं तिर्यक्कृतं चारु वक्त्रं यस्य स तथोक्तः सन् यथावकाशं स्वस्थानं निनाय । प्रावारोत्क्षेपणच्छलेनाहं त्वामेवं परिरप्से इति नृपाभिप्रायः । गोपनीय किञ्चिदङ्गेऽस्ति ततोऽयं प्राह-*णुत इति इन्दुमत्यभिप्रायः ॥ १४ ॥

(१) रजोभि धूर्णनात् पतितैः परागैः कृत्वा मण्डलमध्ये राज्ञः पुरतः आकाशीपार्श्वे स्थितं परिवेषं मण्डलं बध्नाति करोतीति कृत्वा परिवेषबन्धि ।

* (१) "हस्तानुविद्धेव लीला" इति दिनकरः ।

* (१) "मुखस्य साचीकरणं बाहुशी यथादेशागमनं च प्रहारमूलक" इति दिनकरः ।

आकुञ्चिताग्राङ्गुलिना ततोऽन्यः
किञ्चित्समावर्ज्जितनेत्रशोभः।
तिर्य्यग्विसंसर्पिनखप्रभेण (१)
पादेन हैमं विलिलेख पीठम् ॥ १५ ॥
निवेश्य वामं भुजमासनार्द्धे
तत्सन्निवेशादधिकोन्नतांसः।

आकुञ्चितेति। ततः पूर्वोक्तात् अन्यः अपरः राजा किञ्चित् समावर्ज्जितनेत्रशोभः ईषदर्वाक्पातितनेत्रशोभः सन् आकुञ्चिताः आभुग्नाः अग्राङ्गुलयः यस्य तेन तिर्य्यग्विसंसर्पिणः नखप्रभाः यस्य तेन च पादेन हैमं हिरण्मयं पीठं पादपीठं विलिलेख लिखितवान्। पादाङ्गुलीनामाकुञ्चनेन त्वं मत्समीपमागच्छ इति नृपाभिप्रायः। भूमिविलेखकोऽयमपलक्षणकः इति इन्दुमत्याशयः। भूमिविलेखनन्तु लज्जौविनाग्रहेतु ॥ १५ ॥

निवेश्येति। कश्चित् राजा वामं भुजम् आसनार्द्धे सिंहासनैकदेशे (२) निवेश्य संस्थाप्य तत्सन्निवेशात् तस्य वामभुजस्य सन्निवेशात् संस्थापनात् अधिकोन्नतः अंसः वामांसः एव यस्य

---

(1) Dinakara reads स्वांशुसंसर्पिनखप्रभेण and explains by "स्वांशुभिः संसर्पिणी संनक्षमाणा नखानां प्रभा यस्य तेन". The purport of this stanza according to him is "इन्दुमतीदर्शनविस्मयप्रकाशनम्"।

(२) आसनस्य यद्धं: आसनार्द्धं तस्मिन्। पुंसिद्धार्द्धमस्त्रियां एकदेशवाची आसनस्यार्द्धमित्यविशिष्टे तु "यद्धं नपुंसकम्" इत्यमरेण यद्धंस्य पूर्वनिपातः समासश्चाधित्यं च मर्द्धदिग्रहणमर्थवत्।

कश्चिद्विहृत्तत्रिकभिन्नहारः
सुहृत्समाभाषणतत्परोभूत् ॥ १६ ॥
विलासिनीविभ्रमदन्तपत्रम्(१)
आपाण्डुरं केतकवर्हमन्यः ।
प्रियानितम्बोचितसन्निवेशैः
विपाटयामास युवा नखाग्रैः ॥ १७ ॥

स तथोक्तः विहृत्ते परावृत्ते त्रिके त्रिकप्रदेशे भिन्नहारः लुण्ठित-हारः सन् । "पृष्ठवंशाधारे त्रिकम्" इत्यमरः । सुहृत्समा-भाषणतत्परः अभूत् वामपार्श्ववर्त्तिनैव मित्रेण सम्भाषितुं प्रवृत्तः इत्यर्थः । अतएव विहृत्तत्रिकत्वं घटते । त्वया वामाङ्के निवेशितया सह एवं वार्त्तां करिष्ये इति नृपाभिप्रायः । परं दृष्ट्वा पराङ्मुखोऽयं न कार्य्यकर्त्ता इति इन्दुमत्यभिप्रायः ॥ १६ ॥

विलासिनीति । अन्यः युवा विलासिन्याः प्रियायाः विभ्र-मार्थं दन्तपत्रं दन्तपत्रभूतम् आपाण्डुरं केतकवर्हं केतकदलम् । "दलेऽपि वर्हम्" इत्यमरः । प्रियानितम्बे उचितसन्निवेशैः अभ्यस्तनिवेशनैः नखाग्रैः विपाटयामास विदारयामास । अहं तव नितम्बे एवं नखव्रणादीन् दास्यामि इति नृपाशयः । दृष्टच्छेदकवत् पक्षपाटकोऽयमपलक्षणः इति इन्दुमत्या-शयः ॥ १७ ॥

---

(१) दन्तवत् श्रेष्ठं पत्रमस्येति दन्तपत्रं कुन्दम् । कुन्दाकारं कर्णाभरणमपि दन्त-पत्रशब्देनाभिधीयते । इति दन्तरचितं पत्राकारं कर्णाभरणं वा दन्तपत्रशब्दस्यार्थः ।

कुशेशयाताम्रतलेन कश्चित्
करेण रेखाध्वजलाञ्छनेन।
रत्नाङ्गुलीयप्रभयानुविद्धान्
उदीरयामास सलीलमक्षान् ॥ १८ ॥
कश्चिद्यथाभागमवस्थितेऽपि
स्वसन्निवेशात् व्यतिलङ्घिनीव।
वज्रांशुगर्भाङ्गुलिरन्ध्रमेकं
व्यापारयामास करं किरीटे ॥ १९ ॥

कुशेशयेति। कश्चित् राजा कुशेशयं यतपत्रम् इव आताम्रं तलं यस्य तेन। "यतपत्रं कुशेशयम्" इत्यमरः। रेखारूपः ध्वजः लाञ्छनं यस्य तेन करेण अङ्गुलिषु भवानि अङ्गुलीयानि ऊर्मिकाः। "अङ्गुलीयकमूर्मिका" इत्यमरः। "जिह्वामूलाङ्गुलेरञ्" इति छप्रत्ययः। रत्नानाम् अङ्गुलीयानि तेषां प्रभया अनुविद्धान् व्याप्तान् अक्षान् पाशान्। "अक्षास्तु देवनाः पाशकाश्च ते" इत्यमरः। सलीलम् उदीरयामास उच्चिक्षेप। अहं त्वया सहैवं रंस्ये इति नृपाभिप्रायः। अक्षचातुर्यं कापुरुषोऽयम् इति इन्दुमत्यभिप्रायः। "अक्षैर्मा दीव्यः" इति श्रुतिनिषेधात् ॥ १८ ॥

कश्चिदिति। कश्चित् यथाभागं यथास्थानम्। अवस्थितेऽपि स्वसन्निवेशात् व्यतिलङ्घिनि इव स्वस्थानात् चलिते इव किरीटे वज्राणां किरीटगतानाम् अंशवः गर्भे येषां

ततो नृपाणां श्रुतवृत्तवंशा
पुंवत्(१) प्रगल्भा प्रतिहाररक्षी ।
प्राक् सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा ॥ २० ॥
असौ शरण्यः शरणोन्मुखानाम्
अगाधसत्वो मगधप्रतिष्ठः ।

अङ्गुलिरन्ध्राणि यस्य तम् एकं करं व्यापारयामास । किरीटोन्नम शिरसि स्थितामपि त्वां भारं न मन्ये इति नृपाभिप्रायः । शिरसि न्यस्तहस्तोऽयमपलक्षणः इति इन्दुमत्यभिप्रायः ॥ १९ ॥

तत इति । ततः अनन्तरं नृपाणां श्रुतवृत्तवंशा श्रुतनृपवृत्तवंशा इत्यर्थः । सापेक्षत्वेऽपि गमकत्वात् समासः । प्रगल्भा वाग्मिनी सुनन्दा सुनन्दाख्या प्रतिहारं रक्षतीति प्रतिहाररक्षी द्वारपालिका । कर्मण्यण्प्रत्ययः । टिड्ढाणञित्यादिना ङीप् । प्राक् प्रथमं कुमारीम् इन्दुमतीं मगधेश्वरस्य सन्निकर्षं समीपं नीत्वा पुंवत् पुंसा तुल्यम् । तेन तुल्यं क्रिया चेद्वतिरिति वतिप्रत्ययः । अवदत् ॥ २० ॥

असाविति । असौ राजा । असाविति पुरोवर्त्तिनो निर्देशः, एवमुत्तरत्रापि द्रष्टव्यम् । शरणोन्मुखानां शरणार्थिनां शरण्यः शरणे रक्षणे साधुः । "तत्र साधुः" इति यत्प्रत्ययः । शरणं भवितुमर्हः शरण्य इति नाथनिरुक्तिर्नि-

(१) "पुंवत्" should better be referred to प्रगल्भा than to अवदत्। प्रगल्भतायां पुरुषसदृशी सुनन्देत्यर्थः।

राजा प्रजारञ्जनलब्धवर्णः
परन्तपो नाम यथार्थनामा (१) ॥ २१ ॥
कामं नृपाः सन्तु सहस्रशोऽन्ये
राजन्वतीमाहुरनेन भूमिम्।
नक्षत्रतारागृहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः ॥ २२ ॥

मूलैव। अगाधसत्वः गम्भीरस्वभावः। "सत्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः" इति विश्वः। मगधाः जनपदाः तेषु प्रतिष्ठा आस्पदं यस्य सः मगधप्रतिष्ठः। "प्रतिष्ठा स्त्यमास्पदम्" इत्यमरः। प्रजारञ्जने लब्धवर्णः विचक्षणः यद्वा प्रजारञ्जनेन लब्धोत्कर्षः परान् शत्रून् तापयतीति परन्तपः परन्तपाख्यः। "विषत्यरयोस्तापेः" इति खच्प्रत्ययः, खचि ह्रस्व इति ह्रस्वः, "अरुर्द्विषदजन्तस्य मुम्" इति मुमागमः। नामेति प्रसिद्धौ यथार्थनामा शत्रुसन्तापनात् इति भावः ॥ २१ ॥

काममिति। अन्ये नृपाः कामं सहस्रशः सन्तु, भूमिम् अनेन राजन्वतीं शोभनराजवतीम् आहुः नैतादृक् कश्चिदस्ति इत्यर्थः। "सुराज्ञि देशे राजन्वान् स्यात् तसोऽन्यत्र राजवान्" इत्यमरः। "राजन्वान् सौराज्ये" इति निपातनात् साधुः। तथाहि, नक्षत्रैः अश्विन्यादिभिः ताराभिः साधारणैः

---

(१) "परन्तपत्वं न क्रूरत्वं क्षीरस्वच्छत्वयुता च इन्दुसभा वैराग्यभूषणम्। अतः अतिरिक्तेषु दुर्नीतिनिन्दापरत्वात् सर्वत्र ईषावद्वारोऽवगन्तव्यः" इति दिनकरः

क्रियाप्रबन्धादयमध्वराणाम्
अजस्रमाहूतसहस्रनेत्रः ।
शच्याश्चिरं पाण्डुकपोललम्बान्
मन्दारशून्यानलकांश्चकार(१) ॥ २३ ॥
अनेन चेदिच्छसि गृह्यमाणं
पाणिं वरेण्येन कुरु प्रवेशे ।

ज्योतिर्भिः ग्रहैः भौमादिभिश्च सङ्गता अपि रात्रिः चन्द्रमसा एव ज्योतिरस्या अस्तीति ज्योतिष्मती, नान्येन ज्योतिषा इत्यर्थः ॥ २२ ॥

क्रियेति । अयं परन्तपः अध्वराणां क्रतूनां क्रियाप्रबन्धात् अनुष्ठानसातत्यात् अविच्छिन्नादनुष्ठानात् इत्यर्थः अजस्रं नित्यम् आहूतसहस्रनेत्रः सन् चिरं शच्याः अलकान् पाण्डु-कपोलयोः लम्बान् स्रस्तान् । पचाद्यच् । मन्दारैः कल्पद्रुम-कुसुमैः शून्यान् चकार । प्रोषितभर्तृका हि केशसंस्कारं न कुर्वन्ति, "प्रोषिते मलिना छाया" इति, "क्रीड़ां शरीरसंस्कारं समाजोत्सवदर्शनम् । हास्यं परगृहे यानं त्यजेत् प्रोषित-भर्तृका ॥" इति च स्मरणात् ॥ २३ ॥

अनेनेति । वरेण्येन वरणीयेन । वृणोतेरीण्यादिक एण्य-प्रत्ययः । अनेन राज्ञा गृह्यमाणं पाणिम् इच्छसि चेत् पाणि-ग्रहणमिच्छसि चेत् इत्यर्थः प्रवेशे प्रवेशकाले प्रासादवातायन-

(१) "एतेन तस्य यज्ञकर्तृत्वगर्वेण इन्द्रमहत्वं राज्यहेतुत्वं सूचितम्" इति दिनकरः ।

प्रासादवातायनसंस्थितानां
नेत्रोत्सवं पुष्पपुराङ्गनानाम्(१) ॥ २४ ॥
एवं तयोक्ते तमवेक्ष्य किञ्चित्
विस्रंसिदूर्वाङ्कमधूकमाला (२)।
ऋजु प्रणामक्रिययैव (३) तन्वी
प्रत्यादिदेशैनमभाषमाणा ॥ २५ ॥
तां सैव वेत्रग्रहणे नियुक्ता
राजान्तरं राजसुतां निनाय।

संस्थितानां राजभवनगवाक्षस्थितानां पुष्पपुराङ्गनानां पाटलिपुराङ्गनानां नेत्रोत्सवं कुरु। सर्वोत्तमानां तासामपि दर्शनीया भविष्यसि इति भावः ॥ २४ ॥

एवमिति। एवं तया सुनन्दया उक्ते सति तं परन्तपम् अवेक्ष्य किञ्चित् विस्रंसिनी दूर्वाङ्का दूर्वाचिह्ना मधूकमाला गुड़पुष्पमाला यस्याः सा। "मधूके तु गुड़पुष्पमधुद्रुमौ" इत्यमरः। वरणे गिथिलप्रयत्ना इति भावः। तन्वी इन्दुमती एनं नृपम् अभाषमाणा कृत्वा भावशून्यया प्रणामक्रियया एव प्रत्यादिदेश परिजहार ॥ २५ ॥

तामिति। सा एव न अन्या चित्तज्ञत्वात् इति भावः। वेत्र-

(1) Pushpapura is identical with the city of Pataliputra.
(2) A garland of Madhuka flowers interstrung with durvas is considered as auspicious. Compare दूर्वावता पाण्डुमधूकदामा पर्य्यादिपत् काचिदुदारबन्धम्"। Kumara, Canto VII.
(३) "ऋजुः सरला विषमरहिता वा नमस्क्रिया तयैव" इति दिनकरः।

समीरणोत्थेव तरङ्गलेखा
पद्मान्तरं मानसराजहंसीम् ॥ २६ ॥
जगादं चैनामयमङ्गनाथः(१)
सुराङ्गनाप्रार्थितयौवनश्रीः ।
विनीतनागः (२) किल सूत्रकारैः
ऐन्द्रं पदं भूमिगतोऽपि भुङ्क्ते ॥ २७ ॥

ग्रहणे नियुक्ता दौवारिकी सुनन्दा तां राजसुतां राजान्तरम् अन्यराजानं निनाय । नयतिर्हिकर्मकः । कथमिव समीरणोत्था वातोत्पन्ना तरङ्गलेखा ऊर्मिपङ्क्तिः मानसे सरसि या राजहंसी तां पद्मान्तरम् इव ॥ २६ ॥

जगादेति । एनाम् इन्दुमतीं जगाद । किमिति अयम् अङ्गनाथः अङ्गदेशाधीश्वरः सुराङ्गनाभिः प्रार्थिता कामिता यौवनश्रीः यस्य सः तथोक्तः । पुरा किलैनमिन्द्रसाहाय्यार्थमिन्द्रपुरंगामिनम् अकामयन्त अप्सरसः इति प्रसिद्धिः । किञ्च सूत्रकारैः गजशास्त्रकृद्भिः पालकादिभिः महर्षिभिः विनीतनागः शिक्षितगजः । किलेत्यैतिह्ये । अतएव भूमिगतः अपि ऐन्द्रं पदम् ऐश्वर्यं भुङ्क्ते भूर्लोक एव स्वर्गसुखमनुभवति इत्यर्थः । गजाप्सरोदेवर्षिसेव्यत्वम् ऐन्द्रपदशब्दार्थः । पुरा किल कुतश्चि-

(1) Anga was the country about Bhagalpur, of which Champa was the ancient capital.

(2) Vallabha reads विनीतमार्गः and explains it by 'शिक्षितगजाश्वः' and remarks. "इन्द्र विद्व पद्मानां लभते, सुराङ्गनोपभुक्तताद्यश्वर" ।

अनेन पर्य्यासयताश्रुविन्दून्
मुक्ताफलस्थूलतमान् स्तनेषु।
प्रत्यर्पिताः शबरविलासिनीनाम्
उन्मुच्य सूत्रेण विनैव हाराः (१) ॥ २८ ॥
निसर्गभिन्नास्पदमेकसंस्थम्
अस्मिन् द्वयं श्रीश्च सरस्वती च।
कान्त्या गिरा सूनृतया च योग्या
त्वमेव कल्याणि तयोस्तृतीया ॥ २९ ॥

च्छापकारणात् भुवमवतीर्णं दिग्गजवर्गमालोक्य स्वयमगस्ति-रिन्द्राभ्यनुज्ञया यानीतैर्देवर्षिभिः प्रणीतेन शास्त्रेण गजान् वशीकृत्य भुवि सम्प्रदायं प्रावर्त्तयदिति कथा गीयते ॥ २७ ॥

अनेनेति। शबरविलासिनीनां स्तनेषु मुक्ताफलस्थूलतमान् अश्रुविन्दून्। "अस्रमश्रुणि" इति विश्वः। पर्य्यासयता प्रसारयता भर्त्तृवधात् इति भावः। अनेन अङ्गनाधेन उन्मुच्य आच्छिद्य सूत्रेण विना हाराः एव प्रत्यर्पिताः। अविच्छिन्नाश्रुविन्दुप्रवर्त्तनादुत्सूत्रहारार्पणमेव कृतमिवेत्युत्प्रेक्षा गम्यते ॥२८॥

निसर्गेति। निसर्गतः स्वभावतः भिन्नास्पदं भिन्नाश्रयं सहावस्थानविरोधि इत्यर्थः श्रीश्च सरस्वती च इति द्वयम् अस्मिन् अङ्गनाधे एकत्र संस्था स्थितिः यस्य तत् एकसंस्थम् उभयमिह सङ्गतम् इत्यर्थः। हे कल्याणि वङ्गादिभ्यश्चेति

(1) On this Dinakara remarks, "अतिवीररसवर्णनं वैराग्यहेतुः।"

अथाङ्गराजादवतार्य्य चक्षुः
याहीति जन्यामवदत्(१) कुमारी ।
नासौ न काम्यो न च वेद सम्यक्
द्रष्टुं न सा भिन्नरुचिर्हि लोकः ॥ २० ॥

ङीष् । कान्त्या सूनृतया सत्यप्रियया गिरा च योग्या संसर्गार्हा त्वम् एव तयोः श्रीसरस्वत्योः द्वतीया । समानगुणयोर्युवयोः दाम्पत्यं युज्यत एव इति भावः । दक्षिणनायकत्वञ्चास्य ध्वन्यते । तदुक्तम्, "तुल्योऽनेकत्र दक्षिणः" इति ॥ २९ ॥

अथेति । अथ कुमारी अङ्गराजात् चक्षुः अवतार्य्य अपनीय इत्यर्थः जन्यां माद्रसखीं सुनन्दां याहि गच्छ इति अवदत् अथवा, जनीं वधूं वहन्तीति जन्याः वधूबन्धवः तान् यात गच्छत इति अवदत् । "जन्या माद्रसखीमुदोः । जन्यो वरवधूभ्रातिप्रियतुल्यहितेषु च" इति मेदिनीये अपि विश्वः । अथवा जन्याः वधूभृत्याः । "भृत्यायापि नवोढ़ायाः" इति केशवः । "संज्ञायां जन्या" इति यत्प्रत्ययान्तो निपातः । यदवाह वृत्तिकारः, "जनीं वधूं वहन्तीति जन्याः जामातुर्वयस्याः" इति, यच्चामरः, "जन्याः स्निग्धा वरस्य ये" इति तत्सर्व्वमुपलक्षणार्थमित्यविरोधः । न चायमङ्गराजनिषेधो दृश्यदोषावापि द्रष्टृदोषादित्याह, नेत्यादिना । असौ अङ्गराजः काम्यः कमनीयः न इति न, किन्तु काम्य एव इत्यर्थः । सा कुमारी च सम्यक् द्रष्टुं विवेक्तुं न वेद इति न, वेद इत्यर्थः । किन्तु लोकः जनः भिन्नरुचिः हि,

(1) Vallabha reads "काम्यान्" and explains the same by 'कामान्' ।

ततः परं दुष्प्रसहं द्विषद्भिः
नृपं नियुक्ता प्रतिहारभूमौ।
निदर्शयामास विशेषदृश्यम्
इन्दुं नवोत्थानमिवेन्दुमत्यै ॥ ३१ ॥
अवन्तिनाथोऽयमुदग्रबाहुः
विशालवक्षास्तनुवृत्तमध्यः।
आरोप्यचक्रभ्रममुष्णतेजाः(१)
त्वष्टेव यत्नोल्लिखितो विभाति ॥ ३२ ॥

रुचिरमपि किञ्चित् कस्मैचिन्न रोचते किं कुर्मो न ह्येच्छा नियन्तुं शक्यते इत्यर्थः ॥ ३० ॥

तत इति। ततः अनन्तरं प्रतिहारभूमौ द्वारदेशे नियुक्ता दौवारिकी। "स्त्री द्वार्द्वारं प्रतीहारः" इत्यमरः। द्विषद्भिः शत्रुभिः दुष्प्रसहं दुःसहं शूरम् इत्यर्थः विशेषेण दृश्यं दर्शनीयं रूपवन्तम् इत्यर्थः। परम् अन्यं नृपं नवोत्थानं नवोदयम् इन्दुम् इव इन्दुमत्यै निदर्शयामास ॥ ३१ ॥

अवन्तीति। उदग्रबाहुः दीर्घबाहुः विशालवक्षाः तनुवृत्त-मध्यः सुगवर्तुलमध्यः अयं राजा अवन्तिनाथः अवन्तिदेशाधी-

(1) Sanjna, (संज्ञा) the daughter of विश्वकर्मा and the wife of the sun; bore him three children मनु (वैवस्वत), यम and यमुना. Unable to endure the fervours of her lord, she gave him छाया as his handmaid and vanished. The sun, supposing छाया to be his wife संज्ञा, begot by her three children शनि, मनु (सावर्णि) and तापी. On

अस्य प्रयाणेषु समग्रशक्तेः
अग्रेसरैर्वाजिभिरुत्थितानि ।
कुर्वन्ति सामन्तशिखामणीनां
प्रभाप्ररोहास्तमयं रजांसि ॥ २२ ॥

खरः त्वष्टा विश्वकर्म्मणा । भर्त्तुस्ते जोवियोगमसहमानया दुहित्रा संज्ञादेव्या प्रार्थितेन इति शेषः । चक्रभ्रमं चक्राकारयन्त्रीतेजनयन्त्रम् । "भ्रमोऽम्बुनिर्गमे भ्रान्तौ कुन्दाख्ये गिलियन्त्रके" इति विश्वः । आरोप्य यन्त्रेण उल्लिखितः उग्रतेजाः सूर्यः इव विभाति । अत्र मार्कण्डेयः, "विश्वकर्म्मा त्वनुज्ञातः भाकद्वीपे विवस्वता । भ्रममारोप्य तत्तेजःशातनायोपचक्रमे" इति ॥२२॥

अस्येति। समग्रशक्तेः शक्तित्रयसम्पन्नस्य अस्य अवन्तिनाथस्य प्रयाणेषु यात्रासु अग्रेसरैः वाजिभिः अश्वैः उत्थितानि रजांसि सामन्तानां समन्तात् भवानां राज्ञां ये शिखामणयः चूडामणयः तेषां प्रभाप्ररोहास्तमयं तेजोऽङ्कुरनाशं कुर्व्वन्ति । नासीरैरेवास्य शत्रवः पराजीयन्ते इति भावः ॥ २२ ॥

---

one occasion हाया pronouncing an imprecation on यम, betrayed the secret that she was not his real mother. On this, the sun beheld सं॰ज्ञा by the eye of meditation, engaged in austerities in the figure of a mare in the region of उत्तरकुरु. Metamorphosing himself into a horse, he begot three other children, the two अश्विनीकुमार, and रेवन्त, and then brought her back to his own dwelling. To diminish his intensity, विश्वकर्म्मा placed him on his lathe, (यन्त्र) to grind off some of his effulgence, and in this manner, reduced it an eighth: for more than that was inseparable. See Wilson's V. Purana Book III. 2.

असौ महाकाल निकेतनस्य(१)
वसन्नदूरे किल चन्द्रमौलेः ।
तमिस्रपक्षेऽपि सह प्रियाभिः
ज्योत्स्नावतो निर्विशति प्रदोषान् ॥ २४ ॥
अनेन यूना सह पार्थिवेन
रम्भोरु कञ्चिन्मनसो रुचिस्ते ।
सिप्रातरङ्गानिलकम्पितासु(२)
विहर्तुमुद्यानपरम्परासु ॥ २५ ॥

असाविति । असौ अवन्तिनाथः महाकालं नाम स्थानविशेषः तत् एव निकेतनं स्थानं यस्य तस्य चन्द्रमौलेः ईश्वरस्य अदूरे समीपे वसन् अतएव हेतोः तमिस्रपक्षे कृष्णपक्षे अपि प्रियाभिः सह ज्योत्स्नावतः प्रदोषान् रात्रीः निर्विशति अनुभवति किल। नित्यज्योत्स्नाविहारत्वमेतस्यैव नान्यस्य इति भावः॥ २४॥

अनेनेति । रम्भे कदलीस्तम्भौ इव ऊरू यस्याः सा रम्भोरूः तस्याः सम्बोधनं हे रम्भोरु "ऊरूत्तरपदादौपम्ये" इत्यूङ् प्रत्ययः, नदीत्वात् ह्रस्वः। यूना अनेन पार्थिवेन सह सिप्रा नाम तत्रत्या नदी. तस्याः तरङ्गाणाम् अनिलेन कम्पितासूद्यानानां परम्प-

(1) Maha'ka'la was also the name of the Linga consecrated at Ujjayini. It is referred to by Bhababhuti in his mahaviracharita and also by Kalidasa in his Meghaduta.

(2) सिप्रा flows by Ujjayini being a tributary of the Chambal. "अस्मिन्दिवसेन सुखदायां वायुकृतिः" इति दिनकरः।

तस्मिन्नभिद्योतितबन्धुपद्मे
प्रतापसंशोषितशत्रु पङ्के ।
बबन्ध सा नोत्तमसौकुमार्य्या
कुमुद्वती भानुमतीव भावम् ॥ २६ ॥
तामग्रतस्तामरसान्तराभाम्
अनूपराजस्य गुणैरनूनाम् ।
विधाय सृष्टिं ललितां विधातुः
जगाद भूयः सुदतीं सुनन्दा ॥ २७ ॥

रासु पङ्क्तिषु विहर्त्तुं ते तव मनसः रुचिः कचित् स्पृहासि किमित्यर्थः । "अभिषङ्गे स्पृहायाञ्च गभस्तौ च रुचिः स्त्रियाम्" इत्यमरः ॥ २५ ॥

तस्मिन्निति । उत्तमसौकुमार्य्या उत्कृष्टाङ्गभार्द्दवा सा इन्दुमती अभिद्योतितानि उल्लासितानि बन्धवः एव पद्मानि येन तस्मिन् प्रतापेन तेजसा संशोषिताः शत्रवः एव पङ्काः कर्द्दमाः येन तस्मिन् तस्मिन् अवन्तिनाथे कुमुद्वती । "कुमुदनड्वेतसेभ्यो मतुप्" इति मतुप्प्रत्ययः । भानुमति अंशुमति इव भावं चित्तं न बबन्ध, न तत्रानुरागमकरोत् इत्यर्थः । बन्धूनां पद्मत्वेन शत्रूणां पङ्कत्वेन च रूपणं राज्ञः सूर्य्यसाम्यार्थम् ॥२६॥

तामिति । सुनन्दा तामरसान्तराभां पद्मोदरतुल्यकान्तिं कनकगौरीम् इत्यर्थः गुणैः अनूनाम् अधिकाम् इत्यर्थः शोभना दन्ताः यस्याः सा सुदती । "वयसि दन्तस्य दत्" इति दभादेशः,

संग्रामनिर्विष्टसहस्रबाहुः
अष्टादशद्वीपनिखातयूपः।
अनन्यसाधारणराजशब्दः
बभूव योगी किल कार्त्तवीर्य्यः (१) ॥ ३८ ॥

"उगितश्च" इति ङीप्। तां तां प्रज्ञतां प्रसिद्धां वा विधातुः ललितां सृष्टिं मधुरनिर्माणां स्त्रियम् इत्यर्थः। अनुगताः आपः येषु ते अनूपाः नाम देशाः। "ऋक्पूरब्धूःपथामानक्षे" इत्यप्रत्ययः समासान्तः "ऊदनोर्देशे" इत्यूदादेशः। तेषां राज्ञः अनूपराजस्य अग्रतः विधाय व्यवस्थाप्य भूयः पुनः जगाद ॥ ३७ ॥

संग्रामेति। संग्रामेषु युद्धेषु निर्विष्टाः अनुभूताः सहस्रं बाहवः यस्य सः तथोक्तः युद्धादन्यत्र द्विभुज एव दृश्यते इत्यर्थः। अष्टादशसु द्वीपेषु निखाताः स्थापिताः यूपाः येन स तथोक्तः। सर्व्वक्रतुयाजी सार्व्वभौमश्च इति भावः। जरायुजादिसर्व्वभूतरक्षणात् अनन्यसाधारणः राजशब्दः यस्य स तथोक्तः योगी ब्रह्मविद्वान् इत्यर्थः। स किल भगवतो दत्तात्रेयाराधनयोगः इति प्रसिद्धिः। कृतवीर्यस्य अपत्यं पुमान् कार्त्तवीर्य्यः नाम राजा बभूव किल इति। अयञ्चास्य महिमा सर्व्वोऽपि दत्तात्रेयवरप्रसादलब्धः इति भारते दृश्यते ॥ ३८ ॥

(1) He was king of the Haihyas, a people of central India, and his capital माहिष्मती is identified with the modern Chuli-Maheswar on the Narmada. The country of the Haihayas was probably intersected with as many rivulets as to be called Anupa. "न नूनं कार्त्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः। यज्ञैर्दानैस्तपोभिर्वा विनयेन श्रुतेन वा"। V. P. IV. 11. "विख्यातमे शार्वेयीयां: कृतद्वीपसमासरणयज्ञादां चष्टादशद्वीपदा" इति मत्स्यः।

अकार्य्यचिन्तासमकालमेव
प्रादुर्भवंश्चापधरः पुरस्तात् ।
अन्तःशरीरेष्वपि यः प्रजानां
प्रत्यादिदेशाविनयं विनेता ॥ ३९ ॥
ज्याबन्धनिष्पन्दभुजेन यस्य(१)
विनिःश्वसद्वक्त्रपरम्परेण ।

अकार्येति। विनेता शिक्षकः यः कार्त्तवीर्य्यः अकार्य्यस्य असत्कार्य्यस्य चिन्तायाः अहं चौर्य्यादिकं करिष्यामीति बुद्धेः समकालम् एककालम् एव यथा तथा पुरस्तात् अग्रे चापधरः प्रादुर्भवन् सन् प्रजानाम्। "प्रजा स्यात् सन्ततौ जने" इत्यमरः। अन्तःशरीरेषु अन्तःकरणेषु। शरीरशब्देन इन्द्रियं लक्ष्यते अविनयम् अपि प्रत्यादिदेश मानसापराधमपि निवारयामास इत्यर्थः। अन्ये तु वाक्कायापराधमात्रप्रतिकर्त्तारः इति भावः॥ ३९॥

ज्याबन्धेति। ज्यायाः मौर्व्याः बन्धेन बन्धनेन निष्पन्दाः निश्चेष्टाः भुजाः यस्य तेन विनिःश्वसती ज्याबन्धोपरोधात् दीर्घं निःश्वसती वक्त्रपरम्परा दशमुखी यस्य तेन निर्जितवासवेन इन्द्रविजयिना। अत्रेन्द्रादयोऽप्यनेन जितप्राया एव इति भावः। सङ्ग्रहेण दशास्येन यस्य कार्त्तवीर्य्यस्य कारागृहे बन्ध-

(१) "पूर्वे हि जयकेलिखेदविलासिनीयामार्योरु नयुजपरिघदुर्वारबाहाप-दानिर्वृतिप्राप्तिं कलितं एवरावतं रावणगर्वं दृष्ट्वा गिला कार्त्तवीर्य्यो निजचापबन्धेन बन्धेत्यागमः" इति वल्लभः।

कारागृहे निर्जितवासवेन
लङ्केश्वरेणोषितमाप्रसादात् ॥ ४० ॥
तस्यान्वये भूपतिरेष जातः
प्रतीप इत्यागमवृद्धसेवी ।
येन श्रियः संश्रयदोषरूढं
स्वभावलोलेत्ययशः प्रमृष्टम् ॥ ४१ ॥
आयोधने क्रूरगतिं सहायम्
अवाप्य यः क्षत्रियकालरात्रिम्(१) ।

नागरे। "कारा स्याद्बन्धनालये" इत्यमरः। आप्रसादात् अनुग्रहपर्य्यन्तम् उषितं स्थितम्। नपुंसके भावे क्तः। एतत्प्रसाद एव तस्य मोक्षोपायो न तु बाहुबलम् इति भावः ॥ ४० ॥

तस्येति। आगमवृद्धसेवी श्रुतवृद्धसेवी प्रतीपः इति ख्यातः इति शेषः। एषः भूपतिः तस्य कार्त्तवीर्य्यस्य अन्वये वंशे जातः। येन प्रतीपेन संश्रयस्य आश्रयस्य पुंसः दोषैः व्यसनादिभिः रूढम् उत्पन्नं श्रियः सम्बन्धि स्वभावलोला प्रकृतिचञ्चला इत्येवंरूपम् अयशः दुष्कीर्त्तिः प्रमृष्टं निरस्तम्। दुष्टाश्रयत्यागशीलायाः श्रियः प्रकृतिचापलप्रवादो मूढजनपरिकल्पितः इत्यर्थः। अयन्तु दोषराहित्यान्न कदाचिदपि लक्ष्येत इति भावः ॥ ४१ ॥

आयोधन इति। यः प्रतीपः आयोधने युद्धे क्रूरगतिं क्रूर-

(१) कालरात्रिं कृतान्तरात्रिम्।

धारां शितां रामपरश्वधस्य
सम्भावयत्युत्पलपत्रसाराम् ॥ ४२ ॥
अस्याङ्कलक्ष्मीर्भव दीर्घबाहोः
माहिष्मतीवप्रनितम्बकाञ्चीम् ।
प्रासादजालैर्जलवेणिरम्यां
रेवां यदि प्रेक्षितुमस्ति कामः ॥ ४३ ॥

वर्त्मानम् अग्निं सहायम् अवाप्य चत्रियाणां कालरात्रिं संहार-रात्रिम् इत्यर्थः । रामपरश्वधस्य जामदग्न्यपरश्वोः । "द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः" इत्यमरः । शितां तीक्ष्णां धारां मुखम् । "खड्गादीनाञ्च निशितमुखे धारा प्रकीर्त्तिता" इति विश्वः । उत्पलपत्रस्य सारः इव सारः यस्याः तां तथा-भूतां सम्भावयति मन्यते । एतन्नगरजिगीषयागतान् रिपून् स्वयमेव धक्ष्यामि इति भगवता वैश्वानरेण दत्तवरोऽयं राजा, दहन्ति च तथागताः अग्नयः इति भारते कथानु-सन्धेया ॥ ४२ ॥

अस्येति । दीर्घबाहोः अस्य प्रतीपस्य अङ्कलक्ष्मीः भव, एनं वृणीष्व इत्यर्थः । अनेनायं विष्णुतुल्यः इति ध्वन्यते । माहिष्मती नाम अस्य नगरी तस्याः वप्रः प्राकारः एव नितम्बः तस्य काञ्चीं रशनाभूतां जलानां वेणी प्रवाहेण रम्याम् । "ओघः प्रवाहो वेणी च" इति हलायुधः । रेवां नर्मदां प्रासादजालैः गवाक्षैः । "जालं समूहे मानायो गवाक्षक्षारकावपि" इत्यमरः । प्रेक्षितुं कामः इच्छा अस्ति यदि ॥ ४३ ॥

तस्याः प्रकामं प्रियदर्शनोऽपि
न स चितीशो रुचये बभूव।
शरत्प्रसृष्टाम्बुधरोपरोधः
शशीव पर्य्याप्तकलो नलिन्याः ॥ ४४ ॥
सा शूरसेनाधिपतिं(१) सुषेणम्
उद्दिश्य लोकान्तरगीतकीर्त्तिम् (२)।
आचारशुद्धोभयवंशदीपं
शुद्धान्तरक्षा जगदे कुमारी ॥ ४५ ॥

तस्या इति। प्रकामं प्रियं प्रीतिकरं दर्शनं यस्य सः अपि दर्शनीयोऽपि इत्यर्थः स चितीशः शरदा प्रसृष्टाम्बुधरोपरोधः निरस्तमेघावरणः पर्य्याप्तकलः पूर्णकलः शशी नलिन्याः इव तस्याः इन्दुमत्याः रुचये न बभूव रुचिं नाजीजनत् इत्यर्थः। लोकोभिवरुचिः इति भावः ॥ ४४ ॥

सेति। लोकान्तरे स्वर्गादौ अपि गीतकीर्त्तिम् आचारेण शुद्धयोः उभयोः वंशयोः मातापितृकुलयोः दीपं प्रकाशकम्। उभयवंश्येत्यत्रोभयपदबहुव्रीहिः। शूरसेनानां देशानाम् अधि-

(1) The Surasenas were the people of Mathura. Their country seems to have been once very extensive and flourishing, for one of the principal and most refined subdivisions of the Prakrita language was named after them—"शूरसेनीवचोभाषा सर्व्वस्यं स्यात् प्रसाधनम्। सौरसेनी प्रतीच्या साहस्रीमाश्रित्य भाषितम्" इति साहित्यदर्पणम्।

(2) Both Dinakara and Vallabha read "देशान्तरगीतकीर्त्तिम्"।

नीपान्वयः(१) पार्थिव एष यज्वा
गुणैर्यमाश्रित्य परस्परेण ।
सिद्धाश्रमं शान्तमिवेत्य(२) सत्वैः
नैसर्गिकोप्युत्ससृजे विरोधः ॥ ४६ ॥
यस्यात्मगेहे नयनाभिरामा
कान्तिर्हिमांशोरिव सन्निविष्टा ।

पतिं सुषेणं नाम नृपतिम् उद्दिश्य अभिसन्धाय, शब्दान्तरच्छा अन्तःपुरपालिकया । कर्मण्यण्, टिड्ढेति ङीप् । सा कुमारी जगदे ॥ ४५ ॥

नीपेति । यज्वा विधिवदिष्टवान् । "सुयजोर्ङ्वनिप्" इति ङ्वनिप्प्रत्ययः । एषः पार्थिवः नीपः नाम अन्वयोऽस्येति नीपान्वयः नीपवंशजः, यं सुषेणम् आश्रित्य गुणैः ज्ञानमौनादिभिः शान्तं प्रसन्नं सिद्धाश्रमम् ऋष्याश्रमम् एत्य प्राप्य, सत्वैः गजसिंहादिभिः प्राणिभिः इव, नैसर्गिकः स्वाभाविकः अपि परस्परेण विरोधः उत्ससृजे त्यक्तः ॥ ४६ ॥

यस्येति । हिमांशोः कान्तिः चन्द्रकिरणः इव नयनयोः अभिरामा यस्य सुषेणस्य कान्तिः शोभा आत्मगेहे स्वभवने सन्निविष्टा संक्रान्ता । अविषह्यं विसोढुमशक्यं तेजः प्रतापम् । हर्म्येषु धनिकमन्दिरप्रान्तेषु । "हर्म्यादि धनिनां

(1) The Nipas were a branch of the Panchalas who occupied the districts lying between the Chumbul and north of the Ganges.

(१) शान्तं प्रसन्नशब्दार्थं शान्तरक्षाख्यदमिति यावत् ।

हर्म्याग्रसंरूढतृणाङ्कुरेषु
तेजोऽविषह्यं रिपुमन्दिरेषु (१) ॥ ४७ ॥
यस्यावरोधस्तनचन्दनानां
प्रक्षालनाद्वारिविहारकाले।
कलिन्दकन्या(२) मथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति (३) ॥ ४८ ॥

वासः" इत्यमरः। संरूढाः तृणाङ्कुराः येषां तेषु शून्येषु इत्यर्थः। रिपुमन्दिरेषु शत्रुनगरेषु। "मन्दिरं नगरे गृहे" इति विश्वः। सन्निविष्टम्। स्वजनाह्लादको दिग्जयपथ इति भावः ॥ ४७ ॥

यस्येति। यस्य सुषेणस्य वारिविहारकाले जलक्रीड़ासमये अवरोधानाम् अन्तःपुराङ्गनानां स्तनेषु चन्दनानांमलयजानां प्रक्षालनात् हेतोः, कलिन्दः नाम शैलः तत्कन्या यमुना। "कालिन्दी सूर्यतनया यमुना शमनस्वसा" इत्यमरः। मथुरा नाम अस्य राज्ञः नगरी तां गता अपि गङ्गाया विप्रकृष्टापि इत्यर्थः। मथुरायां गङ्गाभावं (गङ्गायाः अभावम्) सूचयत्यपिशब्दः। कालिन्दीतीरे मथुरा लवणासुरवधकाले शत्रुघ्नेन निर्म्मास्यत इति वक्ष्यति तत्तयमधुना मथुरासम्भव इति चिन्त्यम्। मथुरा

(१) "क्रूरं क्रूरं वैरान्वेषुः" इति दिनकरः।

(२) "क्व तापि तरुघातपं कलयता हरौ दृशं चमरुरतदुर्विधां वसयिता मतेर्विधुता। कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी मदीयमतिदुम्बिनी भवतु कापि कादम्बिनी" इति रसगङ्गाधरेऽपि कलिन्दगिरिनन्दिनीतटविशेषे वर्णने इति।

(३) "एतेन शत्रुःपुराधिष्ठानवर्णनमभिव्यञ्जितम्" इति दिनकरः।

वस्तेन (१) तार्क्ष्यात्(२) किल कालियेन
मणिं विसृष्टं यमुनौकसा यः ।
वक्षःस्थलव्यापिरुचं दधानः
सकौस्तुभं क्षेपयतीव कृष्णम् ॥ ४९ ॥
सम्भाव्य भर्त्तारममुं युवानं
मृदुप्रवालोत्तरपुष्पशय्ये (३) ।

मधुरापुरीति शब्दभेदः यद्वा सान्वेति । गङ्गायाः भागीरथ्याः ऊर्म्मिभिः संसक्तजला इव भाति धवलचन्दनसंसर्गात् प्रयागादन्यत्रापि गङ्गासङ्गतेव भाति इत्यर्थः । "सितासिते हि गङ्गायमुने" इति षष्ठापथः॥ ४८ ॥

अस्तेनेति । तार्क्ष्यात् गरुड़ात् वस्तेन यमुना औकः स्थानं यस्य तेन कालियेन नाम नागेन विसृष्टं किल अभयदाननिष्क्रयत्वेन दत्तं किलेति ऐतिह्ये वक्षःस्थलव्यापिरुचं मणिं दधानः यः सुपेणः सकौस्तुभं कृष्णं विष्णुं क्षेपयति इव व्रीड़यति इव । अर्त्तिक्षीत्यादिना पुगागमः । कौस्तुभमणेरप्युत्कृष्टोऽस्य मणिः इति भावः ॥ ४९ ॥

सम्भाव्येति । युवानम् अमुं सुपेणं भर्त्तारं सम्भाव्य मत्वा

---

(1) Both Dinakara and Vallabha read "वातेन" ।

(२) तार्क्ष्यस्य कश्यपस्य अपत्यं पुमान् तार्क्ष्यो गरुड़ः । ४

(३) "कोमलविल्वपत्राधिकक्षुमसमयनीये । उत्तरपदे चाधिक्यं द्योतयन् सन् निदर्शनमाह । यथा "दूर्वायवाङ्कुरश्यामलगुभिन्नपुटकौसरं, शालिवत्सं प्रसूतं स गोशालायै विधि." । इति वज्रमः ।

वृन्दावने चैत्ररथादनूने
निर्विश्यतां सुन्दरि यौवनश्रीः ॥ ५० ॥
अध्यास्य चाम्भःपृषतोक्षितानि
शैलेयगन्धीनि(१) शिलातलानि ।
कलापिनां प्रावृषि पश्य नृत्यं
कान्तासु गोवर्धनकन्दरासु ॥ ५१ ॥

पतिलेनाङ्गीकृत्य इत्यर्थः मृदुप्रवालोत्तरा उपरिप्रस्तारित-कोमलपल्लवा पुष्पशय्या यस्मिन् तत् तस्मिन् चैत्ररथात् कुबेरोद्यानात् अनूने वृन्दावने वृन्दावननामके उद्याने हे सुन्दरि यौवनश्रीः यौवनफलं निर्विश्यतां भुज्यताम् ॥ ५० ॥

अध्यास्येति। किञ्च, प्रावृषि वर्षासु कान्तासु गोवर्धनस्य अद्रेः कन्दरासु दरीषु। "दरी तु कन्दरो वा स्त्री" इत्यमरः। अम्भसः पृषतैः बिन्दुभिः उक्षितानि सिक्तानि शिलायां भवं शैलेयम्। "शिलाजतु च शैलेयम्" इति यादवः। यद्वा, शिलापुष्पाख्यः ओषधिविशेषः। "कालानुसार्यशैलाभपुष्पयोतगिवानि तु शैलेयम्" इत्यमरः। 'शिलायाश्चः' इत्यत्र शिलाया इति योगविभागादिवार्थे छप्रत्ययः। तद्वन्ति शैलेयगन्धीनि शिलातलानि अध्यास्य अधिष्ठाय कलापिनां बर्हिणां नृत्यं पश्य ॥ ५१ ॥

---

(1) Vallabha reads शैलेयगन्धीनि and explains the same by "शिलोत्पन्नपत्राणि, शिलाकुसुमानीति"।

नृपं तमावर्त्तमनोज्ञनाभिः
सा व्यत्यगादन्यवधूर्भविष्णुः ।
महीधरं मार्गवशादुपेतं
स्रोतोवहा सागरगामिनीव (१) ॥ ५२ ॥
अथाङ्गदाश्लिष्टभुजं भुजिष्या
हेमाङ्गदं नाम कलिङ्गनाथम् ।
आसेदुषीं सादितशत्रुपक्षं
बालामवालेन्दुमुखीं बभाषे ॥ ५३ ॥

नृपमिति । "स्यादावर्त्तोऽम्भसां भ्रमः" इत्यमरः । आवर्त्त-मनोज्ञा नाभिः यस्याः सा, इदञ्च नदीसाम्यार्थमुक्तम् । अन्य-वधूः अन्यपत्नी भविष्णुः भाविनी सा कुमारी तं नृपं, सागर-गामिनी सागरं गन्तुं स्रोतोवहा नदी मार्गवशात् उपेतं प्राप्तं महीधरं पर्व्वतम् इव, व्यत्यगात् अतीत्य गता ॥ ५२ ॥

अथेति । अथ भुजिष्या किङ्करी सुनन्दा । "भुजिष्या किङ्करी मता" इति हलायुधः । अङ्गदाश्लिष्टभुजं केयूरनद्धबाहुं सादितशत्रुपक्षं विनामितशत्रुवर्गं हेमाङ्गदं नाम कलिङ्गनाथम् आसेदुषीम् आसन्नाम् अवालेन्दुमुखीं पूर्णेन्दुमुखीं बालाम् इन्दुमतीं बभाषे ॥ ५३ ॥

---

(१) सागरं भविष्यतीति, सागरगामिनी, भविष्यति, यस्मादिति क्वचित्, ।

असौ महेन्द्राद्रिसमानसारः(१)
पतिर्महेन्द्रस्य महोदधेश्च।
यस्य चरत्सैन्यगजच्छलेन
यावासु यातीव पुरो महेन्द्रः॥ ५४॥
जग्राव तारेखे सुभुजो भुजाभ्यां
विभर्त्ति यश्चापभृतां पुरोगः।
रिपुस्त्रियां(२) साञ्जनवाष्पसेके
वन्दीकृतानामिव पद्धती हे॥ ५५॥

असाविति। महेन्द्राद्रेः समानसारः तुल्यसत्वः असौ हेमाद्रेः महेन्द्रस्य नाम कुलपर्व्वतस्य महोदधेश्च पतिः स्वामी। महेन्द्रमहोदधी एवास्य गिरिजलदुर्गे इति भावः। यस्य यावासु चरतां मदस्राविणां सैन्यगजानां छलेन महेन्द्रः महेन्द्राद्रिः पुरः अग्रे याति इव, अद्रिकल्पा अस्य गजाः इत्यर्थः॥ ५४॥

जग्रावेति। सुभुजः चापभृतां पुरोगः धनुर्धराग्रेसरः यः वन्दीकृतानां प्रगृहीतानाम्। "प्रग्रहोपग्रहौ बन्धात्" इत्यमरः। रिपुस्त्रियां साञ्जनः वाष्पसेकः ययोः ते कज्जलमिश्रास्रसिक्ते इत्यर्थः। पद्धती इव हे व्याघातानां मौर्व्वीकिणानां रेखे

(1) "महेन्द्र इन्द्रः, अद्रिः पूर्वः, तयोः समानबलः" इति बल्लभः।

(2) Dinakara reads 'रिपुस्त्रियां' and Vallabha 'रिपुस्त्रियः'। The singular number is preferable.

यमात्मनः(१) सद्मनि सन्निकृष्टः (२)
मन्द्रध्वनित्याजितयामतूर्य्यः ।
प्रासादवातायनदृश्यवीचिः
प्रबोधयत्यर्णव एव सुप्तम् ॥ ५६ ॥
अनेन सार्द्धं विहराम्बुराशेः
तीरेषु तालीवनमर्म्मरेषु ।
द्वीपान्तरानीतलवङ्गपुष्पैः
अपाकृतस्वेदलवा मरुद्भिः ॥ ५७ ॥

राज्ञो भुजाभ्यां बिभर्त्ति। द्विवचनात् सव्यसाचित्वं गम्यते रिपुश्रियां भुजाभ्यामेवाहरणात् तद्गतरेखयोस्तत्पदवीत्वेनोत्प्रेक्षा तयोः श्यामत्वात् साङ्गनाशुसिकोक्तिः ॥ ५५ ॥

यमिति । आत्मनः सद्मनि सुखं यं हेमाङ्गदं सन्निकृष्टः समीपस्थः अत एव प्रासादवातायनैः दृश्यवीचिः मन्द्रेण गम्भीरेण । "मन्द्रस्तु गम्भीरे" इत्यमरः । ध्वनिना त्याजितं विवर्जितं यामस्य तूर्यप्रहरावसानसूचकं वाद्यं येन सः तथोक्तः । "द्वौ यामप्रहरौ समौ" इत्यमरः । अर्णवः एव प्रबोधयति । अर्णवस्यैव तूर्यकार्यकारित्वात् तदैयर्थ्यम् इत्यर्थः । समुद्रस्यापि सेव्यः किमन्येषाम् इति भावः ॥ ५६ ॥

अनेनेति । अनेन राज्ञा सार्द्धं तालीवनैः मर्म्मरेषु मर्म्मरेति

(१) "यमात्मन इति दृष्टपौनरुक्त्यं चिन्त्यम्" इति दिनकरः ।

(2) Vallabha reads "सन्निविष्टम्" and translates into 'कृतोपभोगम्' ।

प्रलोभिताप्याकृतिलोभनीया(१)
विदर्भराजावरजा तयैवम्।
तस्मादपावर्त्तत दूरकृष्टा
नीत्येव लक्ष्मीः प्रतिकूलदैवात् ॥ ५८ ॥
अथोरगाख्यस्य पुरस्य नाथं
दौवारिकी देवसरूपमेत्य।

ध्वनतु। "अथ मर्म्मरः स्वनिते वल्कपर्णानाम्" इत्यमरवचनात् गुणपरस्यापि मर्म्मरशब्दस्य गुणिपरत्वं प्रयोगादवसेयम्। अम्बुराशेः समुद्रस्य तीरेषु द्वीपान्तरेभ्यः आनीतानि लवङ्ग-पुष्पाणि देवकुसुमानि यैः तैः। "लवङ्गं देवकुसुमम्" इत्यमरः। मरुद्भिः वातैः अपाकृताः प्रशमिताः स्वेदस्य लवाः विन्दवः यस्याः सा तथाभूता सती विहर क्रीड़ ॥ ५७ ॥

प्रलोभितेति। आकृत्या रूपेण लोभनीया आकर्षणीया न तु वर्णनमात्रेण इत्यर्थः। विदर्भराजावरजा भोजानुजा इन्दुमती तया सुनन्दया एवं प्रलोभिता प्रचोदिता अपि, नीत्या पुरुषकारेण दूरकृष्टा दूरम् आनीता लक्ष्मीः प्रतिकूलं दैवं यस्य तस्मात् पुंसः इव, तस्मात् हेमाङ्गदात् अपावर्त्तत प्रति-निवृत्ता ॥ ५८ ॥

अथेति। अथ द्वारे नियुक्ता दौवारिकी सुनन्दा। "तत्र नियुक्त इति ठक्प्रत्ययः। द्वारादीनां चेत्यौ आगमः।

(१) "दाहेन रूपेण इवं दर्शयते दाहवं इव तस्मिन् मृगे साधोरिति भावः" इति दिनकरः।

इतश्चकोराक्षि विलोकयेति
पूर्वानुशिष्टां निजगाद भोजाम् ॥ ५९ ॥
पाण्ड्योऽयमंसार्पितलम्बहारः
कृताङ्गरागो हरिचन्दनेन ।
आभाति बालातपरक्तसानुः
सनिर्झरोद्गार इवाद्रिराजः ॥ ६० ॥

आकारेण देवसरूपं देवतुल्यम् उरगाख्यस्य पुरस्य पाण्ड्यदेशे कान्यकुब्ज-तीरवर्त्ति-नागपुरस्य नाथम् एत्य प्राप्य, हे चकोराक्षि इतो विलोकय इति पूर्व्वानुशिष्टां पूर्व्वम् उक्तां भोजस्य राज्ञः गोत्रापत्यं स्त्रियं भोजाम् इन्दुमतीम् । क्रौड्यादिभ्यश्चेत्यत्र भोजात् क्षत्रियादित्युपसंख्यानात् यञ्प्रत्ययः, यञञोरिति चाप् । निजगाद इतो विलोकयेति पूर्व्वमुक्ता पश्चादुक्तव्यं निजगाद इत्यर्थः ॥ ५९ ॥

पाण्ड्य इति । अंसयोः अर्पिताः लम्बन्ते इति लम्बाः हाराः यस्य स हरिचन्दनेन गोशीर्षाख्येन चन्दनेन । "तैलपर्णिकगोशीर्षे हरिचन्दनमस्त्रियाम्" इत्यमरः । कृताङ्गरागः सिद्धानुलेपनः अयं पाण्ड्यानां जनपदानां राजा पाण्ड्यः पाण्ड्यजनपदशब्दात् क्षत्रियात् अण्वक्तव्य इति अण्प्रत्ययः तस्य राजन्यपत्यवदिति वचनात्। बालातपेन रक्ताः अरुणाः सानवः यस्य स सनिर्झरोद्गारः प्रवाह-स्यन्दन-सहितः । "वारिप्रवाहो निर्झरो झरः" इत्यमरः । अद्रिराजः इव आभाति ॥ ६० ॥

विन्ध्यस्य संस्तम्भयिता(१) महाद्रेः
निःशेषपीतोज्झितसिन्धुराजः (२) ।
प्रीत्याश्वमेधावभृथार्द्रमूर्त्तेः
सौस्नातिको यस्य भवत्यगस्त्यः ॥ ६१ ॥
अस्मं हरादाप्नवता दुरापं
येनेन्द्रलोकावजयाय दृप्तः ।

विन्ध्येति । विन्ध्यस्य नाम्नः महाद्रेः तपनमार्गनिरोधाय वर्द्धमानस्य इति शेषः संस्तम्भयिता निवारयिता निःशेषं पीतः उज्झितः पुनः त्यक्तः सिन्धुराजः समुद्रः येन स अगस्त्यः अश्वमेधस्य अवभृथे दीक्षान्ते कर्म्मणि । "दीक्षान्तोऽवभृथो यज्ञः" इत्यमरः । आर्द्रमूर्त्तेः स्नातस्य इत्यर्थः यस्य पाण्ड्यस्य प्रीत्या स्नेहेन न तु दाक्षिण्येन सुस्नातं पृच्छतीति सौस्नातिकः भवति । पृच्छती सुस्नातादिभ्य इत्युपसंख्यानात् ठक् ॥ ६१ ॥

अस्त्रमिति । पुरा पूर्वं जनस्थानस्य खरालयस्य विमर्दग्रही दृप्तः उद्धतः लङ्काधिपतिः रावणः दुरापं दुर्लभम् अस्त्रं ब्रह्मशिरोनामकं हरात् आप्नवता येन पाण्ड्येन सन्धाय इन्द्र-

---

(१) पुरा किल मेरोः अर्द्धमानं तपनमार्गरोधिनं विन्ध्याद्रिं देवासुरोधादुपलब्ध प्रणतं तं शिष्यमूर्त्तं "यथा दक्षिणेन तिष्ठ दावदहं निवर्त्तये" इत्युक्त्वा महर्षिरगस्त्यः दक्षिणापथमध्यितः न पुनरायातः । अतो हि 'अगस्त्यपाथा'इति लोकानामाभाषणम् ।

(२) इत्याहुपौराणिकाः । वातापेर्यादसिरक्षसंवसतेः निर्मथमुखिला तत्रं ब्राह्मणैर्भीतिभिः दृष्ट्वाहिपट्टना देवा अगस्त्यं शरणं ययुः । स किल महर्षिः समुद्रेण महोदधिं निःशेषं पीत्वा सान् देवानवधीतवदिति पुराणवादः ।

पुरा जनस्थानविमर्दशङ्की(१)
सन्धाय लङ्काधिपतिः प्रतस्थे ॥ ६२ ॥
अनेन पाणौ विधिवद्गृहीते
महाकुलीनेन महीव गुर्वी ।
रत्नानुविद्धार्णवमेखलायाः
दिशः सपत्नी भव दक्षिणस्याः ॥ ६३ ॥
ताम्बूलवल्लीपरिणद्धपूगा-
खेलालतालिङ्गितचन्दनासु ।

लोकावजयाय इन्द्रलोकं जेतुं प्रतस्थे । इन्द्रविजयिनो रावणस्यापि विजेता इत्यर्थः ॥ ६२ ॥

अनेनेति । महाकुलीनेन महाकुले जातेन । "महाकुलादञखञौ" इति खञ्प्रत्ययः । अनेन पाण्डवेन पाणौ त्वदीये विधिवत् यथाशास्त्रं गृहीते सति गुर्वी गुरुः । वोतोगुणवचनादिति ङीप् । मही इव रत्नैः अनुविद्धः व्याप्तः अर्णवः एव मेखला यस्याः तस्याः । इदं विशेषणं मद्यामिन्दुमत्याञ्च योज्यम् । दक्षिणस्याः दिशः सपत्नी भव । अनेन सपत्नान्तराभावो ध्वन्यते ॥ ६३ ॥

ताम्बूलेति । ताम्बूलवल्लीभिः नागवल्लीभिः परिणद्धाः परि-

(1) Janasthana lay along a portion of the Karamandal Coast comprising probably the northern districts of the Karnatic and forming formerly a part of the Dandakaranya.

तमालपत्रास्तरणासु रन्तुं
प्रसीद शश्वन्मलयस्थलीषु (१) ॥ ६४ ॥
इन्दीवरश्यामतनुर्नृपोऽसौ
त्वं रोचनागौरशरीरयष्टिः (२) ।
अन्योन्यशोभापरिवृद्धये वां
योगस्तड़ित्तोयदयोरिवास्तु (३) ॥ ६५ ॥

रम्भाः पूगाः क्रमुकाः यासु । "ताम्बूलवल्ली ताम्बूली नागवल्लापि" इति, "घोण्टा तु पूगः क्रमुकः" इति च अमरः । एलालताभिः आलिङ्गिताः चन्दनाः मलयजाः यासु तासु । "गन्धसारो मलयजो भद्रश्रीयन्दनोऽस्त्रियाम्" इत्यमरः । तमालस्य तापिञ्छस्य पत्राणि एव आस्तरणानि यासु तासु । "कालस्कन्धस्तमालः स्यात् तापिञ्छोऽपि" इत्यमरः । मलयस्थलीषु शश्वत् मुहुः सदा वा रन्तुं प्रसीद अनुकूला भव ॥ ६४ ॥

इन्दीवरेति । असौ नृपः इन्दीवरश्यामतनुः, त्वं रोचना गोरोचना इव गौरी शरीरयष्टिः यस्याः सा, ततः तड़ित्तोयदयोः विद्युन्मेघयोः इव वां युवयोः योगः समागमः अन्योन्यशोभायाः परिवृद्धये अस्तु ॥ ६५ ॥

---

(१) मलयस्थलीषु मलयाद्रेरुपत्यकासु इत्यर्थः ।

(२) "यष्टिशब्दः श्रेष्ठार्थः" इति दिनकरः । यष्टिशब्दो हि शरीरादिशब्दात् परं प्रयुक्तः श्रीमतो बोधयन् श्रेष्ठत्वं गमयतीत्यनुसन्धेयम् ।

(३) "तडिद्विद्युतोः चपलत्वयोगात् श्लेषोक्तिः" इति दिनकरः ।

स्वसुर्विदर्भाधिपतेस्तदीयः
लेभेऽन्तरं चेतसि नोपदेशः ।
दिवाकरादर्शनबद्धकोशे
नक्षत्रनाथांशुरिवारविन्दे ॥ ६६ ॥
सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे
विवर्णभावं स स भूमिपालः ॥ ६७ ॥
तस्यां रघोः सूनुरुपस्थितायां
वृणीत मां नेति समाकुलोऽभूत् ।

स्वसुरिति । विदर्भाधिपतेः भोजस्य स्वसुः इन्दुमत्याः चेतसि तदीयः सुनन्दासम्बन्धी उपदेशः वाक्यं दिवाकरस्य अदर्शनेन बद्धकोशे मुकुलिते अरविन्दे नक्षत्रनाथांशुः चन्द्रकिरणः इव अन्तरम् अवकाशं न लेभे ॥ ६६ ॥

सञ्चारिणीति । पतिंवरा सा इन्दुमती रात्रौ सञ्चारिणी दीपशिखा इव यं यं भूपालं व्यतीयाय अतीत्य गता स स भूमिपालः स सर्वः इत्यर्थः । नित्यद्वीप्सयोरिति द्वीप्सायां द्विर्वचनम् । नरेन्द्रमार्गे राजपथे अट्टाख्यः रट्टभेदः इव । "स्यादट्टः पौममस्त्रियाम्" इत्यमरः । विवर्णभावं विच्छायत्वम् अट्टस्तु तमोहत्वं प्रपेदे ॥ ६७ ॥

तस्यामिति । तस्याम् इन्दुमत्याम् उपस्थितायाम् आस-

वामेतरः संशयमस्य बाहुः (१)
केयूरबन्धोच्छ्वसितैर्ननोद(२) ॥ ६८ ॥
तं प्राप्य सर्वावयवानवद्यं
व्यावर्त्ततान्योपगमात् कुमारी ।
न हि प्रफुल्लं सहकारमेत्य
वृक्षान्तरं काङ्क्षति षट्पदाली ॥ ६९ ॥

सायां सत्यां रघोः सूनुः अजः मां गृह्णीत न वा इति समाकुलः संशयितः अभूत् । अथ अस्य अजस्य वामेतरः वामात् इतरः दक्षिणः बाहुः केयूरं बध्यते अत्र इति केयूरबन्धः भुजदण्डस्थानं तस्य उच्छ्वसितैः स्फुरणैः संशयं ननोद ॥ ६८ ॥

तमिति । कुमारी सर्वेषु अवयवेषु अनवद्यम् अदोषं तम् अजं प्राप्य अन्योपगमात् राजान्तरोपगमात् व्यावर्त्तत निवृत्ता। तथाहि, षट्पदाली भृङ्गावलिः प्रफुल्लतीति प्रफुल्लं विकसितं पुष्पितम् इत्यर्थः । प्रपूर्वात् फुल्लतेः पचाद्यच्, फलतेस्तु प्रफुल्लं इति पठितव्यम्, अनुपसर्गादिति निषेधादित्युभयथापि न कदाचिदनुपपत्तिरित्युक्तं प्राक् । सहकारं चूतविशेषम् एत्य ।

---

(१) "पुंसोऽपि दक्षिणभुजस्फुरणं प्रियाविद्वत्" इत्यादि । अत एवोक्तं कर्णाटेन दक्षिणभुजस्य विद्वत्प्रियत्वादीति दिनकरः । Compare "आकर्णितमाहमपटुं स्फुरति च बाहुः कुतः फलिष्यन्ति । अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र" इति भट्टिकाव्ये ।

(२) "केयूरस्य भुजदण्डस्थस्य बन्धो दक्षिणस्य भुजस्फुरणवशात् यानि उच्छ्वसितानि तैर्ननोद" इति दिनकरः ।

तस्मिन् समावेशितचित्तवृत्तिम्
इन्दुप्रभामिन्दुमतीमवेक्ष्य।
प्रचक्रमे वक्तुमनुक्रमज्ञा
सविस्तरं वाक्यमिदं सुनन्दा ॥ ७० ॥
इक्ष्वाकुवंश्यः ककुदं नृपाणां
ककुत्स्थ इत्याहितलक्षणोऽभूत् (१)।

"आम्रद्रुतो रसालोऽसौ सहकारोऽतिसौरभः" इत्यमरः। वृक्षान्तरं न काङ्क्षति। न हि सर्व्वोत्कृष्टवस्तुलाभेऽपि वस्त्वन्तरस्याभिलाषः स्यात् इत्यर्थः ॥ ६८ ॥

तस्मिन्निति। तस्मिन् अजे समावेशिता संक्रामिता चित्तवृत्तिः यया ताम् इन्दोः प्रभा इव प्रभा यस्याः ताम्। आह्लादकत्वादिन्दुसाम्यम्। इन्दुमतीम् अवेक्ष्य अनुक्रमज्ञा वाक्यपौर्व्वापर्य्याभिज्ञा सुनन्दा इदं वक्ष्यमाणं सविस्तरं सप्रपञ्चम्। प्रथमे वाक्यशब्द इति घञो निषेधात् "ऋदोरप्" इति अप्प्रत्ययः। "विस्तारो विग्रहो व्यासः स च शब्दस्य विस्तरः" इत्यमरः। वाक्यं वक्तुं प्रचक्रमे ॥ ७० ॥

इक्ष्वाकुरिति। इक्ष्वाकोः मनुपुत्रस्य वंश्ये भवः नृपाणां ककुदं श्रेष्ठः। "ककुद्य ककुदं श्रेष्ठे वृषांशे राजलक्षणे" इति विश्वः।

(1) Kakutstha was the son of शशाद and grand-son of Ikshvaku. His original name was पुरञ्जय. He was able to destroy the Asuras, because the supreme God Vishnu, propitiated by the prayers of the gods, consented to infuse a portion of his divine spirit into his person. See V. P. Book I. V. chp ii.

काकुत्स्थशब्दं यत उन्नतेच्छाः
श्लाघ्यं दधत्युत्तरकोशलेन्द्वाः ॥ ७१ ॥
महेन्द्रमास्थाय महोक्षरूपं
यः संयति प्राप्तपिनाकिलीलः ।
चकार बाणैरसुराङ्गनानां
गण्डस्थलीः प्रोषितपत्रलेखाः ॥ ७२ ॥

आहितलक्षणः प्रख्यातगुणः । "गुणैः प्रतीते तु कृतलक्षणाहित-लक्षणौ" इत्यमरः । ककुदि वृषांसे तिष्ठतीति ककुत्स्थः इति प्रसिद्धः कश्चित् राजा अभूत्, यतः ककुत्स्थात् आरभ्य उन्नतेच्छाः महाशयाः । "महेच्छस्तु महाशयः" इत्यमरः । उत्तरकोशलेन्द्राः राजानः दिलीपादयः श्लाघ्यं प्रशस्तं ककुत्स्थस्य अपत्यं पुमान् काकुत्स्थः इति शब्दं संज्ञां दधति बिभ्रति । तन्नामसंस्थोऽपि वंशस्य कीर्त्तिकरः इति भावः । पुरा किल पुरञ्जयो नाम साक्षाद्भगवतो विष्णोरंशावतारः कश्चिदैक्ष्वाको राजा देवैः सह समयबन्धेन देवासुरयुद्धे महोक्षरूपधारिणो महेन्द्रस्य ककुदि स्थित्वा पिनाकिलीलया निखिलमसुरकुलं निहत्य ककुत्स्थसंज्ञां लेभे इति पौराणिकी कथानुसन्धेया, वक्ष्यते चायमेवार्थः उत्तर-श्लोके ॥ ७१ ॥

महेन्द्रमिति । यः ककुत्स्थः संयति युद्धे महान् उक्षा महोक्षः । अचतुरेति निपातः । तस्य रूपम् इव रूपं यस्य तं महेन्द्रम् आस्थाय आरुह्य अत एव प्राप्ता पिनाकिनः (पिनाकं-

ऐरावतास्फालनविश्लथं यः
सङ्घट्टयन्नङ्गदमङ्गदेन ।
उपेयुषः स्वामपि मूर्त्तिमग्र्याम्
अर्द्धासनं गोत्रभिदोऽधितष्ठौ (१) ॥ ७३ ॥

पाणेः शिवस्य, ईश्वरस्य लीला येन स तथोक्तः सन् बाणैः असुराङ्गनानां गण्डस्थलीः प्रोषितपत्रलेखाः निवृत्तपत्ररचनाः चकार तन्नर्त्तनसुरानवधीत्इत्यर्थः। न हि विधवाः प्रसाध्यन्ते इति भावः ॥ ७२ ॥

ऐरावतेति । यः ककुत्स्थः, ऐरावतस्य स्वर्गजस्य आस्फालनेन ताड़नेन विश्लथं शिथिलम् अङ्गदम् ऐन्द्रम् अङ्गदेन स्वकीयेन सङ्घट्टयन् सङ्घर्षयन् स्वाम् अग्र्यां श्रेष्ठां मूर्त्तिम् उपेयुषः अपि प्राप्तस्य अपि गोत्रभिदः इन्द्रस्य अर्द्धम् आसनस्य अर्द्धासनम् । अर्द्धं नपुंसकमिति समासः । अधितष्ठौ अधिष्ठितवान् । स्वादिष्वभ्यासेन चाभ्यासस्येति अभ्यासेन व्यवायेऽपि षत्वम्। न केवलं महोक्षरूपधारिण एव तस्य ककुदमारुरुक्षत् किन्तु निजरूपधारिणोऽपि इन्द्रस्यार्द्धासनमित्यपिशब्दार्थः । अथवा, अर्द्धासनमपीत्यपेरन्वयः ॥ ७३ ॥

---

(१) गां पृथ्वीं त्रायते इति गोत्राः भूधराः, तान् भिनत्तीति गोत्रभित्। पुरा किल महेन्द्रः सपक्षान् पर्वतान् दैत्यान् देवासुरसुत्पत्य प्रजापथकारिणः वज्रेण पातयति स्म इति पुराणवार्ता। Sankara observes, गोत्र is a cow-pen and means metaphorically a cloud, where the cows of heaven (rain-waters) are concealed. In the Vedic hymns he is described as having broken asunder with his thunder-bolt, the mountains (clouds) and liberated the heavenly cows (rain-waters).

जातः कुले तस्य किलोरुकीर्त्तिः
कुलप्रदीपो नृपतिर्दिलीपः।
अतिष्ठदेकोनशतक्रतुत्वे
शक्राभ्यसूयाविनिवृत्तये यः॥ ७४॥
यस्मिन् महीं शासति वाणिनीनां
निद्रां विहारार्द्धपथे(१) गतानाम्।
वातोऽपि नास्रंसयदंशुकानि
को लम्बयेदाहरणाय हस्तम्॥ ७५॥

जात इति। उरुकीर्त्तिः महायशाः कुलप्रदीपः दिलीपः नृपतिः तस्य ककुत्स्थस्य कुले जातः किल, यः दिलीपः शक्राभ्यसूयाविनिवृत्तये न त्वशक्त्या इति भावः एकेन ऊनाः शतं क्रतवः यस्य स एकोनशतक्रतुः तस्य भावे तत्त्वे अतिष्ठत् इन्द्रप्रीतये शततमं क्रतुमवर्गेपितवान् इत्यर्थः॥ ७४॥

यस्मिन्निति। यस्मिन् दिलीपे महीं शासति सति विहरत्यत्रेति विहारः क्रीड़ास्थानं तस्य अर्द्धपथे निद्रां गतानां वाणिनीनां मत्ताङ्गनानाम्। "वाणिनी नर्त्तकी मत्ता विदग्धवनितासु च" इति विश्वः, "वाणिन्यौ नर्त्तकीमत्ते" इत्यमरश्च। अंशुकानि वस्त्राणि वातः अपि न अस्रंसयत् न अकम्पयत् आहरणाय अपहर्त्तुं कः हस्तं लम्बयेत्। तस्य आज्ञासिद्धत्वा-

(१) अर्द्धः पन्था अर्द्धपथः तस्मिन् मार्गैकदेशे इत्यर्थः।

पुत्रो रघुस्तस्य पदं प्रशास्ति
महाक्रतोर्विश्वजितः प्रयोक्ता ।
चतुर्दिगावर्जितसम्भृतां यः
मृत्पात्रशेषामकरोद्विभूतिम् ॥ ७६ ॥
आरूढमद्रीनुदधीन् वितीर्णं
भुजङ्गमानां वसतिं प्रविष्टम् ।
ऊर्ध्वं गतं यस्य न चानुबन्धि(१)
यशः परिच्छेत्तुमियत्तयालम् ॥ ७७ ॥

दक्षतोभयसिद्धाराः प्रजाः इत्यर्थः । अर्द्धधासौ पन्थाश्चेति विग्रहः, समप्रविभागे प्रमाणाभावात् नैकदेशिसमासः ॥ ७५ ॥

पुत्र इति । विश्वजितः नाम महाक्रतोः प्रयोक्ता अनुष्ठाता तस्य दिलीपस्य पुत्रः रघुः पदं पैत्र्यम् एव प्रशास्ति पालयति, यः रघुः चतसृभ्यः दिग्भ्यः आवर्जितसम्भृतां विभूतिं सम्यक् मृत्पात्रम् एव शेषः यस्याः ताम् अकरोत् विश्वजिद्-यागस्य सर्वस्वदक्षिणकत्वात् इत्यर्थः ॥ ७६ ॥

आरूढमिति । किञ्च, अद्रीन् आरूढम् उदधीन् वितीर्णम् अवगाढं सकलभूगोलव्यापकम् इत्यर्थः भुजङ्गमानां वसतिं पातालं प्रविष्टम् ऊर्ध्वं स्वर्गादिकं गतं व्याप्तम् इत्थं सर्वदिग्-व्यापि इत्यर्थः अनुबध्नाति इति अनुबन्धि च अविच्छेदकाल-चयव्यापकञ्च इत्यर्थः अत एव एवंभूतं यस्य यशः इयत्तया देशतः

(१) अनुबन्धि च "अद्यापि प्रवरस्त्रीणाम्" इति वल्लभः ।

असौ कुमारस्तमजोऽनुजातः
विविष्टयस्येव पतिं जयन्तः।
गुर्वीं धुरं यो भुवनस्य पित्रा
धुर्येण दम्यः सदृशं बिभर्त्ति ॥ ७८ ॥
कुलेन कान्त्या वयसा नवेन
गुणैश्च तैस्तैर्विनयप्रधानैः।

कालतः वा केनचित् मानेन परिच्छेत्तुं परिमातुं न शक्यं न शक्यम् ॥ ७७ ॥

असाविति। असौ अजाख्यः कुमारः विविष्टयस्य स्वर्गस्य पतिम् इन्द्रं जयन्तः इव। "जयन्तः पाकशासनिः" इत्यमरः। तं रघुम् अनुजातः तस्माज्जातः इत्यर्थः। तज्जातोऽपि तदनुजातो भवति जन्यजनकयोरानन्तर्य्यात्। "गत्यर्थाकर्म्मकश्लिषशीङ्स्थासवसजनरुहजीर्य्यतिभ्यश्च" इति क्तः। सोपसर्गत्वात् सकर्म्मकत्वम्। आह चात्रैव सूत्रे वृत्तिकारः, "श्लिषादयः सोपसर्गाः सकर्म्मकाः भवन्ति" इति। दम्यः शिक्षणीयावस्थः यः अजः गुर्वीं भुवनस्य धुरं धुर्येण धुरन्धरेण चिरनिरूढेन पित्रा सदृशं तुल्यं यथा तथा बिभर्त्ति। यथा कश्चिदल्पतरोऽपि धुर्येण महीयसा सनं सहतीत्युपनाडहारो धन्यते। "दम्यवल्लतरौ सनौ" इत्यमरः ॥ ७८ ॥

कुलेनेति। कुलेन कान्त्या शोभनेन नवेन वयसा यौवनेन विनयः प्रधानं येषां तैः तैः गुणैः श्रुतशीलादिभिश्च शक्यन्

त्वमात्मनस्तुल्यमसुं वृणीष्व
रत्नं समागच्छतु काञ्चनेन ॥ ७९ ॥
ततः सुनन्दावचनावसाने
लज्जां तनूकृत्य नरेन्द्रकन्या ।
दृष्ट्या प्रसादामलया कुमारं
प्रत्यग्रहीत् संवरणस्रजेव ॥ ८० ॥
सा यूनि तस्मिन्नभिलाषबन्धं
शशाक शालीनतया न वक्तुम् ।
रोमाञ्चलक्ष्येण स गात्रयष्टिम्
भित्वा निराक्रामदरालकेश्याः ॥ ८१ ॥

तुल्यं स्वानुरूपम् असुम् अजं त्वं वृणीष्व, किं बहुना रत्नं काञ्चनेन समागच्छतु सङ्गच्छताम् । प्रार्थनायां लोट् । रत्नकाञ्चनयोरिवात्यन्तानुरूपत्वादुवयोः समागमः प्रार्थ्यते इत्यर्थः ॥७९॥

तत इति । ततः सुनन्दावचनस्य अवसाने अन्ते नरेन्द्रकन्या इन्दुमती लज्जां तनूकृत्य सङ्कोच्य प्रसादेन मनःप्रसादेन अमलया प्रसन्नया दृष्ट्या संवरणस्य स्रजा स्वयं वरणार्थं स्रजा इव कुमारम् अजं प्रत्यग्रहीत् स्वीचकार । सम्यक् सानुरागमपश्यत् इत्यर्थः ॥ ८० ॥

सेति । सा कुमारी यूनि तस्मिन् अजे अभिलाषबन्धम् अनुरागग्रन्थिं शालीनतया अदृष्टतया । "स्यादृष्टस्तु शालीनः"

तथागतायां परिहासपूर्वं
सख्यां सखी वेवमृदावभाषे।
आर्ये व्रजामोऽन्यत इत्यवैनां
वधूरसूयाकुटिलं ददर्श ॥ ८२ ॥
सा चूर्णगौरं रघुनन्दनस्य
धात्रीकराभ्यां करभोपमोरूः।
आसञ्जयामास यथाप्रदेशं
कण्ठे गुणं मूर्त्तमिवानुरागम् ॥ ८३ ॥

इत्यमरः। गात्रीनकोपीनि अष्टाकार्ष्ण्योरिति निपातः। वक्तुं न शशाक, तथापि अरालकेश्याः (कुटिलकुञ्चितकेश्याः) सः अभिलाषवन्धः रोमाञ्चलक्षेण पुलकव्याजेन। "व्याजोऽपदेशो लक्षञ्च" इत्यमरः। गात्रयष्टिं भित्वा निराक्रामत् सात्विकाविर्भावलिङ्गेन प्रकाशितः इत्यर्थः ॥ ८१ ॥

तथेति। सख्यान् इन्दुमत्यां तथागतायां तथाभूतायां दृढानुरागायां सख्याम् इत्यर्थः सखी सहचरी। सख्यशिष्वीति भाषायामिति निपातनात् ङीप्। वेवमृत् सुनन्दा हे आर्ये पूज्ये अन्यतः अन्यं प्रति व्रजामः इति परिहासपूर्वम् आवभाषे। अथ वधूः इन्दुमती एनां सुनन्दाम् असूयया रोषेण कुटिलं ददर्श अन्यगमनस्याशङ्कितत्वात् इत्यर्थः ॥ ८२ ॥

सेति। करभः करभदेशविशेषः। "मणिबन्धादाकनिष्ठं करस्य करभो बहिः" इत्यमरः। करभः उपमा ययोः तौ तथा-

तया स्रजा मङ्गलपुष्पमय्या
विशालवक्षःस्थललम्बया सः ।
अमंस्त कण्ठार्पितबाहुपाशां
विदर्भराजावरजां वरेण्यः ॥ ८४ ॥
शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा ।

यस्याः सा करभोपमोरूः । "ऊरूत्तरपदादौपम्ये" इत्यूङ्प्रत्ययः । सा कुमारी चूर्णेन मङ्गलचूर्णेन गौरं लोहितं गुणं स्रजं मूर्त्तं मूर्त्तिमन्तम् अनुरागम् इव धात्र्याः उपमातुः सुनन्दायाः कराभ्यां रघुनन्दनस्य अजस्य कण्ठे यथाप्रदेशं यथास्थानम् आसञ्जयामास आसक्तं कारयामास न तु स्वयमासस्रज्ञ अनौचित्यात् ॥ ८३ ॥

तयेति । वरेण्यः वरणीयः उत्कृष्टः । वृञ एण्यः । सः अजः मङ्गलपुष्पमय्या मधूकादिकुसुममय्या विशालवक्षःस्थले सम्बया सम्बमानया तया प्रकृतया स्रजा विदर्भराजावरजाम् इन्दुमतीं कण्ठार्पितौ बाहू एव पाशौ यया ताम् अमंस्त । मन्यतेर्लुङ् । बाहुपाशकल्पसुखमन्वभूत् इत्यर्थः ॥ ८४ ॥

शशिनमिति । तत्र स्वयंवरे समगुणयोः तुल्यगुणयोः इन्दुमतीरघुनन्दनयोः योगेन प्रीतिः येषां ते समगुणयोगप्रीतयः पौराः पुरे भवाः जनाः इयम् अजसङ्गता इन्दुमती मेघैः मुक्तं शशिनं शरच्चन्द्रम् उपगता कौमुदी, अनुरूपं सदृशं जलनिधिम्

इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥ ८५ ॥
प्रमुदितवरपक्षमेकतस्तत्
क्षितिपतिमण्डलमन्यतो वितानम् ।
उषसि सर इव प्रफुल्लपद्मं
कुमुदवनप्रतिपन्ननिद्रमासीत् ॥ ८६ ॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
स्वयंवरवर्णनो नाम षष्ठः सर्गः ।

अवतीर्णा प्रविष्टा जह्नुकन्या भागीरथी तत्सदृशी इत्यर्थः इत्येवं नृपाणां श्रवणयोः कटु परुषम् एकम् अविसंवादि वाक्यम् एकवाक्यं विवव्रुः । मालिनीवृत्तम् ॥ ८५ ॥

प्रमुदितेति । एकतः एकत्र प्रमुदितः हृष्टः वरस्य जामातुः पक्षः वर्गः यस्य तत् तथोक्तम्, अन्यतः अन्यत्र वितानं शून्यं भग्नाग्रत्वादप्रहृष्टम् इत्यर्थः तत् क्षितिपतिमण्डलम् उषसि प्रभाते प्रफुल्लपद्मं कुमुदवनेन प्रतिपन्ननिद्रं प्राप्तनिमीलनं सरः इव सरस्तुल्यम् आसीत् । पुष्पिताग्रा वृत्तमेतत् ॥ ८६ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरि-विरचितायां
रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायां षष्ठः सर्गः ।

सप्तमः सर्गः ।

अथोपयन्ता सदृशेन (१) युक्तां
स्कन्देन साक्षादिव देवसेनाम् (२) ।
स्वसारमादाय विदर्भनाथः
पुरप्रवेशाभिमुखो बभूव ॥ १ ॥
सेनानिवेशान् पृथिवीक्षितोऽपि
जग्मुर्विभातग्रहमन्दभासः ।

भजेमहि निपीयैकं मुहुरन्यं पयोधरम् ।
मार्गस्थं बालमालोक्य स्वसन्तावादिदम्पती ॥

अथेति । अथ विदर्भनाथः भोजः सदृशेन उपयन्ता वरेण युक्ताम् अत एव साक्षात् प्रत्यक्षम् । "साक्षात् प्रत्यक्षतुल्ययोः" इत्यमरः । स्कन्देन युक्तां देवसेनाम् इव देवसेना नाम देवपत्नी स्कन्दपत्नी ताम् इव स्थितां स्वसारं भगिनीम् इन्दुमतीम् आदाय गृहीत्वा पुरप्रवेशाभिमुखः बभूव । उपजातिवृत्तं सर्गेऽस्मिन् ॥ १ ॥

सेनेति । भोजस्य राज्ञः गोत्रापत्यं स्त्री भोज्या ताम् इन्दु-

---

(1) See stanza 79 canto VI.

(२) "पूर्वं हि प्रजापतिना निर्मिते देवसेनादेवसेने प्रजापतेः पत्न्यौ बभूवतुः । ततः पूर्वपत्न्याः पतिसंगे कुमारीऽभिविक्त इत्यागमः" इति वल्लभः ।

भोज्यां प्रति व्यर्थमनोरथत्वात्
रूपेषु वेषेषु च साभ्यसूयाः ॥ २ ॥
सान्निध्ययोगात् किल तत्र शच्याः(१)
स्वयंवरक्षोभकृतामभावः ।
काकुत्स्थमुद्दिश्य समत्सरोऽपि
शशाम तेन क्षितिपाललोकः ॥ ३ ॥

मतीं प्रति व्यर्थमनोरथत्वात् रूपेषु आकृतिषु वेषेषु नेपथ्येषु च साभ्यसूयाः ईर्ष्येति निन्दन्तः किञ्च विभाते प्रातःकाले ये ग्रहाः चन्द्रादयः ते इव मन्दभासः क्षीणकान्तयः पृथिवीक्षितः नृपाः अपि सेनानिवेशान् शिबिराणि जग्मुः ॥ २ ॥

ननु कुतश्चेद्युध्यन्तां तत्राह, सान्निध्येति । तत्र स्वयंवरक्षेत्रे शच्याः इन्द्राण्याः सन्निधिः एव सान्निध्यं तस्य योगात् सद्भावात् हेतोः स्वयंवरस्य क्षोभकृतां विघ्नकारिणाम् अभावः किल । किलेति स्वयंवरविघातकाः शच्या विनाश्यन्ते इत्यागमसूचनार्थम् । तेन हेतुना काकुत्स्थम् अजम् उद्दिश्य समत्सरः अपि क्षितिपाललोकः शशाम न अकुप्यत् ॥ ३ ॥

---

(१) "पावस्थितसपुत्रपुत्रे शचीमाबाद्य यौक्तीपचारैः पूजयेत् तां च कन्यां प्रार्थयेत् "देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियभामिनि । विवाहं भाग्यमारोग्यं पुत्रलाभं च देहि मे"। इति नारायणभट्टः प्रयोगरत्नाकरे । The queen of Indra शची is looked upon as the best and most fortunate of wives as is said in the following—"इन्द्राणीमासु नारीषु सुपतीमहमस्मयं न श्रद्धा अपरं च न जरसा मरते पतिः" and also "इन्द्राणीवादितिरिव सुपुत्रा" इति ।

तावत्(१) प्रकीर्णाभिनवोपचारम्
इन्द्रायुधद्योततितोरणाङ्कम्।
वरः स वध्वा सह राजमार्गं
प्राप ध्वजच्छायनिवारितोष्णम् ॥ ४ ॥
ततस्तदालोकनतत्पराणां
सौधेषु चामीकरजालवत्सु।
बभूवुरित्थं पुरसुन्दरीणां
व्यक्तान्यकार्य्याणि विचेष्टितानि ॥ ५ ॥

तावदिति। "यावत् तावच्च साकल्ये" इत्यमरः। तावत्-प्रकीर्णाः साकल्येन प्रसारिताः अभिनवाः नूतनाः उपचाराः पुष्पप्रकारादयः यस्य तं तथोक्तम् इन्द्रायुधानि इव द्योतितानि प्रकाशितानि तोरणानि अङ्काः चिह्नानि यस्य तं ध्वजानां छाया ध्वजच्छायम्। "छायाबाहुल्ये" इति नपुंसकत्वम्। तेन निवारितः उष्णः आतपः यत्र तं राजमार्गं स वरः वोढा वध्वा सह प्राप विवेश ॥ ४ ॥

तत इति। ततः तदनन्तरं चामीकरजालवत्सु सौवर्णगवाक्ष-युक्तेषु सौधेषु तस्य अजस्य आलोकने तत्पराणाम् आसक्तानां पुरसुन्दरीणाम् इत्थं वक्ष्यमाणप्रकाराणि व्यक्तानि अन्य-

(१) "यावत्ते राजानो गताः तावदेव स वरः" इत्यादि षष्ठमः। "इन्द्रायुधैः इन्द्रधनुर्भिर्भासमानं तोरणमेव चह्नविशेषं यत्र" इति दिनकरः।

आलोकमार्गं(१) सहसा व्रजन्त्या
कयाचिदुद्वेष्टनवान्तमाल्यः ।
वद्धुं न सम्भावित एव तावत्
करेण रुद्धोऽपि च केशपाशः ॥ ६ ॥
प्रसाधिकालम्बितमग्रपादम्
आक्षिप्य काचित् द्रुवरागमेव ।

कार्य्याणि केशबन्धनादीनि येषु तानि विचेष्टितानि व्यापाराः बभूवुः ॥ ५ ॥

तान्येवाह षड्भिः श्लोकैः, आलोकेति । सहसा आलोकमार्गं गवाक्षपथं व्रजन्त्या कयाचित् उद्वेष्टनवान्तमाल्यः उद्वेष्टनः द्रुतगतिवशात् उन्मुक्तबन्धनः अत एव वान्तमाल्यः बन्धविश्लेषेण उद्गीर्णमालः करेण रुद्धः गृहीतः अपि च केशपाशः केशकलापः । "पाशः पक्षे हस्ते च कलापार्थाः कचात्परे" इत्यमरः । तावत् आलोकमार्गप्राप्तिपर्य्यन्तं वद्धुं बन्धनार्थं न सम्भावितः न चिन्तितः एव ॥ ६ ॥

प्रसाधिकेति । काचित् प्रसाधिकया अलङ्कर्त्र्या आलम्बितं रक्षनार्थं धृतं द्रुवरागम् एव आर्द्रालक्तकम् एव, अग्रञ्चासौ पादश्च इति अग्रपादः इति कर्म्मधारयसमासः । "हस्ताग्र-

---

(१) आलोक्यते यस्मात् इति आलोकः । अपादाने घञ् । यतोऽवलोकनं भवति तत्र स्थले । "केशपाशः केशकलापः वद्धुं तावन्न सम्भावित एव न चिन्तितः परं नापि करेण रुद्धः । यस्य करेणापि न रोधस्तस्य बन्धो न संभवतीति भावः" इति दिनकरः ।

उत्सृष्टलीलागतिरागवाचात्
अलक्तकाङ्कां पदवीं ततान ॥ ७ ॥
विलोचनं दक्षिणमञ्जनेन
सम्भाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसन्निकर्षं
ययौ शलाकामपरा वहन्ती ॥ ८ ॥
जालान्तरप्रेषितदृष्टिरन्या
प्रस्थानभिन्नां न ववन्ध नीवीम् ।

दस्तादयो गुणगुणिनोर्भेदाभेदाभ्याम्" इति वामनः । तम् आक्षिप्य आकृष्य उत्सृष्टलीलागतिः त्यक्तमन्दगमना सती आ गवाक्षात् गवाक्षपर्य्यन्तं पदवीं पन्थानम् अलक्तकाङ्कां लाक्षा-रागचिह्नां ततान विस्तारयामास ॥ ७ ॥

विलोचनमिति । अपरा स्त्री दक्षिणं विलोचनम् अञ्जनेन सम्भाव्य अलङ्कृत्य संभ्रमात् इति भावः । तद्वञ्चितं तेन अञ्ज-नेन वर्जितं वामनेत्रं यस्याः सा सती तथैव शलाकाम् अञ्जन-शूलिकां वहन्ती सती वातायनसन्निकर्षं गवाक्षसमीपं ययौ । दक्षिणग्रहणं सम्भ्रमात् व्युत्क्रमकरणद्योतनार्थम्, "सव्यमक्षि हि पूर्वं मनुष्या अञ्जते" इति श्रुतेः ॥ ८ ॥

जालेति । अन्या स्त्री जालान्तरप्रेषितदृष्टिः गवाक्षमध्य-प्रेरितदृष्टिः सती प्रस्थानेन गमनेन भिन्नां त्रुटितां नीवीं वसन-ग्रन्थिम् । "नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवाससः" इति

नाभिप्रविष्टाभरणप्रभेण
हस्तेन तस्यावलम्ब्य वासः ॥ ९ ॥
अर्धाञ्चिता सत्वरमुत्थितायाः
पदे पदे दुर्निमिते गलन्ती।
कस्याश्चिदासीद्रशना तदानीम्
अङ्गुष्ठमूलार्पितसूत्रशेषा ॥ १० ॥
तासां मुखैरासवगन्धगर्भैः
व्याप्तान्तराः सान्द्रकुतूहलानाम् (१)।

विश्वः। न ववन्य किन्तु नाभिप्रविष्टा आभरणानां कङ्कणादीनां प्रभा यस्य तेन। प्रभैव नाभेराभरणमभूत् इति भावः। हस्तेन वासः अवलम्ब्य गृहीत्वा तस्थौ ॥ ९ ॥

अर्धेति। सत्वरम् उत्थितायाः कस्याश्चित् अर्धाञ्चिता मणिभिः अर्धगुम्फिता दुर्निमिते संभ्रमात् दुरुत्क्षिप्ते। "ष्टुमिञ् प्रक्षेपणे" इति धातोः कर्मणि क्तः। पदेपदे प्रतिपदम्। वीप्सायां द्विर्भावः। गलन्ती गलद्भवा सती रशना मेखला तदानीम् अङ्गुष्ठमूले अर्पितं सूत्रम् एव शेषः यस्याः सा आसीत् ॥ १० ॥

तासामिति। तदानीं सान्द्रकुतूहलानां तासां स्त्रीणाम् आसवगन्धः गर्भे येषां तैः विलोलानि नेत्राणि एव भ्रमराः येषां तैः मुखैः व्याप्तान्तराः छन्नावकाशाः गवाक्षाः सहस्रपत्रा-

(१) "सान्द्रमधिकं कुतूहलं यासां तासाम्" इति दिनकरः।

विलोलनेत्रभ्रमरैर्गवाक्षाः
सहस्रपत्राभरणा इवासन् ॥ ११ ॥
ता राघवं दृष्टिभिरापिबन्त्यः
नार्य्यो न जग्मुर्विषयान्तराणि ।
तथाहि शेषेन्द्रियवृत्तिरासां
सर्व्वात्मना चक्षुरिव प्रविष्टा (१) ॥ १२ ॥
स्थाने हृता भूपतिभिः परोक्षैः
स्वयंवरं साधुममंस्त भोज्या ।

भरणाः इव कमलालङ्कृताः इव । "सहस्रपत्रं कमलम्" इत्यमरः । आसन् ॥ ११ ॥

ता इति । ताः नार्यः रघोरपत्यं राघवम् अजम् । तस्यापत्यमित्यण्प्रत्ययः । दृष्टिभिः आपिबन्त्यः अतितृष्णया पश्यन्त्यः विषयान्तराणि अन्यान् विषयान् न जग्मुः न विविदुः इत्यर्थः । तथाहि, आसां नारीणां शेषेन्द्रियवृत्तिः चक्षुर्व्यतिरिक्तयोत्रादीन्द्रियव्यापारः सर्व्वात्मना स्वरूपकार्त्स्न्येन चक्षुः प्रविष्टा इव । श्रोत्रादीनीन्द्रियाणि स्वातन्त्र्येण ग्रहणाशक्तेः चक्षुरेव प्रविश्य कौतुकात् स्वयमप्येनम् उपलभन्ते किमु, अन्यथा स्वविषयाधिगमः किं न स्यात् इति भावः ॥ १२ ॥

- अथ कथा इति वक्ष्यति ताः कथयति, स्थाने इत्यादिभिस्त्रिभिः । भोज्या इन्दुमती परोक्षैः अदृष्टैः भूपतिभिः हृता सती-

(१) प्रविशतेर्मध्यमैकाग्र्यं दर्शयति मल्लिः ।

पद्मेव नारायणमन्यथासौ
लभेत कान्तं कथमात्मतुल्यम् ॥ १३ ॥
परस्परेण स्पृहणीयशोभं
नचेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां वितथोऽभविष्यत् ॥ १४ ॥

वेयमिति प्रार्थिता अपि स्वयंवरम् एव साधु हितम् अमंस्त मेने न तु परोक्षमेव कञ्चित् प्रार्थकं ववे, स्याने युक्तमेतत्। "युक्ते हे साम्प्रतं स्याने" इत्यमरः। कुतः अन्यथा स्वयंवराभावे असौ इन्दुमती पद्ममस्या अस्तीति पद्मा लक्ष्मीः। "अर्श आदिभ्योऽच्" इत्यच्प्रत्ययः। नारायणम् इव आत्मतुल्यं स्वानुरूपं कान्तं पतिं कथं लभेत न लभेत एव सदसद्विवेकासौकर्य्यात् इति भावः ॥ १३ ॥

परस्परेणेति। स्पृहणीयशोभं सर्व्वाभ्यासौन्दर्य्यम् इदं द्वन्द्वं मिथुनम्। द्वन्द्वं रहस्येत्यादिना निपातः। परस्परेण न अयोजयिष्यत् चेत् न योजयेत् यदि, तर्हि प्रजानां पत्युः विधातुः अस्मिन् द्वये द्वन्द्वे रूपविधानयत्नः सौन्दर्य्यनिर्म्माणप्रयासः वितथः अभविष्यत् एतादृगानुरूप्यस्योपमानान्तराभावात् इति भावः। लिङ्निमित्ते लृङ् क्रियातिपत्तावितिं लृङ्। "कृतयित् कारणवैगुण्यात् क्रियाया अनभिनिष्पत्तिः क्रियातिपत्तिः" इति हत्तिकारः ॥ १४ ॥

रतिस्मरौ(१) नूनमिमावभूतां
राज्ञां सहस्रेषु तथाहि बाला ।
गतेयमात्मप्रतिरूपमेव
मनो हि जन्मान्तरसङ्गतिज्ञम् ॥ १५ ॥
इत्युद्गताः पौरवधूमुखेभ्यः
शृण्वन् कथाः श्रोत्रसुखाः कुमारः ।

रतीति । रतिस्मरौ यौ नित्यसहचरौ इत्यभिप्रायः नूनं तौ एव इयञ्च अयञ्च इमौ दम्पती अभूताम् एतद्रूपेण उत्पन्नौ । कुतः तथाहि इयं बाला राज्ञां सहस्रेषु राजसहस्रमध्ये सत्यपि व्यत्यासकारणे इति भावः । आत्मप्रतिरूपं स्वतुल्यम् एव । "तुल्यसङ्काशनीकाशप्रकाशप्रतिरूपकाः" इति दण्डी । गता प्राप्ता । तदपि कथं ज्ञातमत आह, हि यस्मात् मनः जन्मान्तरसङ्गतिज्ञं भवति । तदेवेदमिति प्रत्यभिज्ञाभावेऽपि वासनाविशेषवशादनुभूतार्थेषु मनःप्रवृत्तिरस्तीति ॥१५॥

इतीति । इति "स्थाने हता"इत्याद्युक्तप्रकारेण पौरवधूमुखेभ्यः उद्गताः उत्पन्नाः श्रोत्रयोः सुखाः मधुराः । सुखशब्दो विशेषनिघ्नः । "पायसुखसुखादि च" इत्यमरः । कथाः गिरः शृण्वन् कुमारः अजः मङ्गलसंविधाभिः मङ्गलरचनाभिः उद्भासितं

---

(1) Dinakara reads ज्ञातिस्मरौ and explains the same by "ज्ञातयः । स्वार्थे अण् । ज्ञातेः अरौ ज्ञातिस्मरौ । मयूरव्यंसक" ।

उद्भासितं मङ्गलसंविधाभिः(१)
सम्बन्धिनः सद्म समाससाद ॥ १६ ॥
ततोऽवतीर्य्याशु करेणुकायाः
स कामरूपेश्वरदत्तहस्तः(२)।
वैदर्भनिर्दिष्टमथो विवेश
नारीमनांसीव चतुष्कमन्तः ॥ १७ ॥
महार्हसिंहासनसंस्थितोऽसौ
सरत्नमर्घ्यं मधुपर्कमिश्रम्।

शोभितं सम्बन्धिनः कन्यादायिनः सद्म गृहं समाससाद प्राप ॥ १६ ॥

तत इति। ततः अनन्तरं करेणुकायाः हस्तिन्याः सकाशात् आशु शीघ्रम् अवतीर्य्य कामरूपेश्वरे दत्तः हस्तः येन स अजः अथो अनन्तरं वैदर्भेण निर्दिष्टं प्रदर्शितम् अन्तर्यत्तुष्कं चत्वरं नारीणां मनांसि इव विवेश ॥ १७ ॥

महार्हेति। महार्हसिंहासने संस्थितः असौ अजः भोजित

---

(1) The following stanza, quoted from the Bha'gavata Pura'na, enumerates a number of articles used on such auspicious occasions. "संसिक्तरथ्यापथमार्गचत्वरां प्रकीर्णमाल्याङ्कुरलाजतण्डुलां। आपूर्णकुम्भैर्दधिचन्दनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः। सवस्त्रकाञ्चनकृतकेतुभिः सकेतुभिः स्वभवनतोरणद्वारां समन्ततः। तां (मथुरां) संविविक्षौ वसुदेवनन्दनौ"।

(2) Kamrupa is in Assam. It is looked upon as a famous strong-hold of Ta'ntrika mysticism.

भोजोपनीतञ्च दुकूलयुग्मं
जग्राह सार्द्धं वनिताकटाक्षैः ॥ १८ ॥
दुकूलवासाः स वधूसमीपं
निन्ये विनीतैरवरोधदक्षैः ।
वेलासकाशं स्फुटफेनराजिः
नवैरुदन्वानिव चन्द्रपादैः (१) ॥ १९ ॥
तत्रार्चितो भोजपतेः पुरोधाः
हुत्वाग्निमाज्यादिभिरग्निकल्पः(२) ।
तमेव चाधाय विवाहसाक्ष्यं (३)
वधूवरौ सङ्गमयाञ्चकार ॥ २० ॥

उपनीतं रत्नैः सहितं सरत्नं मधुपर्कमिथम् अर्घ्यं पूजासाधनद्रव्यं दुकूलयोः चौमयोः युग्मञ्च वनिताकटाक्षैः अन्यस्त्रीणाम् अपाङ्गदर्शनैः सार्द्धं जग्राह गृहीतवान् ॥ १८ ॥

दुकूलेति । दुकूलवासाः सः अजः विनीतैः नम्रैः अवरोधदक्षैः अन्तःपुराधिकृतैः वधूसमीपं निन्ये । तत्र दृष्टान्तः, स्फुटफेनराजिः उदन्वान् समुद्रः नवैः नूतनैः चन्द्रपादैः चन्द्रकिरणैः वेलायाः सकाशं समीपम् इव । पूर्णदृष्टान्तोऽयम् ॥ १९ ॥

तत्रेति । तत्र सद्मनि अर्चितः पूजितः अग्निकल्पः अग्नि-

(1) The 17th, 18th, and 19th stanzas are omitted in the Bombay edition.

(२) आज्यादिभिः "आज्यमभीषवसाजैः" इति दिनकरः ।

(3) See कुमारिका ।

हस्तेन हस्तं परिगृह्य वध्वाः
स राजसूनुः सुतरां चकाशे।
अनन्तराशोकलताप्रवालं
प्राप्येव चूतः प्रतिपल्लवेन ॥ २१ ॥
आसीद् वरः कण्टकितप्रकोष्ठः
स्विन्नाङ्गुलिः संवहते कुमारी।

तुल्यः भोजपतेः भोजदेशाधीश्वरस्य पुरोधाः पुरोहितः। पुरोधास्तु पुरोहितः" इत्यमरः। आज्यादिभिः द्रव्यैः अग्निं हुत्वा तम् एव चाग्निं विवाहसाक्ष्ये आधाय साक्षिणं कृत्वा इत्यर्थः वधूवरौ सङ्गमयाञ्चकार योजयामास ॥ २० ॥

हस्तेनेति। स राजसूनुः हस्तेन स्वकीयेन वध्वाः हस्तं परिगृह्य, अनन्तरायाः सन्निहितायाः अशोकलतायाः प्रवालं पल्लवं प्रतिपल्लवेन स्वकीयेन प्राप्य चूतः आम्रः इव, सुतरां चकाशे ॥२१॥

आसीदिति। वरः कण्टकितः पुलकितः प्रकोष्ठः यस्य स आसीत्। "सूच्यग्रे क्षुद्रगवी च रोमहर्षे च कण्टकः" इत्यमरः। कुमारी स्विन्नाङ्गुलिः संवहते बभूव। अवोढ्रे यते, तस्मिन् हर्षे निमित्ते तत्सदृशम् आकस्मिकी सात्त्विकोदयरूपा वृत्तिः मनोभवेन कामेन समं विभक्ता इव पृथक् कृता इव। अपरार्धस्य पाठान्तरे (१) व्याख्यानान्तरम्। पाणिसमागमेन पाण्योः संकर्षेण कर्षा तयोः वधूवरयोः मनोभवस्य वृत्तिः स्थितिः समं विभक्ता

(१) पाठान्तरं यथा—"वृत्तिरस्याः पाणिसमागमेन समं विभक्तेव मनोभवस्य" इति।

तस्मिन् द्वये तत्क्षणमात्मवृत्तिः
समं विभक्तेव मनोभवेन ॥ २२ ॥
तयोरपाङ्गप्रतिसारितानि
क्रियासमाप्तिनिवर्त्तितानि ।
क्षीयन्तणामानशिरे मनोज्ञाम्
अन्योन्यलोलानि विलोचनानि ॥ २३ ॥

इव समीक्षतेव इत्यर्थः । प्राक्सिद्धस्याप्यनुरागसाम्यस्य संप्रति-तत्कार्य्यदर्शनात् पाणिस्पर्शकृतत्वमुत्प्रेक्ष्यते । अत्र वात्स्यायनः, "कन्या तु प्रथमसमागमे स्विन्नाङ्गुलिः स्विन्नमुखी च पुरुषस्तु रोमाञ्चितो भवति एभिरनयोर्भावं परीक्षेत" इति । स्त्रीपुरुषयोः स्वेदरोमाञ्चाभिधानं सात्विकमात्रोपलक्षणं न तु प्रतिनियमो विवक्षितः एभिरिति बहुवचनसामर्थ्यात् । एवं सति कुमारसम्भवे "रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुङ्खवकेतुरासीत्" इति पुंस्त्रीसमवचनं न दोषायेति ॥ २२ ॥

तयोरिति । अपाङ्गेषु नेत्रप्रान्तेषु प्रतिसारितानि प्रवर्त्तितानि क्रिययोः निरीक्षणलक्षणयोः समाप्त्या यदृच्छासङ्गत्या निवर्त्तितानि प्रत्याकृष्टानि अन्योन्यस्मिन् लोलानि सतृष्णानि । "लोलयत्नसतृष्णयोः" इत्यमरः । तयोः दम्पत्योः विलोचनानि दृशः मनोज्ञां रम्यां क्षिया निमित्तेन यत्नेन सङ्गोचम् आनशिरे प्रापुः ॥ २३ ॥

प्रदक्षिणप्रक्रमणात् क्रशानोः
उदर्चिषस्तन्मिथुनं चकाशे।
मेरोरुपान्तेष्विव वर्त्तमानम्
अन्योन्यसंसक्तमहस्त्रियामम् ॥ २४ ॥
नितम्बगुर्वी गुरुणा प्रयुक्ता
वधूर्विधाटप्रतिमेन तेन।
चकार सा मत्तचकोरनेत्रा(१)
लज्जावती लाजविसर्गमग्नौ ॥ २५ ॥

प्रदक्षिणेति। तत् मिथुनम् उदर्चिषः उद्गतज्वालस्य क्रशानोः वह्नेः प्रदक्षिणप्रक्रमणात् प्रदक्षिणीकरणात्, मेरोः उपान्तेषु समीपेषु वर्त्तमानम् आवर्त्तमानं मेरुं प्रदक्षिणीकुर्व्वत् इत्यर्थः अन्योन्यसंसक्तं परस्परसङ्गतं, मिथुनस्याप्येतद्विशेषणम्, अहश्च त्रियामा च अहस्त्रियामं रात्रिन्दिवम् इव। समाहारे द्वन्द्वैकवद्भावः। चकाशे दिदीपे ॥ २४ ॥

नितम्बेति। नितम्बेन गुर्वी अलघ्वी। "दुर्भरालघुनोर्गुर्वी" इति यादवः। विधाटप्रतिमेन ब्रह्मतुल्येन तेन गुरुणा याजकेन प्रयुक्ता शुद्धधीति नियुक्ता मत्तचकोरस्य इव नेत्रे यस्याः सा लज्जावती सा वधूः अग्नौ लाजविसर्गं चकार ॥ २५ ॥

---

(१) इतश्चतुर्भुजिरेण भूमिगाङ्कितकोडियवशात् तत्सावधूः कामीत्यत्र-चकोरनेत्रापदं साम्प्रदायिकम्।

हविःशमीपल्लवलाजगन्धी
पुण्यः कृशानोरुदियाय धूमः ।
कपोलसंसर्पिशिखः स तस्याः
मुहूर्त्तकर्णोत्पलतां प्रपेदे ॥ २६ ॥
तदञ्जनक्लेदसमाकुलाक्षं
प्रम्लानबीजाङ्कुरकर्णपूरम् (१) ।
वधूमुखं पाटलगण्डलेखम्
आचारधूमग्रहणाद् बभूव ॥ २७ ॥

हविरिति । हविषः आज्यादेः शमीपल्लवानां लाजानां च गन्धः अस्यास्तीति हविःशमीपल्लवलाजगन्धी । "शमीपल्लवमित्यान् लाजान् अञ्जलिना वपति" इति कात्यायनः । पुण्यः धूमः कृशानोः पावकात् उदिदाय उद्भूतः । कपोलयोः संसर्पिणी प्रसरणशीला शिखा यस्य सः तथोक्तः सः धूमः तस्याः वध्वाः मुहूर्त्तं कर्णोत्पलतां प्रपेदे ॥ २६ ॥

तदिति । तत् वधूमुखम् आचारेण प्रासात् धूमग्रहणात् अञ्जनस्य क्लेदः अञ्जनक्लेदः अञ्जनमिश्रवाष्पोदकम् इत्यर्थः तेन समाकुलाक्षं प्रम्लानः बीजाङ्कुरः यवाङ्कुरः एव कर्णपूरः अवतंसः यस्य तत् पाटलगण्डलेखम् अरुणगण्डस्थलञ्च बभूव ॥ २७ ॥

---

(१) "बीजात् निर्गता अङ्कुरा बीजाङ्कुराः । लाजहीनं कृत्वा धूमसाजिमेत् इति गदाधरः । अर्थे तु हवाकारात् धूमवदवनिताङ्गः" इति दिनकरः ।

तौ(१) स्नातकैर्बन्धुमता च राज्ञा
पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम्।
कन्याकुमारौ कनकासनस्थौ
आर्द्रावतारोपणमन्वभूताम्(२) ॥ २८ ॥

ताविति। कनकासनस्थौ तौ कन्याकुमारौ स्नातकैः गृहस्थविशेषैः। "स्नातकस्त्वाप्लुतव्रतौ" इत्यमरः। बन्धुमता बन्धुपुरःसरेण इत्यर्थः राज्ञा च पुरन्ध्रिभिः पतिपुत्रवतीभिः नारीभिश्च

---

(१) "त्रिविधा हि स्नातकाः। विद्यास्नातको, व्रतस्नातको, विद्याव्रतस्नातकश्चेति। उक्तं च। "गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया, वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा" इति दिनकरः। "गृहमेधी स्नातको भवतीति विज्ञायते"। आश्वलायन।३।८।१

(२) "एष हि लोकाचारः" इति वल्लभः। यदुक्तं आश्वलायनपरिशिष्टे—"तैजसेन पात्रेण क्षीरमानीय घृतमासिच्य अग्नेर्गार्हपतस्योत्तरतः स्थित्वा। अथ तयोरन्तरेणैवं धूवरयोर्वंशनलकमेवत् धारयेयुः। वरः प्रक्षालितपाणिर्वधूः प्रक्षालितेऽञ्जली क्षीरघृतं पात्रिणा द्विरुपलीय द्विरुत्तराञ्जलौ जलमावपति यथा पूर्वेण ततो द्विरपरिष्टादभिधारयति एवं वराञ्जलावञ्जलपुटावपूरं कुर्यात्। दाता तयोरञ्जलीः द्विरुत्तमवदध्यात्। अथ वरः कन्याञ्जली स्वाञ्जलिं धारयेत् दाता कन्यां धारयेत् "दक्षिणाः पात्रु वहधेयधासु पुत्रं वहंतां मातिः पुष्टिपुष्टियासु तिथिकरणमुहूर्तनक्षत्रसम्पदस्तु" इत्युक्त्वा कन्यामृत्विग्यदञ्जल्यञ्जलाम् वरमूर्धारोपयेत् वरोऽपि तन्मूर्धि स्वाञ्जल्यञ्जलामारोपयेत्। एवं द्विः। इदानीं दाता वराय गोभूमिदासीयानशयनसप्तादिकमनुदानं दद्यात्। अथ पुरोधाः क्षौमे पय आसिच्य क्षौद्रसर्प्यांक्तया माक्षया सपवित्रया सदूर्वांपवित्रया अभिघिनुयात्। अथ वधूवरौ सम्मेलनपुरुषं क्षीरघृतेनाज्ञाय परस्परतिलकं कुरुतः कण्ठे वनमालामुरसः कौस्तुभमूरसि करे वधीयाताम्। अथ पुरोधास्तयोरुत्तरीयान्तयोः पल्लवपल्लवानि विवाहव्रतरक्षितं गणाधिपमनुष्मृत्य बध्नीयात्। अथ दाता समस्तां सभाः पुरन्ध्रीः प्रीतिमत्त्वाच्च क्रमादाभिरार्द्रावतारोदकं कुर्यात्"। १। २५।

इति स्वसुर्भोजकुलप्रदीपः
सम्पाद्य पाणिग्रहणं स राजा ।
महीपतीनां पृथगर्हणार्थं
समादिदेशाधिकृतानधिश्रीः ॥ २९ ॥
लिङ्गैर्मुदः संवृतविक्रियास्ते
ह्रदाः प्रसन्ना इव गूढनक्राः ।
वैदर्भमामन्त्र्य ययुस्तदीयां
प्रत्यर्प्य पूजामुपदाक्षणेन ॥ ३० ।

क्रमशः प्रयुक्तं ज्ञातकादीनां पूर्व्वं पूर्व्वं वैशिष्ट्यात् क्रमेण कृतम् आर्द्राधृतानाम् आरोपणम् अन्यभूताम् अनुभूतवन्तौ ॥ २८ ॥

इतीति । अधिश्रीः अधिकसम्पदः भोजकुलप्रदीपः स राजा इति स्वसुः इन्दुमत्याः पाणिग्रहणं विवाहं सम्पाद्य कारयित्वा महीपतीनां राज्ञां पृथक् एकैकस्य अर्हणार्थं पूजार्थम् अधिकृतान् अधिकारिणः समादिदेश आज्ञापयामास ॥ २९ ॥

लिङ्गैरिति । मुदः सम्भोगस्य लिङ्गैः चिह्नैः कपटहासादिभिः संवृतविक्रियाः निगूहितमत्सराः अत एव प्रसन्नाः बहिर्निर्मलाः गूढनक्राः अन्तर्लीनग्राहाः ह्रदा इव स्थिताः ते नृपाः वैदर्भं भोजम् आमन्त्र्य आदृत्य तदीयां वैदर्भीयां पूजाम् उपदाक्षणेन उपायनमिषेण प्रत्यर्प्य ययुः गतवन्तः ॥ ३० ॥

स राजलोकः क्षतपूर्वसंवित्
आरम्भसिद्धौ समयोपलभ्यम् (१) ।
आदास्यमानः प्रमदामिषं तत्
आहृत्य पन्थानमजस्य तस्थौ ॥ २१ ॥
भर्त्तापि तावत् क्रयकौशिकानाम्
अनुष्ठितानन्तरजाविवाहः ।

स इति । आरम्भसिद्धौ कार्य्यसिद्धौ विषये पूर्व्वं क्षता क्षतपूर्व्वा । सुप्सुपेति समासः । क्षतपूर्व्वा संवित् सङ्केतः मार्गावरोधरूपः उपायः येन सः तथोक्तः । "संवित् युद्धे प्रतिज्ञायां सङ्केताचारनामसु" इति केशवः । सः राजलोकः समयोपलभ्यम् अजप्रस्थानकाले लभ्यं तदा तस्यैकाकित्वात् इति भावः । समरोपलभ्यमिति पाठे युद्धसाध्यम् इत्यर्थः । तत् प्रमदा एव आमिषं भोग्यवस्तु । "आमिषं लक्ष्मियां मांसे तथा स्याद्भोग्यवस्तुनि" इति केशवः । आदास्यमानः ग्रहीष्यमाणः सन् अजस्य पन्थानम् आहृत्य अवरुध्य तस्थौ ॥ २१ ॥

भर्त्तेति । अनुष्ठितः सम्पादितः अनन्तरजायाः अनुजायाः विवाहः येन सः तथोक्तः क्रयकौशिकानां देशानां भर्त्ता स्वामी भोजः अपि तावत् तदा सत्त्वानुरूपम् उत्साहानुरूपं यथा तथा वा समर्पणात् । अनेनानियतवस्तुदानम् इत्यर्थः । इदं

(१) "समरेण समरेण उपलभ्यं प्रमदैवामिषं स्यादहार्य्यं बलं भोगवस्तु वा" इति दिनकरः ।

सत्वानुरूपाहरणीकृतश्रीः(१)
प्रास्थापयद्राघवमन्वगाच्च ॥ ३२ ॥
तिस्रस्त्रिलोकीप्रथितेन सार्द्धम्
अजेन मार्गे वसतीरुषित्वा।
तस्मात् अपावर्त्तत कुण्डिनेशः
पर्व्वात्यये(२) सोम इवोष्णरश्मेः ॥ ३३ ॥
प्रमन्यवः प्रागपि कोशलेन्द्रे
प्रत्येकमात्तस्वतया बभूवुः।

कन्यायै देयं धनम्। "यौतुकादि तु यद्देयं स दायो हरणञ्च तत्" इत्यमरः। अहरणं हरणीकृता श्रीः येन तथोक्तः सन् राघवम् अजं प्रास्थापयत् प्रस्थापितवान् स्वयम् अन्वगात् अनुजगाम च ॥ ३२ ॥

तिस्र इति। कुण्डिनं विदर्भनगरं तस्य ईशः भोजः त्रिषु लोकेषु प्रथितेन अजेन सार्द्धं मार्गे पथि तिस्रः वसतीः रात्रीः उषित्वा। "वसती रात्रियेश्मनोः" इत्यमरः। "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया। पर्व्वात्यये दर्शान्ते उष्णरश्मेः सूर्य्यात् सोमः चन्द्रः इव, तस्मात् अजात् अपावर्त्तत तं विसृज्य निवृत्तः इत्यर्थः ॥ ३३ ॥

प्रमन्यव इति। नृपाः राजानः प्राक् अपि प्रत्येकम् आत्त-

(1) Vallabha reads सत्वानुरूपाहरणीकृतश्रीः and explains by "सत्व अरणीकृता अलङ्कारिव कृता श्रीर्येन सः"।

(२) अलङ्कारादौ हि सूर्य्याच्चन्द्रमसौ उत्पत्तिप्रवाहरूपेण परम्परैव संभवतीति भावः।

अतो नृपास्तत्र मिरे समेताः
स्त्रीरत्नलाभं न तदात्मजस्य ॥ २४ ॥
तमुद्वहन्तं पथि भोजकन्यां
रुरोध राजन्यगणः स दृप्तः ।
बलिप्रदिष्टां श्रियमाददानं
वैक्रमं पादमिवेन्द्रशत्रुः (१) ॥ २५ ॥
तस्याः स रत्नार्थमनल्पयोधम्
आदिश्य पित्र्यं सचिवं कुमारः ।

स्वतया दिग्विजये गृहीतधनत्वेन कौशलेन्द्रे रघौ प्रमन्यवः रूढवैराः बभूवुः, अतः हेतोः समेताः सङ्गताः सन्तः तदात्मजस्य रघुसूनोः स्त्रीरत्नलाभं न तत्तमिरे न सेहिरे ॥ २४ ॥

तमिति । दृप्तः उद्धतः सः राजन्यगणः राजसङ्घातः भोजकन्याम् उद्वहन्तं नयन्तं तम् अजं बलिना वैरोचनिना प्रदिष्टां दत्तां श्रियम् आददानं स्वीकुर्वाणं विक्रमस्य इदं वैक्रमं पादम् इन्द्रशत्रुः प्रह्लादः इव पथि रुरोध । तथा च ब्रह्माण्डपुराणे, "वैरोचनविरोधेऽपि प्रह्लादः प्राणदं स्मरन् । विष्णोस्तु, क्रममाणस्य पादाम्भोजं रुरोध ह ।" इति ॥ २५ ॥

तस्या इति । सः कुमारः अजः तस्याः इन्दुमत्याः रत्नार्थम् अनल्पयोधं बहुभटं पितुरागतं पित्र्यं आप्तम् इत्यर्थः

(1) As प्रह्लाद is not known as इन्द्रशत्रु, Vallabha explains इन्द्रशत्रुः ।

प्रत्यग्रहीत् पार्थिववाहिनीं तां
भागीरथीं(१) शोण इवोत्तरङ्गः ॥ ३६ ॥
पत्तिः पदातिं रथिनं रथेशः
तुरङ्गसादी तुरगाधिरूढम् ।
यन्ता गजस्याभ्यपतद्गजस्थं
तुल्यप्रतिद्वन्द्वि बभूव युद्धम् ॥ ३७ ॥

सचिवम् आदिश्य आज्ञाप्य तां पार्थिववाहिनीं राजसेनाम् । "ध्वजिनी वाहिनी सेना" इत्यमरः । भागीरथीम् उत्तरङ्गः शोणः शोणाख्यः नदः इव, प्रत्यग्रहीत् अभियुक्तवान् ॥ ३६ ॥

पत्तिरिति । पत्तिः पादचारः योद्धा पदातिं पादचारम् अभ्यपतत् । पादाभ्याम् अततीति पदातिः । पादस्य पदित्यादिना पदादेशः । "पदातिपत्तिपदगपादातिकपदाजयः" इत्यमरः । रथेशः रथिकः रथिनं रथारोहम् अभ्यपतत्, तुरङ्गसादी अश्वारोहः तुरगाधिरूढम् अश्वारोहम् अभ्यपतत् । "रथिनः स्यन्दनारोहाः अश्वारोहास्तु सादिनः" इत्यमरः । गजस्य यन्ता हस्त्यारोहः गजस्थं पुरुषम् अभ्यपतत्, इत्थम् अनेन प्रकारेण तुल्यप्रतिद्वन्द्वि एकजातीयप्रतिभटं युद्धं बभूव । अन्योन्यं द्वन्द्वं कलहोऽस्तीत्यर्थमिति प्रतिद्वन्द्विनः योधाः । "द्वन्द्वं कलहयुग्मयोः" इत्यमरः ॥ ३७ ॥

---

(2) Both Dinakara and Vallabha read शोणोत्थं in place of Bhagirathi. The Jyotiratha is noticed both in the Vishnupurana and Mahabharata and rises probably in the Vindhya mountains.

नदत्सु तूर्य्येष्वविभाव्यवाचः
नोदीरयन्ति स्म कुलोपदेशान्।
बाणाक्षरैरेव परस्परस्य
नामोर्जितं चापभृतः शशंसुः॥ ३८॥
उत्थापितः संयति रेणुरश्वैः
सान्द्रीकृतः स्यन्दनवंशचक्रैः।
विस्तारितः कुञ्जरकर्णतालैः
नेत्रक्रमेणोपरुरोध सूर्य्यम्॥ ३९॥

नदत्स्विति। तूर्य्येषु नदत्सु सत्सु अविभाव्यवाचः अनवधार्य्यगिरः चापभृतः धानुष्काः कुलमुपदिश्यते प्रख्याप्यते यैः ते कुलोपदेयाः तान् कुलनामानि न उदीरयन्ति स्म न उच्चारयामासुः शीतमशक्यत्वाद्वाचो नाब्रुवन् इत्यर्थः। किन्तु बाणाक्षरैः बाणेषु लिखिताक्षरैः एव परस्परस्य अन्योन्यस्य ऊर्जितं प्रख्यातं नाम शशंसुः ऊचुः॥ ३८॥

उत्थापित इति। संयति संग्रामे अश्वैः उत्थापितः, स्यन्दनवंशानां रथसमूहानां चक्रैः रथाङ्गैः सान्द्रीकृतः घनीकृतः। "वंशः पृष्टास्थि गेहोर्ध्वकाष्ठे वेणौ गणे कुले" इति केशवः। कुञ्जरकर्णानां तालैः ताड़नैः विस्तारितः प्रसारितः रेणुः नेत्रक्रमेण अंशुकपरिपाट्या अंशुकमिव इत्यर्थः। "स्याज्जटांशुकयोर्नेत्रम्" इति, "क्रमोऽङ्घ्रौ परिपाट्यां च" इति च केशवः। सूर्य्यम् उपरुरोध आच्छादयामास॥ ३९॥

मत्स्यध्वजा वायुवशाद्विदीर्णैः
मुखैः प्रवृद्धध्वजिनीरजांसि ।
पिबन्तः परमार्थमत्स्याः
पर्य्याविलानीव नवोदकानि ॥ ४० ॥
रथो रथाङ्गध्वनिना विजज्ञे
विलोलघण्टाक्वणितेन नागः
स्वभर्तृनामग्रहणाद् बभूव
सान्द्रे रजस्यात्मपरावबोधः ॥ ४१ ॥
आवृण्वतो लोचनमार्गमाजौ
रजोऽन्धकारस्य विजृम्भितस्य ।

मत्स्येति । वायुवशात् विदीर्णैः विवृतैः मुखैः प्रवृद्धानि ध्वजिनी-रजांसि सैन्यरेणून् पिबन्तः गृह्णन्तः मत्स्यध्वजाः मत्स्याकाराः ध्वजाः, पर्य्याविलानि परितः कलुषाणि नवोदकानि पिबन्तः परमार्थमत्स्याः इव बभुः भान्ति स्म ॥ ४० ॥

रथ इति । सान्द्रे प्रवृद्धे रजसि रथः रथाङ्गध्वनिना चक्रस्वनेन विजज्ञे ज्ञातः, नागः हस्ती विलोलानां घण्टानां क्वणितेन नादेन विजज्ञे । आत्मपरावबोधः स्वपरविवेकः योधानाम् इति शेषः स्वभर्तॄणां स्वस्वामिनां नामग्रहणात् नामोच्चारणात् बभूव रजोऽन्धतया सर्वं स्वं परञ्च शब्दादेवानुमाय प्रजज्ञुः इत्यर्थः ॥ ४१ ॥

आवृण्वत इति । लोचनमार्गम् आवृण्वतः दृष्टिपथम् उप-

शस्त्रक्षतास्रद्विपवीरजन्मा
वालारुणोभूद्रुधिरप्रवाहः ॥ ४२ ॥
स च्छिन्नमूलः क्षतजेन रेणुः
तस्योपरिष्टात् पवनावधूतः।
अङ्गारशेषस्य हुताशनस्य
पूर्वोत्थितो धूम इवावभासे ॥ ४३ ॥
प्रहारमूर्च्छापगमे रथस्थाः
यन्तॄनुपालभ्य निवर्त्तिताश्वान्(१)।
यैः सादिता लक्षितपूर्वकेतून्
तानेव सामर्षतया निजघ्नुः ॥ ४४ ॥

रुन्धतः आलौ युद्धे विजृम्भितस्य व्यासस्य रजः एव अन्धकारं तस्य, शस्त्रक्षतेभ्यः अद्विपवीरेभ्यः जन्म यस्य स तथोक्तः रुधिरप्रवाहः बालारुणः बालार्कः अभूत्। "अरुणः भास्करेऽपि स्यात्" इत्यमरः। बालविशेषणं रुधिरस्रावस्वल्पार्थम् ॥ ४२ ॥

स इति। क्षतजेन रुधिरेण छिन्नमूलः व्याजितभूतसम्बन्धः इत्यर्थः तस्य क्षतजस्य उपरिष्टात् पवनावधूतः वाताहतः स रेणुः अङ्गारशेषस्य हुताशनस्य अग्नेः पूर्वोत्थितः धूमः, इव, आवभासे दिदीपे ॥ ४३ ॥

प्रहारेति। रथस्थाः रथिनः, प्रहारेण या मूर्च्छा तस्याः अपगमे सति। मूर्च्छितानामन्यत्र नीत्वा संरक्षणं सारथिधर्मः,

(१) "निवर्त्तिताश्वान्" इत्यत्र "निवर्त्तिताश्वाः" इति पाठोऽपि दृश्यते।

अप्यर्द्धमार्गे परवाणलूनाः
धनुर्भृतां हस्तवतां पृषत्काः ।
संप्रापुरेवात्मजवानुवृत्त्या
पूर्वार्द्धभागैः फलिभिः शरव्यम् ॥ ४५ ॥
आधोरणानां गजसन्निपाते
शिरांसि चक्रैर्निशितैः क्षुराग्रैः ।
हृतान्यपि श्येननखाग्रकोटि-
व्यासक्तकेशानि चिरेण पेतुः ॥ ४६ ॥

इति कत्वा निवर्त्तिताञ्छान् यन्तॄन् सारथीन् उपालभ्य असाधु कृतम् इत्यधिक्षिप्य पूर्वं यैः स्वयं सादिताः हताः, लक्षितपूर्वकेतून् पूर्वदृष्टैः केतुभिः प्रत्यभिज्ञातान् इत्यर्थः, तान् एव सामर्थ्यतया सकोपत्वेन हेतुना निजघ्नुः प्रजघ्नुः ॥ ४४ ॥

अपीति । अर्द्धयासौ मार्गश्च तस्मिन् अर्द्धमार्गे परेषां वाणैः लूनाः छिन्नाः अपि हस्तवतां कृतहस्तानां धनुर्भृतां पृषत्काः शराः आत्मजवानुवृत्त्या स्ववेगानुबन्धेन हेतुना फलिभिः लोहाग्रवद्भिः । "शस्त्रवाणाग्रयोः फलम्" इति विश्वः । पूर्वार्द्धभागैः गृणातीति शरुः तस्मै हितं शरव्यं लक्ष्यम् । "उगवादिभ्यो यत्" इति यत्प्रत्ययः । "लक्षं लक्ष्यं शरव्यञ्च" इत्यमरः । संप्रापुः एव न तु मध्ये पतिताः इत्यर्थः ॥ ४५ ॥

आधोरणानामिति । गजसन्निपाते गजयुद्धे निशितैः अत एव क्षुराग्रैः क्षुरस्य अग्रमिव अग्रं येषां तैः चक्रैः आयुधविशेषैः

पूर्वं प्रहर्त्ता न जघान भूयः
प्रतिप्रहाराक्षममश्वसादी।
तुरङ्गमस्कन्धनिषण्णदेहं
प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष ॥ ४७ ॥
तनुत्यजां वर्म्मभृतां विकीर्णैः
हृहत्सु दन्तेष्वसिभिः पतद्भिः।
उद्यन्तमग्निं शमयाम्बभूवुः
गजा विविग्नाः करसीकरेण ॥ ४८ ॥

हृतानि छिन्नानि. अपि श्येनानां पक्षिविशेषाणाम्। "पक्षी श्येनः" इत्यमरः। नखाग्रकोटिषु व्यासक्ताः केशाः येषां तानि आधोरणानां हस्तिसारोहाणाम्। "आधोरणा हस्तिपका हस्तारोहा निषादिनः" इत्यमरः। शिरांसि शिरेण पेतुः पतितानि। शिरःपातात् प्रागेवारुह्य पश्चादुत्पततां पक्षिणां नखेषु केशसङ्गश्चिरपातहेतुः इति भावः ॥ ४६ ॥

पूर्वमिति। पूर्वं प्रथमं प्रहर्त्ता अश्वसादी तौरङ्गिकः प्रतिप्रहारे अक्षमम् अशक्तं तुरङ्गमस्कन्धे निषण्णदेहं मूर्च्छितम् इत्यर्थः रिपुं भूयः न जघान पुनः न प्रजहार किन्तु प्रत्याश्वसन्तं पुनः उज्जीवन्तम् आचकाङ्क्ष। "नायुध्यसनं प्राप्तं नार्त्तं नातिपरिक्षतम्" इति निषेधात् इति भावः ॥ ४७ ॥

तनुत्यजामिति। तनुत्यजां तनुषु निस्त्राणाम् इत्यर्थः वर्म्मभृतां कवचिनां सम्बन्धिभिः बृहत्सु दन्तेषु पतद्भिः अत एव,

शिलीमुखोत्कृत्तशिरःफलाढ्या (१)
च्युतैः शिरस्त्रैश्चषकोत्तरैव(२) ।
रणक्षितिः शोणितमद्यकुल्या
रराज मृत्योरिव पानभूमिः ॥ ४९ ॥

विकोशैः पिधानात् उद्धृतैः । "कोशोऽस्त्री कुड्मले खड्गपिधाने" इत्यमरः । असिभिः खड्गैः उद्यन्तम् उत्थितम् अग्निं विविग्नाः भीताः गजाः करसीकरेण शुण्डादण्डजलकणेन शमयाम्बभूवुः शान्तं चक्रुः ॥ ४८ ॥

शिलीमुखेति । शिलीमुखैः बाणैः उत्कृत्तानि शिरांसि एव फलानि तैः आढ्या सम्पन्ना च्युतैः भ्रष्टैः शिरांसि त्रायन्ते इति शिरस्त्राणि शीर्षत्राणानि । "शीर्षण्यञ्च शिरस्त्रे" इत्यमरः । तैः चषकोत्तरा चषकः पानपात्रम् उत्तरं(१)यस्यां सा इव । चषकोऽस्त्री पानपात्रम्" इत्यमरः । शोणितानि एव मद्यं तस्य कुल्याः प्रवाहाः यस्यां सा । "कुल्याल्पा क्षणिका सरित्" इत्यमरः । रणक्षितिः युद्धभूमिः, मृत्योः पानभूमिः इव, रराज ॥ ४९ ॥

---

(1) Literally *silimukha* means an arrow with a point of stone : perhaps in pre-historic times before the use of iron was known, an arrow thus made was in vogue. Though such weapons were subsequently superseded by arrows having iron points (which were called *ayomukha*) the original appellation (*silimukha*) was retained and came to mean arrows in general.

(२) · चषकं प्रधानं यस्य ।

उपान्तयोर्निष्कुषितं (१) विहङ्गैः
आच्छिद्य तेभ्यः पिशितप्रियापि(२)।
केयूरकोटिक्षततालुदेशा
शिवा भुजच्छेदमपाचकार ॥ ५० ॥
कश्चित् द्विषत्खड्गहृतोत्तमाङ्गः
सद्यो विमानप्रभुतामुपेत्य (३)।

उपान्तयोरिति। उपान्तयोः प्रान्तयोः विहङ्गैः पक्षिभिः निष्कुषितं खण्डितम्। इषनिष्ठायामितीड़ागमः। भुजच्छेदं भुजखण्डं तेभ्यः विहङ्गेभ्यः आच्छिद्य आच्छिद्य पिशितप्रिया मांसप्रिया अपि शिवा क्रोष्ट्री। "शिवः कोलः शिवा क्रोष्ट्री" इति विश्वः। केयूरकोट्या अङ्गदाग्रेण क्षतः तालुदेशः यस्याः सा सती अपाचकार अपसारयामास। किरतेः करोतेर्वा लिट्॥ ५०॥

कश्चिदिति। द्विषतः खड्गेन हृतोत्तमाङ्गः छिन्नशिराः कश्चित् वीरः सद्यः विमानप्रभुतां विमानाधिपत्यं देवत्वम् इत्यर्थः उपेत्य प्राप्य वामाङ्गसंसक्ता सद्योलङ्गसङ्गिनी सुराङ्गना यस्य स

---

(१) "पार्श्वेः पक्षिभिर्निःसारीकृतम्" इति दिनकरः।

(२) "पिशितप्रिया" इत्यत्र कादिताद्यादिति परनिपातः।

(३) "शस्त्रेण निहतोऽन्यं जिघांसन्नी महीक्षितः। युध्यमानः परं शक्त्या स्वर्गं यात्यपराङ्मुखः"। मनु। ७। ८९।

वामाङ्कसंसक्तसुरांङ्गनः स्वं
नृत्यत् कबन्धं समरे ददर्श(१) ॥ ५१ ॥
अन्योन्यसूतोन्मथनाद्भूतां।
तावेव सूतौ रथिनौ च कौचित्।
व्यश्वौ गदाव्यायतसंप्रहारौ
भग्नायुधौ बाहुविमर्दनिष्ठौ(२) ॥ ५२ ॥
परस्परेण क्षतयोः प्रहर्त्रोः
उत्क्रान्तवायोः समकालमेव।

तयोः सन् समरे नृत्यत् स्वं निजं कबन्धं विशिरस्कं कलेवरं ददर्श। "कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरम्" इत्यमरः ॥५१॥

अन्योन्येति। कौचित् वीरौ अन्योन्यस्य सूतयोः सारथ्योः उन्मथनात् निधनात् तौ एव सूतौ रथिनौ च योद्धारौ अभूतां, तौ एव व्यश्वौ नष्टाश्वौ सन्तौ गदाभ्यां व्यायतः दीर्घः संप्रहारः युद्धं ययोः तौ अभूतां, ततः भग्नायुधौ भग्नगदौ सन्तौ बाहु-विमर्दे निष्ठा नाशः ययोः तौ अभूताम्। "निष्ठा निष्पत्तिना-शान्ता" इत्यमरः ॥ ५२ ॥

परस्परेणेति। परस्परेण अन्योन्यं क्षतयोः क्षततन्वोः सम-

(१) "यस्मिन् युद्धे भटानां सहस्रं हन्यते तत्रैको कबन्धो नृत्यतीति आगमः। एतेनात्र महद्युद्धं जातमिति द्योत्यते। पुरुषस्य वामभागे स्त्रीणां स्थितिरिति लक्षणात्" इति दिनकरः।

(२) "अवाप्तिश्लथयुद्धेच्छमुक्तम्" इति वल्लभः। बाहुयुद्धेन युगपत् द्वयोर्निधनस्य अस्वाभाविकत्वात्, बाहुविमर्दे निष्ठा नाश्या ययोः, तौ बाहुयुद्धनिरतौ इति व्याख्यानमेव सुन्दरं प्रतिभाति।

अमर्त्यभावेऽपि कयोश्चिदासीत्
एकाप्सरःप्रार्थितयोर्विवादः (१) ॥ ५३ ॥
व्यूहावुभौ तावितरेतरस्मात्
भङ्गं जयञ्चापतुरव्यवस्थम्।

कालम् एककालं यया तया उत्क्रान्तवायोः युगपदुन्नतप्राणयोः एका एव अप्सराः प्रार्थिता याभ्यां तयोः एकाप्सरःप्रार्थितयोः प्रार्थितैकाप्सरसोः इत्यर्थः। वाहिताग्न्यादिष्विति परनिपातः। अथवा, एकस्याम् अप्सरसि प्रार्थितं प्रार्थना ययोः इति विग्रहः। स्त्रियां बहुष्वप्सरस इति बहुत्वाभिधानं प्रायिकम्। कयोश्चित् प्रहर्त्रोः योधयोः अमर्त्यभावे अपि देवत्वे अपि विवादः कलहः आसीत्। एकाभिलाषो हि महद्वैरबीजम् इति भावः॥५३॥

व्यूहाविति। तौ उभौ व्यूहौ सेनासङ्घातौ। "व्यूहस्तु बल-

(१) "यस्तु रथे तिष्ठते सर्वाभिर्न दिव्यवासुपगतं तमदृष्टीभुमप्सरसः क्षमायाकीः स्यात्। इह तु पुनरत् परमृतामुपगततयोरेकस्यामेवाभिलाषादिति दिव्याङ्गनादौ कामुकत्वं स्वर्गेऽपि दुर्लभमेवेति भावः" इति दिनकरः। In vedic literature the Apsarasas are represented as personifications of physical phenomena, and wives of the Gandharvas, who are also described as the fire of the sun, fire of lightning, rays of the moon and other attributes of the elementary life of heaven. The Apsarasas are likewise personified as the vapours attracted by the sun, sunbeams, planets and constellations. The Ramayana makes them arise from the ocean when it was churned. Manu represents them as one of the creations of the seven Manus, themselves created by the seven Risis, Marichi, Atri &. And in later mythology, they are considered daughters of Kasyapa. See Goldstucker's Sanskrit Dictionary.

पश्चात्पुरोमारुतयोः प्रवृद्धौ
पर्य्यायवृत्त्येव महार्णवोर्म्मी ॥ ५४ ॥
परेण भग्नेऽपि बले महौजाः
ययावजः प्रत्यरिसैन्यमेव ।
धूमो निवर्त्तेत समीरणेन
यतस्तु कक्षस्तत एव वह्निः ॥ ५५ ॥
रथी निषङ्गी कवची धनुष्मान्
दृप्तः(१) स राजन्यकमेकवीरः ।

विन्यासः" इत्यमरः । पश्चात् पुरश्च यौ मारुतौ तयोः पर्य्यायवृत्त्या क्रमवृत्त्या प्रवृद्धौ महार्णवोर्म्मी इव इतरेतरस्मात् अन्योन्यस्मात् अव्यवस्थं व्यवस्थारहितम् अनियतं जयं भङ्गं पराजयं च आपतुः प्राप्तवन्तौ ॥ ५४ ॥

परेणेति । बले स्वसैन्ये परेण परबलेन भग्ने अपि महौजाः महाबलः अजः अरिसैन्यं प्रति एव ययौ । तथाहि, समीरणेन वायुना धूमः निवर्त्तेत कक्षात् अपसार्य्येत । वर्त्तेर्णिजन्तात् कर्म्मणि सम्भावनायां लिङ् । वह्निस्तु यतः यत्र कक्षः तृणम् । "कक्षौ तु तृणवीरुधौ" इत्यमरः । ततः एव तत्रैव प्रवर्त्तते इति शेषः । सार्व्वविभक्तिकस्तसिः ॥ ५५ ॥

रथीति । रथी रथारूढः निषङ्गी तूणीरवान् । "तूणी-

(1) Both Dinakara and Vallabha read दृप्तं for दृप्तः, and "विधीकृतारातिः" for "निवारणारातिः" ।

निवारयामास महावराहः
कल्पक्षयोद्धृत्तमिवार्णवाम्भः(१) ॥ ५६ ॥
स दक्षिणं तूणमुखेन(२) वामं
व्यापारयन् हस्तमलक्षताजौ ।

पार्श्वतूणीरनिषङ्गा इषुधिर्द्वयोः" इत्यमरः। कवची वर्म्मधरः धनुष्मान् धनुर्धरः दृप्तः रणदृप्तः एकवीरः असहायशूरः स अजः राजन्यकं राजसमूहम्। गोत्रोक्षेत्यादिना वुञ्प्रत्ययः। महावराहः वराहावतारो विष्णुः कल्पक्षये कल्पान्तकाले उद्धृत्तम् उद्धृतम् अर्णवाम्भः इव निवारयामास ॥ ५६ ॥

स इति। स अजः आजौ संग्रामे दक्षिणं हस्तं तूणमुखेन

(1) A Kalpa is equivalent to one day of Brahma and comprises the reigns of fourteen Manus or a thousand cycles, a cycle constituting a revolution of the four ages सत्य, त्रेता द्वापर and कलि। The age satya is equal to 4800, Treta to 3600, Dvapara to 2400 and Kali to 1200 years of the Gods (a year of men being equivalent to a day of the Gods). This is a minor Kalpa, a great kalpa being the measure of one hundred such years and forming the duration of the life of Brahma. Both kalpas and mahakalpas are periodical. At the end of the latter not only all the gods and all other forms are annihilated, but the elements are again merged into primary substance, besides which one only spiritual being exists. A minor kalpa affects only the forms of inferior creatures, and lower worlds, leaving the substance of the universe entire, and sages and gods unharmed. See V P. Book I chap III.

(2) Dinakara explains by "दक्षिणं हस्तं तूणस्य मुखे व्यापारयन् शरसन्धानं न कार्यं हस्तं प्रहारयन् इति:" Vallabha concurs with him.

आकर्णकृष्टा सकृदस्य योद्धुः
मौर्वी व वाणान् सुषुवे रिपुघ्नान् ॥ ५७ ॥
स रोषदष्टाधिकलोहितोष्ठैः
व्यक्तोर्ध्वरेखा(१) भ्रुकुटीर्वहद्भिः ।
तस्तार गां भल्लनिकृत्तकण्ठैः
हुङ्कारगर्भैर्द्विषतां शिरोभिः ॥ ५८ ॥
सर्वैर्बलाङ्गैर्द्विरदप्रधानैः
सर्वायुधैः कङ्कटभेदिभिश्च ।

निषङ्गविवरेण वामम् अतिसुन्दरम् । "वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे" इति विश्वः । व्यापारयन् अलक्ष्यत शरसन्धानादयस्तु दुर्लक्ष्याः इत्यर्थः । सकृत् आकर्णकृष्टा योद्धुः अस्य अजस्य मौर्वी ज्या रिपून् हन्तीति रिपुघ्नाः तान् । "अमनुष्यकर्तृके च" इति टक्प्रत्ययः । बाणान् सुषुवे इव, इत्युत्प्रेक्षा ॥५७॥

स इति । स अजः रोषेण दष्टाः अत एव अधिकलोहिताः ओष्ठाः येषां तानि तैः व्यक्ता जर्ध्वा रेखा यासां ताः भ्रुकुटीः भ्रूभङ्गान् वहद्भिः भल्लनिकृत्ताः बाणविशेषच्छिन्नाः कण्ठाः येषां तैः हुङ्कारगर्भैः सहुङ्कारैः हुङ्कुर्वद्भिः इत्यर्थः । द्विषतां शिरोभिः गां भूमिं तस्तार छादयामास ॥ ५८ ॥

सर्वैरिति । द्विरदप्रधानैः गजमुख्यैः सर्वैः बलाङ्गैः सेनाङ्गैः । "हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम्" इत्यमरः ।

(१) "भ्रुकुटीर्रेखा ललाटेन सह भ्रुवोरेखावयं आयत इत्युक्तम्" इति दिनकरः ।

सर्वप्रयत्नेन च भूमिपालाः।
तस्मिन् प्रजङ्घुर्युधि सर्व एव ॥ ५९ ॥
सोऽस्त्रव्रजैश्छन्नरथः परेषां
ध्वजाग्रमात्रेण बभूव लक्ष्यः।
नीहारमग्नो दिनपूर्वभागः
किञ्चित्प्रकाशेन विवस्वतेव ॥ ६० ॥
प्रियंवदात् प्राप्तमसौ कुमारः
प्रायुङ्क्त राजाधिराजसूनुः।

कङ्कटभेदिभिः कवचभेदिभिः। "उरच्छदः कङ्कटकोऽजगरः कवचोऽस्त्रियाम्" इत्यमरः। सर्वायुधैश्च। बाह्यबलमुक्त्वा आन्तरमाह, सर्वप्रयत्नेन च सर्वे एव भूमिपालाः युधि तस्मिन् अजे प्रजङ्घुः तं प्रजङ्घुः इत्यर्थः। सर्वत्र सर्वकारकशक्तिसम्भवात् कर्मणोऽप्यधिकरणविवक्षायां सप्तमी। तदुक्तम्, "अनेकशक्तियुक्तस्य विश्वस्यानेककर्मणः। सर्वदा सर्वथाभावात् क्वचित् किञ्चित् विवक्ष्यते"। इति ॥ ५९ ॥

स इति। परेषां द्विषाम् अस्त्रव्रजैः शस्त्रसमूहैः छन्नरथः स अजः, नीहारैः हिमैः मग्नः दिनपूर्वभागः प्रातःकालः किञ्चित्प्रकाशेन ईषल्लक्ष्येण विवस्वता इव, ध्वजाग्रमात्रेण लक्ष्यः बभूव ध्वजाग्रादन्यत्र किञ्चिल्लक्ष्यते स इत्यर्थः ॥ ६० ॥

प्रियंवदादिति। अधिराजसूनुः महाराजपुत्रः कुसुमाकल्पकान्तः मदनसुन्दरः स्वप्रनिहतसौख्यः स्वप्नविहतः जागरूकः

गान्धर्वमस्त्रं कुसुमास्त्रकान्तः
प्रस्वापनं स्वप्ननिवृत्तलीलाः ॥ ६१ ॥
ततो धनुष्कर्षणमूढहस्तम्
एकांसपर्य्यस्तशिरस्त्रजालम् ।
तस्थौ ध्वजस्तम्भनिषण्णदेहं
निद्राविधेयं नरदेवसैन्यम् ॥ ६२ ॥
ततः प्रियोपात्तरसेऽधरौष्ठे(१)
निवेशदृष्टौ जलजं कुमारः ।

इत्यर्थः असौ कुमारः अजः प्रियंवदात् पूर्व्वोक्तात् गन्धर्व्वात् प्राप्तं गान्धर्वं गन्धर्वदेवताकम् । तस्य देवतेत्यण् । प्रस्वापयतीति प्रस्वापनं निद्राजनकम् अस्त्रं राजसु प्रायुङ्क्त प्रयुक्तवान् ॥ ६१ ॥

तत इति । ततः धनुष्कर्षणे मूढहस्तम् अव्यापृतहस्तम् एकस्मिन् अंसे पर्य्यस्तं न्यस्तं शिरस्त्राणां शीर्षण्यानां जालं समूहः यस्य तत् ध्वजस्तम्भेषु निषण्णाः अवष्टब्धाः देहाः यस्य तत् नरदेवानां राज्ञां सेना एव सैन्यम् । चातुर्व्वर्ण्यादित्वात् स्वार्थे ष्यञ् प्रत्ययः । निद्राविधेयं निद्रापरतन्त्रं तस्थौ ॥ ६२ ॥

तत इति । ततः कुमारः अजः प्रियायाः इन्दुमत्याः उपा-

(१) "अचारलवणाशिनौ ब्रह्मचारिणौ अमलदृष्ट्यवधःशायिनौ स्याताम् । अतः ऊर्द्धं विराव्रं द्वादशरात्रम्" । आश्वलायन । १ । ८ । १०-११ । "अतौ गर्हाप्रवेशनीयदोषादूर्द्धं विराव्रं द्वादशरात्रं वा नियतौ स्याताम् इति नारायणः । उक्तनियमम् "प्रियोपात्तरसेऽधरौष्ठे" इति यत् उक्तं तत् चिन्त्यं । यदा सचषया उपात्तमस्त्रस्य सहपाठस्यौचित्यं, अतस्या लोचनीयः ।

तेन स्वहस्तार्जितमेकवीरः
पिबन् यशो मूर्त्तमिवावभासे ॥ ६३ ॥
अङ्घ्रिस्खलनाभिघ्नतया निहत्ताः
तं सन्नयन्तं ददृशुः स्वयोधाः।
निमीलितानामिव पङ्कजानां
मध्ये स्फुरन्तं प्रतिमागशाङ्कम् ॥ ६४ ॥
सयोधितैस्तैर्न शिलीमुखाद्यैः
निर्व्वापिताः केतुषु पार्थिवानाम्।

सरसे आस्वादितमाधुर्य्ये अतिस्नाघ्ये इति भावः अधरोष्ठे जलजं अङ्घ्रिं निवेश्य। "जलजं अङ्घ्रपद्मयोः" इति विश्वः। दध्मौ मुखमारुतेन पूरयामास, तेनौष्ठनिविष्टेन अङ्घ्रिन एकवीरः स स्वहस्तार्जितं मूर्त्तं मूर्त्तिमत् यशः पिबन् इव आवभासे यशसः शुभ्रत्वात् इति भावः ॥ ६३ ॥

अङ्घ्रिति। अङ्घ्रस्खलनस्य अजमङ्घ्रघ्नेः अभिघ्नतया प्रत्यभिघातत्वात् निहत्ताः प्राक् पलाय्य संप्रति प्रत्यागताः स्वयोधाः सन्नयन्तं निद्राणयन्तं तम् अजं, निमीलितानां मुकुलितानां पङ्कजानां मध्ये स्फुरन्तं प्रतिमा चासौ गशाङ्कश्च तं प्रतिमागशाङ्कं प्रतिबिम्बचन्द्रम् इव, ददृशुः ॥ ६४ ॥

सयोधितैरिति। संप्रति राघवेण रघुपुत्रेण। पूर्वं रघुणा इति भावः। हे राजानः वः युष्माकं यशः धृतं जीवितं तु कृपया न धृतं न त्वयत्या इति भावः इत्येवंरूपा वर्णाः एतदर्थप्रति-

यशो हृतं संप्रति राघवेण
न जीवितं वः क्षपयेति वर्णाः ॥ ६५ ॥
स चापकोटीनिहितैकबाहुः
शिरस्त्रनिष्कर्षणभिन्नमौलिः ।
ललाटबद्धश्रमवारिबिन्दुः
भीतां प्रियामेत्य वचो बभाषे ॥ ६६ ॥
इतः परानर्भकहार्य्यशस्त्रान्
वैदर्भि पश्यानुमता मयासि(१) ।

पादकं वाक्यम् इत्यर्थः सशोणितैः शोणितदिग्धैः शिलीमुखाग्रैः बाणाग्रैः साधनैः तेन अजेन प्रयोजककर्त्रा पार्थिवानां राज्ञां केतुषु ध्वजस्तम्भेषु निक्षेपिताः प्रयोज्यैरन्यैर्निवेशिताः लेखिताः इत्यर्थः । क्षिपतेर्ण्यन्तात् कर्म्मणि क्तः ॥ ६५ ॥

स इति । चापकोट्यां निहितः एकबाहुः येन स शिरस्त्रस्य निष्कर्षणेन अपनयनेन भिन्नमौलिः स्रस्तकेशबन्धः । "चूड़ा किरीटं केशाश्च संयता मौलयस्त्रयः" इत्यमरः । ललाटे बद्धाः श्रमवारिबिन्दवः यस्य सः स अजः भीतां प्रियाम् इन्दुमतीम् एत्य आसाद्य वचः बभाषे ॥ ६६ ॥

किमित्याह, इत इति । हे वैदर्भि इन्दुमति इतः इदानीम् अर्भकहार्य्यशस्त्रान् बालकापहार्य्यायुधान् परान् शत्रून् पश्य

(१) "परान् शत्रून् पश्य । परशब्दात् कथं पश्यामीत्यस्य लाभः । मया अनुमता अनुज्ञातासि अतस्त्वया पश्यामीत्यर्थः" इति दिनकरः ।

एवंविधेनाहवचेष्टितेन
त्वं प्रार्थ्यसे हस्तगता ममैभिः ॥ ६७ ॥
तस्याः प्रतिद्वन्द्विभवाद्विषादात्
सद्यो विमुक्तं मुखमावभासे ।
निश्वासबाष्पापगमात् प्रपन्नः
प्रसादमात्मीयमिवात्मदर्शः ॥ ६८ ॥
दृष्टापि सा क्ष्मीविजिता न साक्षात्
वाग्भिः सखीनां प्रियमभ्यनन्दत् ।
स्थली नवाम्भःपृषताभिवृष्टा
मयूरकेकाभिरिवाभ्रवृन्दम् ॥ ६९ ॥

मया अनुमता असि द्रष्टुम् इति शेषः। एभिः नृपैः एवंविधेन निद्रारूपेण आहवचेष्टितेन रणकर्मणा मम हस्तगता हस्तगतवत् दुर्ग्रहा इत्यर्थः त्वं प्रार्थ्यसे अपजिहीर्ष्यसे इत्यर्थः। एवंविधेनेत्यत्र स्वहस्तनिर्देशेन सोपहासमुवाचेति द्रष्टव्यम् ॥ ६७ ॥

तस्या इति। प्रतिद्वन्द्विभवात् रिपुत्वात् विषादात् दैन्यात् सद्यः विमुक्तं तस्या मुखं, निश्वासस्य यः बाष्पः उष्मा। "बाष्पो नेत्रजलोष्मणोः" इति विश्वः। तस्य अपगमात् हेतोः आत्मीयं प्रसादं नैर्मल्यं प्रपन्नः प्राप्तः आत्मा स्वरूपं दृश्यते अनेनेति आत्मदर्शः दर्पणः इव, आबभासे ॥ ६८ ॥

दृष्टेति। सा इन्दुमती दृष्टा अपि पत्युः पौरुषेण प्रमुदिता

इति शिरसि स वामं पादमाधाय(१) राज्ञाम्
उदवहदनवद्यां तामवद्यादपेतः।
रथतुरगरजोभिस्तस्य रूक्षालकाया
समरविजयलक्ष्मीः सैव मूर्त्ता बभूव ॥ ७० ॥

अपि क्रिया विजिता यतः अतः प्रियम् अजं साक्षात् स्वयं न अभ्यनन्दत् न प्रशशंस, किन्तु नवैः अभ्रःभृषतैः पयोविन्दुभिः अभिहृष्टा अभिषिक्ता स्थली अकृत्रिमा भूमिः। जानपदकुण्ड-गोणस्थलेत्यादिना अकृत्रिमार्थे ङीप्। अभ्रहृष्टं मेघसङ्गं मयूरकेकाभिः इव, सखीनां वाग्भिः अभ्यनन्दत् ॥ ६८ ॥

इतीति। न उद्यते न उच्यते इति अवद्यं गर्ह्यम्। अवद्य-पण्येत्यादिना निपातः। "कुपूयकुत्सितावद्यखेटगर्ह्याघिकाः समाः" इत्यमरः। तस्मात् अपेतः निर्दोषः इत्यर्थः स अजः इति राज्ञां शिरसि वामं पादम् आधाय अनवद्याम् अदोषां ताम् इन्दुमतीम् उदवहत् उपानयत् आत्मसात्कार इत्यर्थः। अयमर्थस्तमुद्वहन्तं पथि भोजकन्यामित्यत्र न श्लिष्टः। तस्य अजस्य रथतुरगाणां रजोभिः रूक्षाणि परुषाणि अलकाग्राणि

---

(१) राज्ञां शिरसि वामपादमाधाय तान् निर्जित्य तत्तु वस्तुतः वामपादार्पणं हृत तस्य अनौचित्यादिति भावः। "ननु विवाहस्य पूर्वमेव जातत्वात् कथमिदानीमुदवहदिति प्रयोगः। उच्यते। प्रबलतरवैरिनिवहविजयात् इदानीमेव इन्दुमती-लाभादिदानीमभूत्। यदि तान् अजून् न अजेष्यत तर्हि तैरिन्दुमत्यपहारे कृते विवाहो-ऽहत एव स्यादिति भावः"। इति दिनकरः।

प्रथमपरिगतार्थस्तं रघुः सन्निवृत्तं
विजयिनमभिनन्द्य श्राध्यजायासमेतम्।
तदुपहितकुटुम्बः शान्तिमार्गोत्सुकोऽभूत्
न हि सति कुलधुर्ये सूर्यवंश्या गृहाय ॥७१॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
अजपाणिग्रहणो नाम सप्तमः सर्गः।

यस्याः सा, सा इन्दुमती एव मूर्त्ता मूर्त्तिमती समरविजयलक्ष्मीः बभूव। एतज्ञाभादन्यः को विजयलक्ष्मीलाभः इत्यर्थः ॥ ७० ॥

प्रथमेति। प्रथमम् अजागमनात् प्राक् एव परिगतः ज्ञातः अर्थः विवाहविजयरूपः येन स प्रथमपरिगतार्थः रघुः विजयिनं विजययुक्तं श्राध्यजायासमेतं सन्निवृत्तं प्रत्यागतं तम् अजम् अभिनन्द्य तस्मिन् अजे उपहितकुटुम्बः सन् "सुतविन्यस्तपत्नीकः" इति याज्ञवल्क्यस्मरणात् इति भावः। शान्तिमार्गे मोक्षमार्गे उत्सुकः अभूत्, तथाहि कुलधुर्ये कुलधुरन्धरे सति सूर्यवंश्याः गृहाय गृहस्थाश्रमाय न भवन्ति ॥ ७१ ॥

इति श्रीमहामहोपाध्यायश्रीलक्ष्मणसूरि-विरचितायां रघुवंशमहाकाव्यस्य सञ्जीवनीसमाख्यायां सप्तमः सर्गः।

अष्टमः सर्गः ।

अथ तस्य विवाहकौतुकं
ललितं बिभ्रत एव(१) पार्थिवः ।
वसुधामपि हस्तगामिनीम्
अकरोदिन्दुमतीमिवापराम्(२) ॥ १ ॥

हिरण्मयलम्बेऽहं यस्मिन् पातालकेलिषु ।
दन्तेनोद्धरति क्षौणीं विश्राम्यन्ति फणीश्वराः ॥

अथेति । अथ पार्थिवः रघुः ललितं सुभग विवाहकौतुकं विवाहमङ्गल विवाहहस्तसूत्रं वा बिभ्रतः एव। "कौतुकं मङ्गले हर्षे हस्तसूत्रे,कुतूहले" इति भाष्वत.। तस्य अजस्य अपराम् इन्दुमतीम् इव वसुधाम् अपि हस्तगामिनीम् अकरोत् अस्मिन् सर्गे वैतालीय छन्दः ॥ १ ॥

---

(१) "यत ऊर्ध्वं त्रिरात्र वादशरात्र । संवत्सरम् वैक ऋषिर्जायत इति"। इति आश्वलायन वधूवरौ गृहप्रवेशानन्तर त्रिरात्र वादशरात्र वदाचित् संवत्सर वा, ब्रह्मचर्यमनुतिष्ठतो इत्यनुव धारयेतामिति अर्थादायाति।

(2) The purport of the stanza is, that the ceremony of installation was performed before the post-nuptial vow of celebracy, adopted by Aja according to the prescribed usage, was over, i e within 3 or 12 days after he had reached home See the 65rm—stanza of canto VI

दुरितैरपि(१) कर्तुमात्मसात्
प्रयतन्ते नृपसूनवो हि यत्।
तदुपस्थितमग्रहीदजः
पितुराज्ञेति न भोगतृष्णया ॥ २ ॥
अनुभूय वसिष्ठसम्भृतैः
सलिलैस्तेन सहाभिषेचनम्।
विगदोच्छ्वसितेन(२) मेदिनी
कथयामास कृतार्थतामिव ॥ ३ ॥

दुरितैरिति। नृपसूनवः राजपुत्राः यत् राज्यं दुरितैः अपि विषप्रयोगादिनिषिद्धोपायैः अपि आत्मसात् स्वाधीनम्। "तदधीनवचने" इति सातिप्रत्ययः। कर्तुं प्रयतन्ते हि प्रवर्त्तन्ते एव इत्यर्थः। हिशब्दोऽवधारणे। "हि हेताववधारणे" इत्यमरः। उपस्थितं सतः प्राप्तं तत् राज्यम् अजः 'पितुराज्ञेति हेतोः अग्रहीत् स्वीचकार भोगतृष्णया तु न अग्रहीत् ॥ २ ॥

अनुभूयेति। मेदिनी भूमिः महिषी च ध्वन्यते, वसिष्ठेन सम्भृतैः सलिलैः तेन अजेन सह अभिषेचनम् अनुभूय विगदो-

(1) The history of Hindu kings presents very few instances of their having been violently or unfairly deposed. The poet may have probably had in view the case of विक्रमादित्य, who is said, according to one version of the tradition, to have deposed his brother भर्तृहरि and usurped the crown of Ujjayini.

(१) विगतं निर्गतं दुरितं दुष्कृतं यस्मिन् तत् राज्यं तेन।

स बभूव दुरासदः परैः
गुरुणाथर्ववविदा कृतक्रियः(१) ।
पवनाग्निसमागमो ह्ययं
सहितं ब्रह्म यदस्त्रतेजसा ॥ ४ ॥

च्छ्वसितेन स्फुटमुद्धर्षेण आनन्दनिर्भरोच्छ्वसितेन चेति ध्वन्यते, कृतार्थतां गुणवद्गर्हलाभकृतं साफल्यं कथयामास इव। न चैतावता पूर्वेषामपकर्षः प्रशंसापरत्वात् "सर्वं च जयमन्विच्छेत् पुत्रादिच्छेत् पराजयम्" इत्यङ्गीकृतत्वाच्च ॥ ३ ॥

स इति। अथर्ववविदा अथर्ववेदाभिज्ञेन गुरुणा वशिष्ठेन कृतक्रियः अथर्वोक्तविधिना कृताभिषेकसंस्कारः इत्यर्थः स अजः परैः शत्रुभिः दुरासदः दुर्धर्षः बभूव। तथाहि, अस्त्रतेजसा शस्त्रतेजसा सहितं युक्तं यत् ब्रह्म ब्रह्मतेजः अयं पवनाग्निसमागमः हि तत्कल्पः इत्यर्थः। पवनाग्नीत्यत्र पूर्वनिपातप्राप्तस्यानित्यत्वात् इन्द्रे घीति नाग्निशब्दस्य पूर्वनिपातः। तथाच काशिकायाम्, "अयमेकस्तु लक्षणहेत्वोरिति निर्देशः पूर्वनिपातव्यभिचारचिह्नम्" इति। क्षात्रेणैवायं दुर्धर्षः किमयं पुनर्वशिष्ठमन्त्रप्रभावे सति इत्यर्थः। अत्र मनुः, "नाक्षत्रं ब्रह्म भवति क्षत्रं नाब्रह्म वर्धते। ब्रह्मक्षत्रे तु संयुक्ते इहामुत्र च वर्धते"। इति ॥ ४ ॥

---

(१) "स यदग्नौ यौ सपत्नौ यत्र विपक्षयाति न. देवास्त्रं वर्म पूर्वम्" इत्यादिभिराथर्वणकल्पे कृता विधादिना क्रिया याग्निकपौष्टिककार्ये यस्य स तथोक्तः ।
See Canto I 59. and 60.

रघुमेव निवृत्तयौवनं
तममन्यन्त नवेश्वरं प्रजाः।
स हि तस्य न केवलां श्रियं
प्रतिपेदे सकलान् गुणानपि ॥ ५ ॥
अधिकं शुशुभे शुभंयुना
हितयेन हृयमेव सङ्गतम्।
पदमृद्धमजेन पैतृकं
विनयेनाप्य(१) नवञ्च यौवनम् ॥ ६ ॥

रघुमिति। प्रजाः नवेश्वरं तम् अजम् निवृत्तयौवनं प्रत्यावृत्तयौवनं रघुम् एव अमन्यन्त न किञ्चिद्वैदकमस्ति इत्यर्थः। कुतः हि यस्मात् स अजः तस्य रघोः केवलाम् एकां श्रियं न प्रतिपेदे किन्तु सकलान् गुणान् शौर्यदाक्षिण्यादीन् अपि प्रतिपेदे अतस्तद्गुणयोगात् तद्वदिर्युक्ता इत्यर्थः ॥ ५ ॥

अधिकमिति। हृयम् एव शुभंयुना शुभवता। "शुभंयुस्तु शुभान्वितः" इत्यमरः। "अहंशुभयोर्युस्" इति युस्प्रत्ययः। हितयेन सङ्गतं युतं सत् अधिकं शुशुभे। किं केनेत्याह, पदमिति। पैतृकं पितुरागतम्। "ऋतष्ठञ्" इति ठञ् प्रत्ययः। ऋद्धं समृद्धं पदं राज्यम् अजेन, अस्य अजस्य नवं यौवनं विनयेन च ॥ ६ ॥

(१) "विनयेन चास्येव नवं यौवनं बभौ। यौवने विनयस्तु दुर्लभः। स्वयं तु प्राप्तैश्वर्यः यौवनेऽपि विनयवानासीदिति दिनकरः। यदुक्तं—"विनीतात्मापि नृपतिर्न विनश्यति कर्हिचित्" इति। मनु। ७। ४८।

सदयं बुभुजे महाभुजः
सहसोद्वेगमियं व्रजेदिति ।
अचिरोपनतां स मेदिनीं(१)
नवपाणिग्रहणां वधूमिव ॥ ७ ॥
अहमेव मतो महीपतेः
इति सर्वः प्रकृतिष्वचिन्तयत् ।
उदधेरिव निम्नगाश्रितै-
स्तवभवन्नास्य विमानना क्वचित् ॥ ८ ॥

सदयमिति । महाभुजः स अजः अचिरोपनतां नवीपगतां मेदिनीं भुवं नवं पाणिग्रहणं विवाहः यस्याः ताम् नवोढां वधूं इव, सहसा बलात्कारेण चेत् । "सहोबलं सहामार्गः" इत्यमरः । इयं मेदिनी वधूः वा उद्वेगं भयं व्रजेत् इति हेतोः सदयं सकृपं बुभुजे भुक्तवान् । भुजोऽनवने इत्यात्मनेपदम् ॥ ७ ॥

अहमिति । प्रकृतिषु प्रजासु मध्ये सर्वः जनः, अथवा प्रकृतिष्वहमित्यनेनान्वयः व्यवधानन्तु सह्यम् । सर्वः जनः प्रकृतिषु अहमेव महीपतेः मतः महीपतिना मन्यमानः । मतिबुद्धिपूजार्थेभ्यश्चेति वर्त्तमाने क्तः, क्तस्य च वर्त्तमाने इति षष्ठी । इति अचिन्तयत् अमन्यत । उदधेः निम्नगाश्रितैः इव, अस्य नृपस्य कर्तुः । कर्तृकर्म्मणोः कृतीति कर्त्तरि षष्ठी । क्वचित्

(१) नवसंख्यं राज्यं साहचर्यं वितत्य प्रयाति इति भावः ।

न खरो न च भूयसा मृदुः
पवमानः पृथिवीरुहानिव।
स पुरस्कृतमध्यमक्रमः
नमयामास नृपाननुद्धरन् ॥ ९ ॥
अथ वीक्ष्य रघुः प्रतिष्ठितं
प्रकृतिष्वात्मजमात्मवत्तया।
विषयेषु विनाशधर्म्मसु
विदिवस्थेष्वपि निस्पृहोऽभवत् ॥ १० ॥

अपि जने विषये विमानना अवगणना तिरस्कारः न अभवत् यतो न कश्चिदवमन्यते अतः सर्व्वोऽहमेवास्य मत इत्यमन्यत इत्यर्थः ॥ ८ ॥

न खर इति। स नृपः भूयसा बाहुल्येन खरः तीक्ष्णः न, भूयसा मृदुः अतिमृदुः अपि न, किन्तु पुरस्कृतमध्यमक्रमः सन् मध्यमपरिपाटीमवलम्ब्य इत्यर्थः, पवमानः वायुः पृथिवीरुहान् तरून् इव नृपान् अनुद्धरन् अनुत्पाटयन् एव नमयामास। अत्र कामन्दकः, "मृदुर्हि दयमन्येत तीक्ष्णादुद्विजते जनः। तीक्ष्णश्चैव मृदुश्चैव प्रजानां स च सम्मतः"। इति ॥ ९ ॥

अथेति। अथ रघुः आत्मजं पुत्रम् आत्मवत्तया निर्विकारमनस्कतया इत्यर्थः। "उदयादिष्वविकृतिर्मनसः सत्त्वमुच्यते। आत्मवान् सत्त्ववानुक्तः" इत्युत्पलमालायाम्। प्रकृतिषु अमात्या-

गुणवत्सुतरोपितश्रियः
परिणामे हि दिलीपवंशजाः ।
पदवीं तरुवल्कवाससां
प्रयताः संयमिनां प्रपेदिरे ॥ ११ ॥
तमरण्यसमाश्रयोन्मुखं
शिरसा वेष्टनशोभिना सुतः ।
पितरं प्रणिपत्य पादयोः
अपरित्यागमयाचतात्मनः ॥ १२ ॥

दिषु(१) प्रतिष्ठितं रूढ़मूलं वीक्ष्य ज्ञात्वा विनाशः धर्म्मः येषां तेषु विनाशधर्म्मसु अनित्येषु इत्यर्थः । धर्म्मादनिच् केवलादित्यनिच्प्रत्ययः समासान्तः । विदिवस्थेषु स्वर्गस्थेषु अपि विषयेषु शब्दादिषु निस्पृहः निर्गतेच्छः अभवत् ॥ १० ॥

कुलधर्म्म एवायमेवेत्याह, गुणवदिति । दिलीपवंशजाः परिणामे वार्द्धके गुणवत्सुतेषु रोपितश्रियः स्थापितलक्ष्मीकाः प्रयताश्च सन्तः तरुवल्कानि एव वासांसि येषां तेषां संयमिनां यतीनां पदवीं प्रपेदिरे यस्मात् तस्मादस्यापीदमुचितम् इत्यर्थः ॥ ११ ॥

तमिति । अरण्यसमाश्रयोन्मुखं वनवासोद्युक्तं पितरं तं रघुं सुतः अजः वेष्टनशोभिना उष्णीषमनोहरेण शिरसा पादयोः प्रणिपत्य आत्मनः अपरित्यागम् अयाचत मां परित्यज्य न गन्तव्यमिति प्रार्थितवान् इत्यर्थः ॥ १२ ॥

(१) "वयसि प्रथमे दत्त्वा भागं पञ्च चापरे"। See Manu. Book. VII. 165—167.

रघुरग्रमुखस्य तस्य तत्
क्रतवानीप्सितमात्मजप्रियः।
न तु सर्प इव त्वचं पुनः
प्रतिपेदे व्यपवर्जितां श्रियम् ॥ १३ ॥
स किलाश्रममन्त्यमाश्रितः
निवसन्नावसथे पुराद्बहिः।
समुपास्यत पुत्रभोग्यया
स्नुषयेवाविकृतेन्द्रियः श्रिया ॥ १४ ॥

रघुरिति। आत्मजप्रियः पुत्रवत्सलः रघुः अग्र्यं मुखे यस्य तस्य अग्रमुखस्य अजस्य तत् अपरित्यागरूपम् ईप्सितम् अभिलषितं क्रतवान्, किन्तु सर्पः त्वचम् इव, व्यपवर्जितां त्यक्तां श्रियं पुनः न प्रतिपेदे न प्राप ॥ १३ ॥

स इति। स रघुः किल अन्त्यम् आन्त्यं प्रव्रज्याम् आश्रितः पुरात् नगरात् बहिः आवसथे स्थाने निवसन् अविकृतेन्द्रियः जितेन्द्रियः सन् इत्यर्थः, अत एव स्नुषया इव वधूवा इव, पुत्रभोग्यया न स्वभोग्यया श्रिया समुपास्यत शुश्रूषितः। जितेन्द्रियस्य तस्य स्नुषयेव श्रियापि पुष्पफलोदकाहरणादिशुश्रूषाव्यतिरेकेण न किञ्चिदपेक्षितमासीत् इत्यर्थः। अत्र यद्यपि "ब्राह्मणाः प्रव्रजन्ति" इति श्रुतेः "आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात्" इति मनुस्मरणात् "मुच्यन्तामयं धर्मो यद्विषीर्लिङ्ग-

प्रशमस्थितपूर्वपार्थिवं
कुलमभ्युदतनूतनेश्वरम् ।
नभसा निभृतेन्दुना तुलाम्
उदितार्केण समारुरोह तत् ॥ १५ ॥

धारणम् । बाहुजातोरुजातानामयं धर्मो न विद्यते" । इति निषेधाच्च ब्राह्मणस्यैव प्रव्रज्या न क्षत्रियादेरित्याहुः तथापि "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इत्यादिश्रुतेस्त्रैवर्णिकसाधारण्यात् "त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमाः" इति सूत्रकारवचनात् "ब्राह्मणः क्षत्रियो वापि वैश्यो वा प्रव्रजेद् गृहात्" इति स्मरणात् "मुखजानामयं धर्मो वैष्णवं लिङ्गधारणम् । बाहुजातोरुजातानां त्रिदण्डं न विधीयते" । इति निषेधस्य त्रिदण्डविषयत्वदर्शनाच्च क्वचिद् ब्राह्मणपदस्योपलक्षणमाचक्षाणाः केचित् त्रैवर्णिकाधिकारं प्रपेदिरे । तथा सति "म क्लिश्यममन्त्र्यमाश्रितः" इति अत्रापि कविनाप्ययमेव पक्षो विवक्षित इति प्रतीमः । अन्यथा वानप्रस्थाश्रमतया व्याख्याते "विदधे विधिमस्य नैष्ठिकं यतिभिः सार्द्धमनग्निमग्निचित्" इति यज्ञमाधिनानग्निसंस्कारेण विरोधः स्यात् अग्निसंस्काररहितस्य वानप्रस्थत्वेनाभावात् इत्यलं प्रासङ्गिकेन ॥ १४ ॥

प्रशमेति । प्रशमे स्थितः पूर्वपार्थिवः रघुः यस्य तत् अभ्युदितः अभ्युदियः नूतनेश्वरः अजः यस्य तत् तत् प्रसिद्धं कुलं निभृतेन्दुना अस्तमयासक्तचन्द्रेण उदितार्केण प्रकटितसूर्येण

यतिपार्थिवलिङ्गधारिणौ
दृढ्यातै रघुराघवौ जनैः।
अपवर्गमहोदयार्थयोः
भुवमंशाविव धर्म्मयोर्गतौ ॥ १६ ॥
अजिताधिगमाय मन्त्रिभिः
युयुजे नीतिविशारदैरजः।
अनपायिपदोपलब्धये
रघुराप्तैः समियाय योगिभिः ॥ १७ ॥

नभसा तुलां साहश्यम् आरुरोह प्राप। न च नभसा तुलामित्यत्र तृतीयार्थैरित्यादिना प्रतिषेधस्मृतीयायाः तस्य सहश्यवाचितुलायब्दविषयत्वात् लक्ष्मणस्य तुला नास्तीति प्रयोगात् अस्य च साहश्यवाचित्वात् ॥ १५ ॥

यतीति। यतिः भिक्षुः पार्थिवः राजा तयोः लिङ्गधारिणौ रघुराघवौ रघुतनुजौ अपवर्गमहोदयार्थयोः मोक्षाभ्युदयफलयोः धर्म्मयोः निवर्त्तकप्रवर्त्तकरूपयोः भुवं गतौ भूलोकम् अवतीर्णौ अंशौ इव जनैः दृढ्यातै दृष्टौ ॥ १६ ॥

अजितेति। अजः अजिताधिगमाय अजितपदलाभाय नीतिविशारदैः नीतिज्ञैः मन्त्रिभिः युयुजे सङ्गतः, रघुः अपि अनपायिपदस्य उपलब्धये मोक्षस्य प्राप्तये यथार्थदर्शिनः यथार्थवादिनश्च आप्ताः तैः योगिभिः समियाय सङ्गतः। उभयत्राप्युपायचिन्तार्थम् इति शेषः ॥ १७ ॥

नृपतिः प्रकृतीरवेक्षितुं
व्यवहारासनमाददे युवा।
परिचेतुमुपांशु धारणां
कुशपूतं प्रवयास्तु विष्टरम् ॥ १८ ॥
अनयत् प्रभुशक्तिसम्पदा
वशमेको नृपतीननन्तरान्।
अपरः प्रणिधानयोग्यया
मरुतः पञ्च शरीरगोचरान् ॥ १९ ॥

नृपतिरिति। युवा नृपतिः अजः प्रकृतीः प्रजाः कार्य्यार्थिनीः अवेक्षितुं दुष्टादुष्टपरिज्ञानार्थम् इत्यर्थः व्यवहारासनं धर्मासनम् आददे स्वीचकार। प्रवयाः स्थविरः नृपतिः रघुस्तु। "प्रवयाः स्थविरो वृद्धः" इत्यमरः। धारणां चित्तस्यैकाग्र्यतां परिचेतुम् अभ्यसितुम् उपांशु विजने। "उपांशु विजने प्रोक्तम्" इति हलायुधः। कुशैः पूतं विष्टरम् आददे। "यमादियुक्ते मनसः स्थितिरात्मनि। धारणा प्रोच्यते सद्भिर्योगशास्त्रविशारदैः" ॥ इति यमिष्ठः ॥ १८ ॥

अनयदिति। एकः अन्यतरः अजः इत्यर्थः अनन्तरान् स्वमुख्यनन्तरान् नृपतीन् यातव्यपार्ष्णिग्राहादीन् प्रभुशक्तिसम्पदा कोशदण्डसङ्ग्रहेण मार्गं न्यायसताम् अनयत्। अपरः रघुः प्रणिधानयोग्यया समाधभ्यासेन। "योग्याभ्यासार्कयोग्यौ" इति विश्वः। शरीरगोचरान् देहाश्रयान् पञ्च मरुतः प्राणादीन् वशम् अनयत् ॥ १९ ॥

अकरोदचिरेश्वरः क्षितौ
द्विषदारम्भफलानि भस्मसात्।
इतरो(१) दहने स्वकर्मणां
वहते ज्ञानमयेन वह्निना ॥ २० ॥
पणवन्धमुखान् गुणानजः
पड्भाव्युद्गत समीक्ष्य तत्फलम्।
रघुरप्यजयद् गुणत्रयं(२)
प्रकृतिस्थं समलोष्टकाञ्चनः ॥ २१ ॥

अकरोदिति। अचिरेश्वरः अजः क्षितौ द्विषताम् आरम्भाः कर्माणि तेषां फलानि भस्मसात् अकरोत् कात्स्न्र्येन भस्मीकृतवान्। "विभाषा साति: कात्स्न्र्ये" इति सातिप्रत्ययः। इतरः रघुः ज्ञानमयेन तत्त्वज्ञानप्रचुरेण वह्निना करणेन स्वकर्मणां भववीजभूतानां दहने भस्मीकरणे वहते स्वकर्माणि दग्धुं प्रवृत्तः इत्यर्थः। "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन" इति गीतायां वचनात् ॥ २० ॥

पणवन्धेति। "पणवन्धः सन्धिः" इति कौटिल्यः। अजः

---

(१) अपरः इति पाठान्तरम्।

(२) यथा "प्रकृतौ महदहंकारभूतेन्द्रियरूपे प्रकृतिस्थं गुणत्रयं सत्त्वरजस्तमोरूपं स्वकृतं वैराग्येण तत्र स्वयमकरोदित्यर्थः। एतदेव प्रतिपादितं कालिदासेनाग्रिमश्लोकात्। तथाहि "वैराग्यात् प्रकृतिलयः संसारी भवति राजसाद्रागात्। ऐश्वर्यादविपर्ययात्तिर्यग्योनिः" ॥ See the remarks of मल्लिनाथ on this stanza.

नं नवः प्रभुराफलोदयात्
स्थिरकर्मा विरराम कर्मणः ।
न च योगविधेर्नवेतरः (१)
स्थिरधीरापरमात्मदर्शनात् ॥ २२ ॥

षण्णवन्यसुखान् सन्ध्यादीन् षड्गुणान् "सन्धिर्नो विग्रहो यानमासनं द्वैधमाश्रयः । षड्गुणाः" इत्यमरः । तत्फलं तेषां गुणानां फलं समीक्ष्य आलोच्य उपायुङ्क्त फलियन्तमेव गुणं प्रायुङ्क्त इत्यर्थः । "प्रोपाभ्यां युजेरयन्नपात्रेषु" इत्यात्मनेपदम् । समः तुल्यतया भावितः लोष्टः मृत्पिण्डः काञ्चनं सुवर्णञ्च यस्य सः समलोष्टकाञ्चनः निस्पृह इत्यर्थः । रघुः अपि गुणत्रयं सत्वादिकम् । "गुणाः सत्वं रजस्तमः" इत्यमरः । प्रकृतौ साम्यावस्थायामेव तिष्ठतीति प्रकृतिस्थं पुनर्विकारमुख्यं यथा तथा अजयत् ॥ २१ ॥

नेति । स्थिरकर्मा आफलोदयकर्मकारी नवः प्रभुः अजः आफलोदयात् फलसिद्धिपर्यन्तं कर्मणः आरम्भात् न विरराम

इति शवुषु चेन्द्रियेषु च
प्रतिषिद्धप्रसरेषु जाग्रती।
प्रसितावुदयापवर्गयोः
उभयीं सिद्धिमुभावबापतुः ॥ २३ ॥
अथ काश्चिदजव्यपेक्षया
गमयित्वा समदर्शनः समाः।
तमसः परमापदव्ययं
पुरुषं योगसमाधिना रघुः ॥ २४ ॥

इतीति। इति एवं प्रतिषिद्धः प्रसरः स्वार्थप्रवृत्तिः येषां तेषु शवुषु च इन्द्रियेषु च जाग्रती अप्रमत्तौ उदयापवर्गयोः अभ्युदयमोक्षयोः प्रसितौ आसक्तौ। "तत्परे प्रसितासक्तौ" इत्यमरः। उभौ अजरघू उभयीं द्विविधाम् अभ्युदयमोक्षरूपाम्। उभादुदात्तो नित्यमिति तयप्प्रत्ययस्यायजादेशः, "टिड्ढे" ङीप्। सिद्धिं फलम् अवापतुः उभौ उभे सिद्धी यथासंख्यम् अवापतुः इत्यर्थः ॥ २३ ॥

अथेति। अथ रघुः समदर्शनः सर्वभूतेषु समदृष्टिः सन् अजव्यपेक्षया अजाकाङ्क्षानुरोधेन कांचित् समाः कतिचित् वर्षाणि। "समा वर्षं नमं तुल्यम्" इति विश्वः। गमयित्वा नीत्वा योगसमाधिना ऐक्यानुसन्धानेन। "संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः" इति वसिष्ठः। अव्ययम् अवि-

न नवः प्रभुरापफलोदयात्
स्थिरकर्मा विरराम कर्मणः ।
न च योगविधेर्नवेतरः (१)
स्थिरधीरापरमात्मदर्शनात् ॥ २२ ॥

षण्णवभ्रमुखान् सन्ध्यादीन् षड्गुणान् "सन्धिर्ना विग्रहो यान-मासनं द्वैधमाश्रयः । षड्गुणाः" इत्यमरः । तत्फलं तेषां गुणानां फलं समीक्ष्य आलोच्य उपायुङ्क्त फलिष्यन्तमेव गुणं प्रायुङ्क्त इत्यर्थः । "प्रोपाभ्यां युजेरयज्ञपात्रेषु" इत्यात्मनेपदम् । समः तुल्यतया भावितः लोष्टः मृत्पिण्डः काञ्चनं सुवर्णञ्च यस्य सः समलोष्टकाञ्चनः निस्पृहः इत्यर्थः । रघुः अपि गुणत्रयं सत्वादिकम् । "गुणाः सत्वं रजस्तमः" इत्यमरः । प्रकृतौ साम्यावस्थायामेव तिष्ठतीति प्रकृतिस्थं पुनर्विकारगून्यं यथा तथा अजवत् ॥ २१ ॥

नेति । स्थिरकर्मा आफलोदयकर्मकारी नवः प्रभुः अजः आफलोदयात् फलमिद्धिपर्य्यन्तं कर्मणः आरम्भात् न विरराम न निवृत्तः । "जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्" इत्यपादानत्वात् पञ्चमी, "घ्याङ्परिभ्यो रमः" इति परस्मैपदम् । स्थिरधीः नवेतरः रघुश्च आपरमात्मदर्शनात् परमात्मसाक्षात्कारपर्य्यन्तं योगविधेः ऐक्यानुसन्धानात् न विरराम ॥ २२ ॥

इति शबुषु चेन्द्रियेषु च
प्रतिषिद्धप्रसरेषु जाग्रती।
प्रसितावुदयापवर्गयोः
उभयीं सिद्धिमुभावबापतुः ॥ २३ ॥
अथ काश्चिदजव्यपेक्षया
गमयित्वा समदर्शनः समाः।
तमसः परमापदव्ययं
पुरुषं योगसमाधिना रघुः ॥ २४ ॥

इतीति। इति एवं प्रतिषिद्धः प्रसरः स्वार्थप्रवृत्तिः येषां तेषु शबुषु च इन्द्रियेषु च जाग्रती अप्रमत्तौ उदयापवर्गयोः अभ्युदयमोक्षयोः प्रसितौ आसक्तौ। "तत्परे प्रसितासक्तौ" इत्यमरः। उभौ अजरवू उभयीं द्विविधाम् अभ्युदयमोक्षरूपाम्। उभादुदात्तो नित्यमिति तयप्प्रत्ययस्यायजादेशः, "टिड्ढे" ङीप्। सिद्धिं फलम् अवापतुः उभौ उभे सिद्धी यथासंख्यम् अवापतुः इत्यर्थः ॥ २३ ॥

अथेति। अथ रघुः समदर्शनः सर्वभूतेषु समदृष्टिः सन् अजव्यपेक्षया अजाकाङ्क्षानुरोधेन कांचित् समाः कतिचित् वर्षाणि। "समा वर्षं समं तुल्यम्" इति विश्वः। गमयित्वा नीत्वा योगसमाधिना ऐक्यानुसन्धानेन। "संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः" इति वसिष्ठः। अव्ययम् अवि-

श्रुतदेहविसर्ज्जनः पितुः
चिरमश्रूणि विमुच्य राघवः ।
विदधे विधिमस्य नैष्ठिकं
यतिभिः सार्द्धमनग्निमग्निचित् ॥ २५ ॥
अकरोत् स तदौर्द्ध्वदैहिकं
पितृभक्त्या पितृकार्य्यकल्पवित् ।
न हि तेन पथा तनुत्यजः
तनयावर्ज्जितपिण्डकाङ्क्षिणः ॥ २६ ॥

नाग्निनं तमसः परम् अविद्यायाः परं मायातीतम् इत्यर्थः पुरुषं परमात्मानम् आपत् प्राप सायुज्यं प्राप्तः इत्यर्थः ॥ २४ ॥

श्रुतेति । अग्निचित् अग्निं चितवान् । अग्नौ चेरिति क्विप्प्रत्ययः । राघवः अजः पितुः श्रुतदेहविसर्ज्जनः आकर्णित-पितृतनुत्यागः सन् चिरम् अश्रूणि वाष्पान् विमुच्य विसृज्य अस्य पितुः अनग्निम् अग्निसंस्काररहितम् इत्यर्थः । नैष्ठिकं निष्ठायाम् अन्ते भवं विधिम् आचारम् अन्त्येष्टिं यतिभिः संन्यासिभिः सार्द्धं विदधे चक्रे । अनग्निं विधिमित्यत्र गौनकः, "सर्व्वसङ्गनिवृत्तस्य ध्यानयोगरतस्य च । न तस्य दहनं कार्य्यं नैव पिण्डोदकक्रिया । निदध्यात् प्रणवेनैव विल्वे भिक्षोः कलेवरम् । मोचणं खननञ्चैव सर्व्वं तेनैव कारयेत्" ॥ इति ॥ २५ ॥

अकरोदिति । पितृकार्य्यस्य श्राद्धस्य कल्पवित् विधानज्ञः स अजः पितृभक्त्या पितरि प्रेम्णा करणेन, न पितुः परलोक-

स परार्द्धगतेरशोच्यतां
पितुरुद्दिश्य सदर्थवेदिभिः।
शमिताधिरधिज्यकार्मुकः
क्षतवानप्रतिशासनं जगत् ॥ २७ ॥
क्षितिरिन्दुमती च भामिनी
पतिमासाद्य तमग्र्यपौरुषम्।

सुखापेक्षया, मुक्तत्वात् इति भावः। तस्य रवेः और्द्धदैहिकं देहादूर्द्धं भवतीति तत्, तिलोदकपिण्डदानादिकम् अकारीत्। ऊर्द्धं देहाच्चेति वक्तव्यात् ठक्प्रत्ययः। अनुगतिकादित्वादुभयपदवृद्धिः। ननु कथं भक्तिरेव स्वाद्यादिफलप्रेप्सापि कस्मान्नाभूदित्याशङ्क्याह, नहीति। तेन पथा योगरूपेण मार्गेण तनुत्यजः शरीरत्यागिनः पुरुषाः तनयेन आवर्ज्जितं दत्तं पिण्डं काङ्क्षन्तीति तथोक्ताः न हि भवन्ति ॥ २६ ॥

स इति। परार्द्धगतेः प्रशस्तगतेः प्राप्तमोक्षस्य पितुः अशोच्यताम् अशोचनीयत्वम् उद्दिश्य अभिसन्धाय शोको न कर्त्तव्य इत्युपदिश्य इत्यर्थः सदर्थवेदिभिः परमार्थज्ञैः शमिताधिः निवारितमनोव्यथः। "पुंस्याधिर्मानसी व्यथा" इत्यमरः। स अजः अधिज्यकार्मुकः अधिज्यम् आरोपितमौर्वीकं कार्मुकं यस्य स तथोक्तः सन् जगत् कर्मभूतम् अप्रतिशासनं द्वितीयाज्ञारहितम् आत्माज्ञाविधेयम् इत्यर्थः क्षतवान् चकार ॥ २७ ॥

क्षितिरिति। क्षितिः मही भामिनी कामिनी इन्दुमती च

प्रथमा बहुरत्नसूरभूत्
अपरा वीरमजीजनत् सुतम् ॥ २८ ॥
दशरश्मिशतोपमद्युतिं
यशसा दिक्षु दशस्वपि श्रुतम् ।
दशपूर्वरथं यमाख्यया
दशकण्ठारिगुरुं विदुर्बुधाः ॥ २९ ॥
ऋषिदेवगणस्वधाभुजां (१)
श्रुतयागप्रसवैः स पार्थिवः ।

"भामिनी कामिनी च" इति हलायुधः । अग्र्यपौरुषं महापराक्रमम् उत्कृष्टभोगशक्तिञ्च तम् अजं पतिम् आसाद्य तत्र प्रथमा क्षितिः बहूनि रत्नानि श्रेष्ठवस्तूनि सूते इति बहुरत्नसूः अभूत्। "रत्नं स्वजातिश्रेष्ठेऽपि" इत्यमरः । अपरा इन्दुमती वीरं सुतम् अजीजनत् जनयति स्म । जायतेर्णौ लुङि रूपम् ॥ २८ ॥

किंनामकोऽसावत आह, दशेति । दश रश्मिशतानि यस्य स दशरश्मिशतः सूर्यः स उपमा यस्याः सा दशरश्मिशतोपमा द्युतिः यस्य तं यशसा करणेन दशसु अपि दिक्षु श्रुतं प्रसिद्धं दशकण्ठारेः रावणारेः रामस्य गुरुं पितरं यं सुतम् आख्यया नाम्ना दशपूर्वः दशशब्दपूर्वः रथः रथशब्दः तं दशरथम् इत्यर्थः बुधाः विद्वांसः विदुः वदन्ति । विदोलटोवेति झेर्जुसादेशः ॥ २९ ॥

ऋषीति । श्रुतयागप्रसवैः अध्ययनयज्ञसन्तानैः यथासंख्यम्

(१) "स्वधापूर्वं यत् दत्तं श्राद्धादि तत् भुञ्जन्तीति स्वधाभुजाम्" इति दिनकरः ।

अनृणत्वमुपेयिवान् वभौ
परिधेर्मुक्त इवोष्णदीधितिः ॥ २० ॥
बलमार्त्तभयोपशान्तये
विदुषां सत्कृतये(१) बहु श्रुतम् ।

ऋषीणां देवसंज्ञानाम् इन्द्रादीनां स्वधाभुजां पितॄणाम् अनृणत्वम् ऋणविमुक्तत्वम् उपेयिवान् प्राप्तवान् । "एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वा" इति श्रुतेः । स पार्थिवः अजः, परिधेः परिवेषात् । "परिवेषस्तु परिधिः" इत्यमरः । मुक्तः उष्णदीधितिः सूर्यः इव, वभौ इत्युपमा ॥ २० ॥

बलमिति । तस्य विभोः अजस्य केवलं वसु धनम् एव

There are three incorporeal (अमूर्त्त) Pitris वैराजाः, अग्निष्वात्ताः and बर्हिषदाः, and four corporeal orders सोमपाः, आज्यपाः सोमपाः and सुकालिनाः । The Vairajas called also Somasadas are sons of Viraja and fathers of Mens and the Sadhyas ; Agnisvattas, sons of Marichi and fathers of the Gods; Barhisadas sons of Atri and fathers of the demons ; Somapas, sons of Bhrigu and fathers of the Brahmans; Angirasas, sons of Angiras and Pitris of the Kshetriyas; Ajyapas, sons of Kardama and Pitris of the Vaisayas ; and Sukalins, sons of Vasistha and Pitris of the Sudras. Generally speaking, they may be called a race of divine beings inhabiting celestial regions of their own, and receiving into their society the spirits of those mortals, for whom the rite of fellowship in obsequial cakes with them (the sapindakarana) has been duly performed, The Pitris collectively, therefore, include a man's ancestors ; but the principal members of this order of beings are of a different origin". See Wilson's V. Purana, Book III. Chap XIV.

(१) बहुमते इति क्वचित्पाठः ।

वसु तस्य विभोर्न केवलं
गुणवत्तापि परप्रयोजना ॥ ३१ ॥
स कदाचिदवेक्षितप्रजः
सह देव्या विजहार सुप्रजाः ।
नगरोपवने शचीसखः
मरुतां पालयितेव नन्दने ॥ ३२ ॥

परप्रयोजनं परोपकारकं न अभूत् किन्तु गुणवत्ता अपि गुणित्वम् अपि परप्रयोजना परेषाम् अन्येषां प्रयोजनं यस्यां सा विधेयांशत्वेन प्राधान्याद्गुणवत्तायां विशेषणम्, वसु इत्यत्र तृह-नीयम् । तथाहि, बलं पौरुषम् आर्त्तानाम् आपन्नानां भयस्य उपशान्तये न तु स्वार्थं परपीड़नाय वा । बहु भूरि श्रुतं विद्या विदुषां सत्कृतये सत्काराय न तूत्सेकाय बभूव ॥ ३१ ॥

स इति । अवेक्षितप्रजः अकृतोभयत्वेनानुसंहितप्रजः । नित्यमसिच् प्रजामेधयोरिति असिच्प्रत्ययः । न केवलं क्लेशः इति भावः । शोभना प्रजा यस्य असौ सुप्रजाः सुपुत्रवान् पुत्र-व्यसभार इति भावः (१) । स अजः कदाचित् देव्या महिष्या इन्दुमत्या सह नगरोपवने, नन्दने नन्दनाख्ये अमरावत्युपकण्ठ-वने शचीसखः शच्या सह इत्यर्थः मरुतां देवानां पालयिता इन्द्रः इव, विजहार विक्रीड़ ॥ ३२ ॥

(१) तदाभीक्ष्ण्यंलक्षणे दशरथे कथं व्यसभारी भवेदिति "पुत्रव्यसभारः" इति पाठोऽशुद्धः एव ।

अथ रोधसि दक्षिणोदधेः
स्थितगोकर्णनिकेतमीश्वरम्(१)।
उपवीणयितुं ययौ रवेः
उदयाद्वर्त्तिपथेन(२) नारदः॥ २३॥

अथेति। अथ दक्षिणस्य उदधेः समुद्रस्य रोधसि तीरे स्थितगोकर्णनिकेतनम् अधिष्ठितगोकर्णाख्यस्थानम् ईश्वरं शिवम् उपवीणयितुं वीणया उपगातुम्। सत्यापपाशेत्यादिना वीणाशब्दादुपगानार्थे णिच्प्रत्ययः, ततस्तुमुन्। नारदः देवर्षिः(३) रवेः सम्बन्धिना उदयाद्वर्त्तिपथेन आकाशमार्गेण ययौ॥ २३॥

---

(1) Gokarna means those, whose eyes are the same with their ears, *i. e.* serpents or Nagas. Should we understand by it Nagpur, not that Nagpur, which is situated in central India, but another on the Coromandel coast not yet identified? It is probably identical with Nagpura, the capital of the Pandya Kingdom. See Stanza 59, Canto VI.

(२) उदयच आवृत्तिर्भवश्च तयोः पन्थाः। यद्वा उदयः उदयाचले आविर्भावः आवृत्तिः भ्रमित्वा पुनस्तत्र प्रत्यागमनं तयोः पन्थाः। Sankara reads उदयावृत्तिपथेन and explains "by the path of the son's return from the north, *i. e.* from north to south, and in the sky, not along the ground."

(३) ऋषीणान्तु चैविध्यं; यदुक्तं—"प्रेया ब्रह्मर्षयः पूर्वं तेभ्यो देवर्षयः पुनः। राजर्षयः पुनस्तेभ्यः सप्तविप्रकृतयस्त्रयः। तेभ्यः सप्तविप्रकृतयः मुनिभिः संस्तुतव्रतैः। कश्यपेषु वसिष्ठेषु तथा भगवदिरोगिरिषु। पक्षमेतेषु आदत्ते गोत्रेषु ब्रह्मवादिनः। यस्मादृषिभ्यो ब्रह्मार्षं तेन ब्रह्मर्षयः स्मृताः। धर्म्मस्याथ पुलस्तस्य क्रतोश्च पुलहस्य च। प्रभूयन्त प्रजास्तस्य कश्यपस्य तथा पुनः। देवर्षयः स्मृतास्तेषां मानसास्तनयोद्भवाः। देवर्षी धर्म्मपुत्रौ तु नरनारायणावुभौ। मानसिष्वा: क्रतोः पुत्राः वर्हिषः पुलहस्य तु। कर्दमस्यैव पौलस्त्यः प्रभूयस्तावतः स्मृतः। धर्म्मतो नारदश्चैव कश्यपस्यात्मजावुभौ। ऋषयन्ति देवान् यस्मात्ते स्मृताऽऽर्षयः स्मृताः। मानवे चैत्रवे वंशे ऐक्ष्वाके वंश एव तु। ऐक्ष्वे ऐलाश्च

कुसुमैर्ग्रथितामपार्थिवैः
स्रजमातोद्यशिरोनिवेशिताम् ।
अहरत् किल तस्य वेगवान्
अधिवासस्य हृयेव(१) मारुतः ॥ २४ ॥
भ्रमरैः कुसुमानुसारिभिः ।
परिकीर्णा परिवादिनी मुनेः ।

कुसुमैरिति । अपार्थिवैः दिव्यैः इत्यर्थः । कुसुमैः ग्रथितां रचितां तस्य नारदस्य आतोद्यस्य वाद्यस्य वीणायाः शिरसि निवेशिताम् । "चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम्" इत्यमरः । स्रजं मालां वेगवान् मारुतः अधिवासे वासनायां स्पृहया इव स्रजा स्वाङ्गं संस्कर्त्तुम् इत्यर्थः । "संस्कारो गन्धमाल्याद्यैर्यः स्यात् तदधिवासनम्" इत्यमरः । अहरत् किल, किलेत्यैतिह्ये ॥ २४ ॥

भ्रमरैरिति । कुसुमानुसारिभिः पुष्पानुयायिभिः भ्रमरैः परिकीर्णा व्याप्ता मुनेः नारदस्य परिवादिनी वीणा । "वीणा तु वल्लकी । विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी"

र्भेया राजर्षयस्तु ते । ऋषिभि रक्षणात् यस्मात् प्रजा राजर्षयस्ततः । ब्रह्मलोकप्रतिष्ठास्तु भृगवो ब्रह्मर्षयोऽमलाः । देवलोकप्रतिष्ठाये भेया देवर्षयः शुभाः । इन्द्रलोकप्रतिष्ठास्तु ये वै राजर्षयो मताः" । इति वायुपुराणे ।

(१) "अधिवासो गन्धपुष्पादिकृतः संस्कारः तदाख्यया इव । अनया स्रजा अङ्गमपि संस्कर्तुं भ्रमरोद्यमेन" इति । "यद्यपि वासोद्यमदमनुर्विशे वाचे वर्त्तते, तथाप्यत्र भ्रमरत्वात् वीणायामेव" इति दिनकरः ।

दृष्टे पवनावलेपजं (१)
सृजती वाष्पमिवाञ्जनाविलम् ॥ २५ ॥
अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिशयेन वीरुधाम्।
नृपतेरमरस्रगाप सा
दयितोरुस्तनकोटिसुस्थितिम् ॥ २६ ॥
क्षणमात्रसखीं सुजातयोः
स्तनयोस्तामवलोक्य विह्वला।

इत्यमरः। पवनस्य अवलेपः अधिक्षेपः तज्जम् अञ्जनेन आविलं कलुषं वाष्पम् अश्रु सृजती मुञ्चती इव दृष्टे दृष्टा। परिभूताः स्त्रियोऽपि हि रुदन्ति इति भावः ॥ २५ ॥

अभिभूयेति। सा अमरस्रक् दिव्यमाला मधुगन्धयोः मकरन्दसौरभयोः अतिशयेन आधिक्येन वीरुधां लतानाम्। "लता प्रतानिनी वीरुत्" इत्यमरः। ऋतोः प्राप्ताम् आर्त्तवीम् ऋतुसम्बन्धिनीं विभूतिं सम्पदम् अभिभूय नृपतेः दयितायाः इन्दुमत्याः उर्व्वीः विशालयोः स्तनयोः कोटी चूचुकौ तयोः सुस्थितिं स्थानम् आप ॥ २६ ॥

क्षणमिति। सुजातयोः सुजघनोः सुन्दरयोः इत्यर्थः स्तनयोः क्षणमात्रसखीं तां स्रजम् अवलोक्य विह्वला परवशा

(१) "मानपराभवजम्" इति पाठभेदः।

निमिमील नरोत्तमप्रिया
हृतचन्द्रा तमसेव कौमुदी ॥ ३७ ॥
वपुषा करणोज्झितेन सा
निपतन्ती पतिमप्यपातयत् ।
ननु तैलनिषेकविन्दुना(१)
सह दीपार्चिरुपैति मेदिनीम् ॥ ३८ ॥

नरोत्तमप्रिया इन्दुमती, तमसा राहुणा । "तमस्तु राहुः स्वर्भानुः" इत्यमरः । हृतचन्द्रा कौमुदी इव, निमिमील ममार । "निमीली दीर्घनिद्रा च" इति हलायुधः ॥ ३७ ॥

वपुषेति । करणैः इन्द्रियैः उज्झितेन(२) । "करणं साधकतमं चेष्टागतेन्द्रियेष्वपि" इत्यमरः । वपुषा निपतन्ती सा इन्दुमती पतिम् अजम् अपि अपातयत् पातयतिस्म । तथाहि, निषिच्यते निषेकः तैलस्य निषेकः तैलनिषेकः चारतैलम् इत्यर्थः । तस्य विन्दुना सह दीपार्चिः दीपज्वाला मेदिनीं भुवम् उपैति ननु उपैत्येव । नन्वेवावधारणे । "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यमरः ॥ ३८ ॥

---

(१) यदा खलु ज्वलनी वर्तिस्नेहाधारात् भूमौ पतति, तदा तस्यां दीयमानं तैलमपि तामनुवर्तत एवेत्यर्थः ।

(२) The Bombay Edition reads "करणं इन्द्रियोपलक्षितं चैतन्यं तेनोज्झितेन" ।

उभयोरपि पार्श्ववर्त्तिनां
तुमुलेनार्त्तरवेण वेजिताः।
विहगाः कमलाकरालयाः
समदुःखा इव तत्र चुक्रुशुः ॥ ३९ ॥
नृपतेर्व्यजनादिभिस्तमः
नुनुदे सा तु तथैव संस्थिता।
प्रतिकारविधानमायुषः
सति शेषे हि फलाय कल्पते ॥ ४० ॥

उभयोरिति। उभयोः द्वन्द्वयोः पार्श्ववर्त्तिनां परिजनानां तुमुलेन सङ्कुलेन आर्त्तरवेण करुणस्वनेन वेजिताः भीताः कमलाकरालयाः सरःस्थिताः विहगाः हंसादयः अपि तत्र उपवने समदुःखाः इव चुक्रुशुः ॥ ३९ ॥

नृपतेरिति। नृपतेः अजस्य तमः अज्ञानं व्यजनादिभिः साधनैः नुनुदे अपसारितं सा तु इन्दुमती तथैव संस्थिता मता। तथाहि, प्रतिकारविधानं चिकित्सा आयुषः जीवितकालस्य शेषे सति विद्यमाने। "आयुर्जीवितकालो ना" इत्यमरः। फलाय कल्पते आरोग्याय भवति नान्यथा। नृपतेरायुःशेष-सद्भावात् प्रतीकारस्य साफल्यं तस्यास्तु तदभावात् वैफल्यम् इत्यर्थः ॥ ४० ॥

प्रतियोजयितव्यवल्लकी-
समवस्थामथ(१) सत्वविप्लवात् ।
स निनाय नितान्तवत्सलः
परिगृह्योचितमङ्कमङ्गनाम् ॥ ४१ ॥
पतिरङ्गनिषक्तया तया
करणानामयविभिन्नवर्णया ।
समलक्ष्यत विभ्रदाविलां
मृगलेखामुपसीव चन्द्रमाः ॥ ४२ ॥
विललाप स वाष्पगद्गदं
सहजामप्यपहाय धीरताम् ।

प्रतीति। अथ सत्वस्य चैतन्यस्य विप्लवात् विनाशात् हेतोः। "द्रव्यासुव्यवसायेषु सत्वम्" इत्यमरः। प्रतियोजयितव्या तन्त्रिभिः योजनीया या सु योषिततन्त्री इत्यर्थः या वल्लकी वीणा तस्याः समावस्था अवस्था दशा यस्याः ताम् अङ्गनां वनितां नितान्तवत्सलः अतिप्रेमवान् स अजः परिगृह्य हस्ताभ्यां गृहीत्वा उचितं परिचितम् अङ्कम् उत्सङ्गं निनाय नीतवान् ॥ ४१ ॥

पतिरिति। पतिः अजः अङ्गनिषक्तया करणानाम् अपाङ्गेन अपाङ्गभागेन विभिन्नवर्णया विच्छायया तया, उपसि आविलां मृगलेखां बिभ्रत् चन्द्रमाः इव, समलक्ष्यत इत्युपमा ॥ ४२ ॥

विललापेति। स अजः सहजां स्वाभाविकीम् अपि धीरतां

(१) वाद्यविद्यासम्बन्धेन अवस्थाम इति।

अभितप्तमयोऽपि मार्दवं
भजते कैव कथा शरीरिषु ॥ ४३ ॥
कुसुमान्यपि गात्रसङ्गमात्
प्रभवन्त्यायुरपोहितुं यदि ।
न भविष्यति हन्त साधनं
किमिवान्यत् प्रहरिष्यतो विधेः ॥ ४४ ॥
अथवा मृदु वस्तु हिंसितुं
मृदुनैवारभते प्रजान्तकः ।

धैर्यम् अपहाय वाष्पेण गद्गदं विशीर्णाक्षरं यथा तथा विलिलाप परिदेवितवान् । "विलापः परिदेवनम्" इत्यमरः । अभितप्तम् अग्निना सन्तप्तम् अयः अपि मार्दवं मृदुत्वं भजते, शरीरिषु देहिषु अभिसन्तप्तेषु इति शेषः विषये का एव कथा वार्त्ता अनुक्तसिद्धम् इत्यर्थः ॥ ४३ ॥

कुसुमानीति । कुसुमानि पुष्पाणि अपि । अपिशब्दो नितान्तमार्दवद्योतनार्थः । गात्रसङ्गमात् देहसंसर्गात् आयुः अपोहितुम् अपहर्तुं प्रभवन्ति यदि । हन्त विषादे । "हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः" इत्यमरः । प्रहरिष्यतः विधेः अन्यत् कुसुमातिरिक्तं किम् इव वस्तु । इवशब्दो वाक्यालङ्कारे द्रष्टव्यम् इत्यर्थः । साधनं न भविष्यति सर्वमपि साधनं भविष्यत्येव इत्यर्थः ॥ ४४ ॥

अथवेति । अथवा पक्षान्तरे प्रजान्तकः कालः मृदु कोमलं

हिमसेकविपत्तिरत्र मे
नलिनी पूर्वनिदर्शनं मता ॥ ४५ ॥
स्वगियं यदि जीवितापहा
हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद्भवेत्
अमृतं वा विषमीश्वरेच्छया ॥ ४६ ॥
अथवा मम भाग्यविप्लवात्
अशनिः कल्पित एष वेधसा ।
यदनेन तरुर्न पातितः
क्षपिता तद्विटपाश्रया लता ॥ ४७ ॥

यस्तु मृदुना एव यत्नेन हिंसितुं हन्तुम् आरभते उपक्रमते । अत्रार्थे हिममेकेन तुषारनिष्यन्देन विपत्तिः यस्याः सा नलिनी मे पूर्वं प्रथमं निदर्शनम् उदाहरणं मता ॥ ४५ ॥

स्वगिति । इयं स्वक् जीवितम् अपहन्तीति जीवितापहा यदि । हृदये वक्षसि । "हृदयं वक्षसि स्वान्ते" इत्यमरः । निहिता सती मां किं न हन्ति । ईश्वरेच्छया क्वचित् प्रदेशे विषम् अपि अमृतं भवेत्, क्वचित् अमृतं वा विषं भवेत् । दैवमेवात्र कारणम् इत्यर्थः ॥ ४६ ॥

अथवेति । अथवा मम भाग्यस्य विप्लवात् विपर्ययात् एषः अशनिः इत्यर्थः । विधेयप्राधान्यात् पुंलिङ्गनिर्देशः । वेधसा विधात्रा

कृतवत्यसि नावधीरणाम्
अपराद्धेऽपि यदा चिरं मयि ।
कथमेकपदे निरागसं
जनमाभाष्यमिमं न मन्यसे ॥ ४८ ॥
ध्रुवमस्मि शठः शुचिस्मिते
विदितः कैतववत्सलस्तव ।
परलोकमसन्निवृत्तये
यदनापृच्छ्य गतासि मामितः(१) ॥ ४९ ॥

अशनिः वैद्युतोऽग्निः कल्पितः । "दम्भोलिरशनिर्द्वयोः" इत्यमरः । यत् यस्मात् अनेन अपि अशनिना प्रसिद्धाशनिना इव तरुः तरुस्थानीयः स्वयम् एव न पातितः किन्तु तस्य तरोः विटपाश्रिता लता चपिता नाशिता ॥ ४७ ॥

कृतेति । मयि चिरं भूरिशः अपराद्धे अपि अपराधं कृतवति अपि । राधेः कर्त्तरि क्तः । यदा यस्मात् हेतोः । यदेति हेत्वर्थः, "स्वरादौ पठ्यते यदेति हेतौ" इति गणव्याख्यानात् । अवधीरणाम् अवज्ञां न कृतवती असि । तत् कथम् एकपदे तत्क्षणे । "स्यात् तत्क्षणे एकपदम्" इति विश्वः । निरागसं नितरामनपराधम् इमं जनम् । इममिति स्वाङ्गनिर्देशः । माम् इत्यर्थः आभाष्यं सम्भाष्यं न मन्यसे ॥ ४८ ॥

ध्रुवमिति । हे शुचिस्मिते शठः गूढविप्रियकारी कैतवेन

(1) This stanza is omitted in the Bombay Edition.

दयितां यदि तावदन्वगात्
विनिवृत्तं किमिदं तया विना ।
सहतां हतजीवितं मम
प्रवलामात्मकृतेन वेदनाम् ॥ ५० ॥
सुरतश्रमसम्भृतो मुखे
म्रियते खेदलवोऽपि ते ।

कपटेन वत्सलः कैतववत्सलः इति ध्रुवं निश्चितं तव विदितः त्वया विज्ञातः अस्मि । मतिबुद्धीत्यादिना कर्त्तरि क्तः, क्तस्य च वर्त्तमाने इति कर्त्तरि षष्ठी । कुतः यस्मात् माम् अनापृच्छ्य अनामन्त्र्य इतः अस्मात् लोकात् परलोकम् असन्निवृत्तये अपुनरावृत्तये गंता असि ॥ ४८ ॥

दयितामिति । इदं मम हतजीवितं तावत् दयिताम् अन्वगात् अन्वगच्छत् यदि अन्वगात् एव । यद्यत्रावधारणे । पूर्वं मूर्च्छितत्वात् इति भावः । तया विना किं किमर्थं विनिवृत्तं प्रत्यागतं प्रत्यागमनं न युक्तम् इत्यर्थः । अत एव आत्मकृतेन स्वदुश्चेष्टितेन निवृत्तिरूपेण प्रवलां वेदनां सहताम् । स्वयङ्कृतापराधेषु सहिष्णुतैव शरणम् इति भावः ॥ ५० ॥

सुरतेति । सुरतश्रमेण सम्भृतः जनितः खेदलवोद्गमः (१) अपि ते तव मुखे म्रियते वर्त्तते अयत्र त्वम् आत्मना स्वरूपेण

(१) खेदलवोद्गमः खेदलवोद्गताः "क्तादिकिलो भावो द्रव्यवत् प्रकाशते" इति न्यायादिवर्थः ।

अथ चास्तमिता त्वमात्मना
धिगिमां देहभृतामसारताम् ॥ ५१ ॥
मनसापि न विप्रियं मया
कृतपूर्वं तव किं जहासि माम् ।
ननु शब्दपतिः चितेरहं
त्वयि मे भावनिबन्धना रतिः ॥ ५२ ॥
कुसुमोत्खचितान् वलीभृतः
चलयन्(१) भृङ्गरुचस्तवालकान् ।
करभोरु करोति मारुतः
तदुपावर्त्तनशङ्कि मे मनः ॥ ५३ ॥

अस्तं नाशम् इता प्राप्ता, अतः कारणात् देहभृताम् प्राणिनाम् इमाम् असारताम् अस्थिरतां धिक् ॥ ५१ ॥

मनसेति । मया मनसा अपि तव विप्रियं न कृतपूर्वं पूर्वं न कृतम् इत्यर्थः । सुप्सुपेति समासः । किं मां जहासि, ननु अहं चितेः शब्दतः एव पतिः नलयतः इत्यर्थः भावनिबन्धना अभिप्रायनिबन्धना स्वभावहेतुका मे रतिस्तु त्वयि एव अस्ति इति शेषः ॥ ५२ ॥

कुसुमेति । कुसुमैः उत्खचितान् उत्कर्षेण रचितान् वलीभृतः भङ्गीयुक्तान् भृङ्गरुचः नीलान् तव अलकान् चलयन् कम्पयन् मारुतः हे करभोरु मे मनः तदुपावर्त्तनशङ्कि तव

(१) आदिरभीयङ्यङावीः इत्यभ्यासेन चलदित्यपदं सिध्यति ।

तदपोहितुमर्हसि प्रिये
प्रतिबोधेन विषादमाशु मे ।
ज्वलितेन गुहागतं तमः
तुहिनार्द्रेरिव नक्तमोषधिः(१) ॥ ५४ ॥
इदमुच्छ्वसितालकं मुखं
तव विश्रान्तकथं दुनोति माम् ।
निशि सुप्तमिवैकपङ्कजं
विरताभ्यन्तरषट्पदस्वनम् ॥ ५५ ॥

पुनरागमने शङ्कावत् करोति त्वदुज्जीवने शङ्कां कारयति इत्यर्थः ॥ ५३ ॥

तदिति । हे प्रिये तत् तस्मात् कारणात् आशु मे विषादं दुःखं, नक्तं रात्रौ ओषधिः दृषज्योतिराख्या लता ज्वलितेन प्रकाशेन तुहिनार्द्रेः गुहागतं तमः इव, प्रतिबोधेन ज्ञानेन अपोहितुं निरसितुम् अर्हसि ॥ ५४ ॥

इदमिति । इदम् उच्छ्वसितालकं चलितचूर्णकुन्तलं विश्रान्तकथं निवृत्तसंलापं तव मुखं, निशि सुप्तं निमीलितं विरतः अभ्यन्तराणाम् अन्तर्वर्तिनां षट्पदानां स्वनः यत्र तत् निःशब्दभृङ्गम् इत्यर्थः एकपङ्कजम् इव, मां दुनोति परितापयति ॥ ५५ ॥

---

(1) "तुहिनाद्रेरोषधी नक्तं प्रकाशनं इति मल्लिनाथः" इति दिनकरः। See Cumarasambhava Canto I. Stanza 10.

शशिनं पुनरेति शर्वरी
दयिता द्वन्द्वचरं पतत्रिणम्।
इति तौ विरहान्तरक्षमौ
कथमत्यन्तगता न मां दहेः ॥ ५६ ॥
नवपल्लवसंस्तरेऽपि ते
मृदु दूयेत यदङ्गमर्पितम्।
तदिदं विषहिष्यते कथं
वद वामोरु चिताधिरोहणम् ॥ ५७ ॥

शशिनमिति। शर्वरी रात्रिः शशिनं चन्द्रं पुनः एति प्राप्नोति, द्वन्द्वीभूय चरतीति द्वन्द्वचरः तं पतत्रिणं चक्रवाकं दयिता चक्रवाकी पुनः एति, इति हेतोः तौ चन्द्रचक्रवाकौ विरहान्तरक्षमौ(१) विरहावधिसहौ। "अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये" इत्यमरः। अत्यन्तगता पुनरावृत्तिरहिता त्वं तु कथं न मां दहेः अपितु दहेरेव इत्यर्थः ॥ ५६ ॥

नवेति। नवपल्लवसंस्तरे नूतनप्रवालास्तरणे अपि अर्पितं स्थापितं मृदु ते तव यत् अङ्गं शरीरं दूयेत परितप्तं भवेत्। वामौ सुन्दरौ ऊरू यस्याः सा हे वामोरु "वामं स्यात् सुन्दरे सव्ये" इति कैमरः। संहितायकलघ्वित्यादिना ऊङ्प्रत्ययः। तत् इदम् अङ्गं चितायाः काष्ठसञ्चयस्य अधिरोहणं कथं विषहिष्यते, वद ॥ ५७ ॥

(1) The Bombay Edition reads 'विरहान्तरापि विरहभेदात् चक्रे इति'.

इयमप्रतिबोधशायिनीं
रशना त्वां प्रथमा रहःसखी ।
गतिविभ्रमसादनीरवा
न शुचा नानुमृतेव लक्ष्यते ॥ ५८ ॥
कलमन्यभृतासु भाषितं
कलहंसीषु मदालसं गतम् ।
पृषतीषु विलोलमीक्षितं
पवनाधूतलतासु विभ्रमाः ॥ ५९ ॥

इयमिति । इयं प्रथमा रहःसखी सुरतसमयेऽप्यनुयानात् इति भावः । गतिविभ्रमसादेन नीरवा विलासोपरमेण निःशब्दा रशना मेखला अप्रतिबोधम् अपुनरुद्बोधं यथातथा शायिनीं मृताम् इत्यर्थः त्वाम् अनु त्वया सह । द्वितीयार्थे इत्यनुशब्दस्य कर्मप्रवचनीयत्वेन कर्मप्रवचनीययुक्ते द्वितीया । शुचा शोकेन मृता इव न लक्ष्यते इति न, लक्ष्यते एव इत्यर्थः । सम्भाव्यनिषेधनिवर्त्तनाय ह्यौ प्रतिषेधौ ॥ ५८ ॥

कलमिति, विदिवेति । युग्मम् । अन्यभृतासु कोकिलासु कलं मधुरं भाषितं भाषणम्, कलहंसीषु मदालसं मन्थरं गतं गमनम्, पृषतीषु हरिणीषु विलोलम् ईक्षितं चञ्चला दृष्टिः, पवनेन वायुना आधूतलतासु ईषत्कम्पितलतासु विभ्रमाः विलासाः ॥ ५९ ॥

विदिवोत्सुकयाप्यवेक्ष्य मां
निहिताः सत्यममी गुणास्त्वया ।
विरहे तव मे गुरुव्यथं
हृदयं न त्ववलम्बितुं क्षमाः ॥ ६० ॥
मिथुनं परिकल्पितं त्वया
सहकारः फलिनी च नन्विमौ ।
अविधाय विवाहसत्क्रियाम्
अनयोर्गम्यत इत्यसाम्प्रतम् ॥ ६१ ॥

अमी पूर्वोक्ताः कलभाषणादयः गुणाः, एषु कोकिलादिस्थानेषु इति शेषः। विदिवोत्सुकया अपि इह जीवन्त्यैव स्वर्गं प्रति प्रस्थितया अपि त्वया माम् अवेक्ष्य विरहासहं विधार्य सत्यं निहिताः मत्प्राणधारणोपायतया स्थापिताः इत्यर्थः तव विरहे गुरुव्यथम् अतिदुःखं मे हृदयम् अवलम्बितुं स्थापयितुं न क्षमाः न शक्ताः। ते तु त्वत्सङ्गमे एव सुखकारिणः नान्यथा प्रत्युत प्राणानपहरन्ति इति भावः ॥ ६० ॥

मिथुनमिति। ननु हे प्रिये सहकारः चूतविशेषः फलिनी प्रियङ्गुलता च इमौ त्वया मिथुनं परिकल्पितं मिथुनत्वेन अध्यमानि। अनयोः फलिनीसहकारयोः विवाहसत्क्रियां विवाहमङ्गलम् अविधाय अकृत्वा गम्यते इति असाम्प्रतम् अयुक्तम्। मालतीनानां न किञ्चित् सुखमस्ति इति भावः ॥ ६१ ॥

कुसुमं कृतदोहदस्त्वया(१)
यदशोकोऽयमुदीरयिष्यति ।
अलकाभरणं कथन्नु तत्
तव नेष्यामि निवापमाल्यताम्(२) ॥ ६२ ॥
स्मरतेव सशब्दनूपुरं
चरणानुग्रहमन्यदुर्लभम् ।
अमुना कुसुमाश्रुवर्षिणा
त्वमशोकेन सुगात्रि शोच्यसे ॥ ६३ ॥

कुसुममिति । हृद्यादिपोषकं दोहदम् । त्वया कृतं दोहदं पादताड़नरूपं यस्य सः अयम् अशोकः यत् कुसुमम् उदीरयिष्यति प्रसविष्यते तव अलकानाम् आभरणम् आभरणभूतं तत् कुसुमं कथं निवापमाल्यतां नेष्यामि । "निवापः पितृदानं स्यात्" इत्यमरः ॥ ६२ ॥

स्मरतेति । अन्यदुर्लभं किन्तु स्मर्तव्यमेव इत्यर्थः(३) सशब्दं नूपुरं यस्य तं चरणेन अनुग्रहं पादेन ताड़नरूपं स्मरता इव

(१) "सुन्दरीचरणाघातेनाशोकः पुष्पतीति प्रसिद्धिरतः पादाघात एवाशोकस्य दोहदं इत्यर्थः" इति दिनकरः । "पादाघातादशोको विकसति वकुलः सीधुगण्डूषसेकात्" इत्यादि साहित्यदर्पणे द्रष्टव्यम् ।

(२) माल्यस्य निवापत्वं आश्वलायनैः प्रतिपादितं । "एतस्मिन् काले गन्धमाल्यधूपदीपाच्छादनानां प्रदानम्" इति श्रवणात् । See Aśvalāyana IV. 8. 1.

(३) "किन्तु स्मर्तव्यमेव इत्यर्थः" This is not found in the Bombay Edition and seems to be an inappropriate interpolation.

तव निःश्वसितानुकारिभिः
वकुलैरर्द्धचितां समं मया ।
असमाप्य विलासमेखलां(१)
किमिदं किन्नरकण्ठि सुप्यते ॥ ६४ ॥
समदुःखसुखः सखीजनः
प्रतिपच्चन्द्रनिभोऽयमात्मजः(२) ।

कुसुमानि एव अस्त्रूणि तद्दर्शिना अमुना अशोकेन हे सुगात्रि अङ्गगात्रकण्ठेभ्यश्चेति वक्तव्यात् ङीप् । त्वं शोच्यसे ॥ ६३ ॥

तवेति । तव निःश्वसितानुकारिभिः वकुलैः वकुलकुसुमैः मया समं सार्द्धम् अर्द्धचिताम् अर्द्धं यया तथा रचितां विलासमेखलाम् असमाप्य किन्नरस्य देवयोनिविशेषस्य कण्ठः इव कण्ठः यस्याः तत्सम्बुद्धिः हे किन्नरकण्ठि अङ्गगात्रकण्ठेभ्यश्चेति ङीप् । किम् इदं सुप्यते । वचिस्वपीत्यादिना सम्प्रसारणम् । अनुचितमिदं स्वपनम् इत्यर्थः ॥ ६४ ॥

समेति । सखीजनः समदुःखसुखः त्वद्दुःखेन दुःखी त्वत्सुखेन सुखी इत्यर्थः । अयम् आत्मजः बालः प्रतिपच्चन्द्रनिभः दर्शनीयः यद्विष्णुश्च इत्यर्थः । प्रतिपच्छब्देन द्वितीया लक्ष्यते

(१) विलासस्य या मेखला काञ्ची सा विलासमेखला । विलासमेखलायै गुम्फिता रचना इत्यर्थः ।

(२) "यद्विष्णुत्वात् सर्वलोकैरीक्षणेन दृश्यमानत्वात् । "प्रतिपच्चन्द्र" इत्यत्र प्रतिपत्सादृश्यादत्र द्वितीयाचन्द्रो विवक्षितः । यद्यपि प्रतिपदपि चन्द्रकलासि तथापि बहुदृश्यमानत्वात् न दुष्यते" इति दिनकरः ।

अहमेकरसस्तथापि ते
व्यवसायः प्रतिपत्तिनिष्ठुरः(१) ॥ ६५ ॥
धृतिरस्तमिता रतिश्च्युता
विरतं गेयमृतुर्निरुत्सवः
गतमाभरणप्रयोजनं
परिशून्यं शयनीयमद्य मे ॥ ६६ ॥

प्रतिपदि चन्द्रस्यादर्शनात् । अहम् एकरसः अभिन्नरागः । "शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः" इत्यमरः । तथापि जीवितसामग्रीसत्त्वेऽपि इत्यर्थः ते तव व्यवसायः अस्मत्परित्यागरूपो व्यापारः प्रतिपत्त्या निश्चयेन निष्ठुरः । "प्रतिपत्तिः पदप्राप्तौ प्रकृतौ गौरवेऽपि च । प्रागल्भ्ये च प्रबोधे च" इति विश्वः । स्मर्तुं न शक्यं किमुताधिकर्तुम् इति भावः ॥ ६५ ॥

धृतिरिति । अद्य मे धृतिः धैर्यं प्रतीतिः वा अस्तं नाशम् इता, रतिः च्युता गता, गेयं गानं विरतम्, ऋतुः वसन्तादिः निरुत्सवः, आभरणानां प्रयोजनं गतम् अपगतं, शेते अस्मिन्निति शयनीयम् तल्पम् । कृत्यल्युटो बहुलमित्यधिकरणार्थे अनीयर् प्रत्ययः । परिशून्यम् । त्वां विना सर्वमपि निष्फलम् इति भावः ॥ ६६ ॥

---

(१) "एतन्निरयं यद्यपि जीवितावलम्बनं कर्त्तुं ते तथापि ते व्यवसायो मरणोद्योगः प्रतिपत्त्या बोधेन निष्ठुरः क्रूरः पराङ्मुख इत्यर्थः" इति दिनकरः । "तथापि ते तव व्यवसायः प्रतिपत्तिनिष्ठुरः स्वभावनिष्ठुर इति यावत्" इति मल्लिनाथः ।

गृहिणी सचिवः सखी मिथः
प्रियशिष्या ललिते कलाविधौ।
करुणाविमुखेन मृत्युना
हरता त्वां वद किं न मे हृतम् ॥ ६७ ॥
मदिराक्षि मदाननार्पितं
मधु पीत्वा रसवत् कथं नु मे।
अनुपास्यसि वाष्पदूषितं
परलोकोपनतं जलाञ्जलिम् ॥ ६८ ॥

गृहिणीति। त्वम् एव गृहिणी दाराः सचिवः बुद्धि-सहायो मन्त्री मिथः रहसि सखी नर्म्मसचिवः ललिते मनोहरे कलाविधौ वादित्रादिचतुःषष्टिकलाप्रयोगे प्रियशिष्या, अतः त्वां समष्टिरूपां हरता अत एव करुणाविमुखेन कृपाशून्येन मृत्युना मे मत्सम्बन्धि किं न हृतं वद सर्व्वमपि हृतम् इत्यर्थः ॥ ६७ ॥

मदिरेति। माद्यति अनया इति मदिरा(१) लोकप्रसिद्धा तथापि "नार्य्यो मदिरलोचना" इत्यादिप्रयोगदर्शनात् माद्यति आभ्याम् इति मदिरे अक्षिणी यस्याः तत्सम्बुद्धिः हे मदिराक्षि मदाननेन अर्पितं रसवत् स्वादुतरं मधु मद्यं पीत्वा वाष्पदूषितम् अश्रुतप्तं परलोकोपनतं परलोकप्राप्तं मे जलाञ्जलिं कथं नु

(१) यद्वा मदिरा मदकरत्वात् तद्वा मदिरे इव अक्षिणी यस्याः इति।

विभवेऽपि सति त्वया विना
सुखमेतावदजस्य गण्यताम् ।
अहृतस्य विलोभनान्तरैः
मम सर्व्वे विषयास्त्वदाश्रयाः ॥ ६९ ॥
विलपन्निति कोशलाधिपः
करुणार्थग्रथितं प्रियां प्रति ।
अकरोत् पृथिवीरुहानपि
स्रुतशाखारसवाष्पदूषितान्(१) ॥ ७० ॥

अनु अनन्तरं पास्यसि । तदनन्तरमिदमनर्हम् इत्यर्थः । यथाह भट्टमल्लः, "अनुपानं हिमजलं यवगोधूमनिर्म्मिते । दधि मद्ये विषे द्राक्षे पिष्टे मिष्टमयेऽपि च" ॥ इति । तच्च इहैव युज्यते । इदं तूष्णं लोकान्तरोपयोगि चेत्यायुर्वेदविरोधात् कथमनुमास्यसि इति भावः ॥ ६८ ॥

विभवे इति । विभवे ऐश्वर्य्ये सति अपि त्वया विना अजस्य एतावत् एव सुखं गण्यताम् यावत् त्वया सह भुक्तं ततः अन्यत्र किञ्चिद्भविष्यति इत्यर्थः । कुतः विलोभनान्तरैः विषयान्तरैः अहृतस्य अनाकृष्टस्य मम सर्व्वे विषयाः भोगादयः त्वदाश्रयाः त्वदधीनाः त्वां विना मे न किञ्चिद्रोचते इत्यर्थः ॥ ६९ ॥

विलपन्निति । कोशलाधिपः अजः इति, करुणः शोकरसः स एव अर्थः तेन ग्रथितं सम्बद्धं यथा तथा, प्रियां प्रति विलपन्

(१) द्रुहिणान् इति पाठान्तरम् ।

अथ तस्य कथञ्चिदङ्गतः
स्खलनस्तामपनीय सुन्दरीम्।
विससर्ज्ज तदन्त्यमण्डनाम्(१)
अनलायागुरुचन्दनैधसे ॥ ७१ ॥
प्रमदामनु संस्थितः शुचा
नृपतिः सन्निति वाच्यदर्शनात्।

पृथिवीरुहान् हत्वान् अपि स्रुताः शाखारसाः मकरन्दाः एव वाष्पाः तैः दूषितान् अकरोत्। अचेतनानप्यरोदयदित्यर्थः ॥ ७० ॥

अथेति। अथ स्खलनः बन्धुवर्गः तस्य अजस्य अङ्गतः उत्सङ्गात् कथञ्चित् अपनीय तत् दिव्यकुसुमम् एव अन्त्यं मण्डनम् अलङ्कारः यस्याः तां तां सुन्दरीम् अगुरुणि चन्दनानि एधांसि यस्य तस्मै अनलाय अग्नये विससर्ज्ज विसृष्टवान्। क्रियाग्रहणमपि कर्त्तव्यमिति क्रियामात्रप्रयोगे सम्प्रदानत्वाच्चतुर्थी ॥ ७१ ॥

प्रमदामिति। नृपतिः सन् अपि विद्वान् अपि शुचा शोकेन प्रमदाम् अनु प्रमदया सह संस्थितः मृतः इति वाच्यदर्शनात् निन्दादर्शनात् देव्या इन्दुमत्या सह शरीरम् अग्निसात् अन्त्य-

---

(१) Dinakara reads with Vallabha हतान्त्यमण्डना and explains "तदा क्रियमाणं अन्त्यं प्रेतोचितं मण्डनं यस्याः सा हतान्त्यमण्डना"। मण्डनत्वं यथा:- "प्रेतं स्नापयित्वा गन्धैर्नानुलिप्य नवदामादां अथमालां वा दक्षिणमुच्च मूर्द्धतोऽवसक्थमा पादमासमस्तात् प्रेतेच्छ मण्डयेच्च प्राङ्मिरसमादित्यदेशुः पादमाद्दक्षिणदेशुः परिधाप्य वासयेत्।" See Asvalayana Parisishta III 1.

न चकार शरीरमग्निसात्
सह देव्या न तु जीविताशया ॥ ७२ ॥
अथ तेन दशाहतः(१) परे
गुणशेषामुपदिश्य भामिनीम् ।
विदुषा विधयो महर्द्धयः(२)
पुर एवोपवने समापिताः ॥ ७३ ॥

धीनं न चकार । तदधीनवचने इति सातिप्रत्ययः । जीविताशया प्राणेच्छया तु न ॥ ७२ ॥

अथेति । अथ विदुषा तेन अजेन गुणाः एव शेषाः यस्याः तां गुणशेषां भामिनीम् इन्दुमतीम् उपदिश्य उद्दिश्य दशानाम् अह्नां समाहारः दशाहः । तद्धितार्थेत्यादिना समासः, समाहारस्यैकत्वादेकवचनम्, "राजाहःसखिभ्यष्टच्" इति टच्, राज्ञाह्नाहाः पुंसीति पुंवत्, ततस्तसिल् । तस्मात् दशाहतः परे

---

(१) "दशाहीत्व विधिविशेषः मनु दशदिनानि" इति वल्लभः । दशाहकृत्यप्रकारस्तायने विस्तरं—"अथ दशमेऽनि कर्ता जलाशयं चतुरस्रं वेदिं कृत्वा त्रीन् उपलान् अभ्यक्तस्नापितान् दक्षिणाग्रसंस्थान् स्थापयित्वा मध्यमे प्रेतं उत्तरे सप्तर्षीन् दक्षिणे यमभित्यावाह्य उपलान् अवकृत्यार्द्रयित्वा तदग्रे तेभ्य एकैकं पिण्डं दत्वा उदकुम्भं हस्तादुत्काय निधेय सर्वतीर्थोदकैरुत्तरणानि दद्यात् । अथ क्षौरादि कारयित्वा स्नातिधान्यवासाः स्नातालीन् शौनखलीन् प्रेताय दद्युः शेषानुपलनियमः । अथ पुरस्तात् अभ्यक्तस्नाताः पक्वान्नसक्तपूपी आद्यपेतुरथ पूर्वं उपक्लप्तमुदकुम्भं हृत्वा श्मशानं व्रजेयुः अथ शास्त्रेण वा वर्त्तेरन् गृहे वा पचेरन्" । इति रुद्रपरिभिष्टे चतुर्थोध्यायस्य षष्ठं सूत्रम् ।

(२) "महर्द्धयः मूरिदक्षिणा" इति दिनकरः ।

स विवेश पुरीं तया विना
क्षणदापायशशाङ्कदर्शनः ।
परिवाहमिवावलोकयन्
स्वशुचः पौरवधूमुखाश्रुषु ॥ ७४ ॥
अथ तं सवनाय दीक्षितः
प्रणिधानाद्गुरुराश्रमस्थितः ।

कर्त्तव्याः महत्यः महासमुदयः विधयः क्रियाः पुरः पुण्याः उपवने एव समापिताः सम्पूर्णमनुष्ठिताः । दशाहतः इत्यत्र "विप्रः शुध्येद्दशाहेन द्वादशाहेन भूमिपः" इति वचनविरोधो नाशङ्कनीयः तस्य निर्गुणक्षत्रियविषयत्वात् । गुणवत्क्षत्रियस्य दशाहेन शुद्धिमाह पराशरः, "क्षत्रियस्तु दशाहेन स्वधर्मनिरतः शुचिः" इति । सूयतेऽस्यापि गुणवत्त्वं विदुषेत्यनेन ॥ ७३ ॥

स इति । तया इन्दुमत्या विना क्षणदायाः रात्रेः अपाये अपगमे यः मयाङ्कः चन्द्रः सः इव दृश्यते इति कर्मार्थे खुट् । प्रातःकालिकचन्द्र इव दृश्यमानः इत्यर्थः स अजः पौरवधूमुखाश्रुषु स्वशुचः स्वशोकस्य परिवाहं जलोच्छासम् इव अवलोकयन् । "जलोच्छासाः परीवाहाः" इत्यमरः । स्वदुःखपूरातिशयम् इव पश्यन् पुरीं विवेश । वधूपदेशात् तस्यामिन्दुमत्यां सख्याभिमानात् अजसमानदुःखसूचनात्परीवाहोक्तिर्निर्वहति ॥ ७४ ॥

अथेति । अथ सवनाय यागाय दीक्षितः गुरुः वसिष्ठः आश्रमे स्वकीयाश्रमे स्थितः सन् तम् अजम् अभिपद्यजडं दुःखं-

अभिपङ्गजड़ं विजज्ञिवान्
इति शिष्येण किलान्ववोधयत् ॥ ७५ ॥
असमाप्तविधिर्यतोमुनिः
तव विद्वानपि तापकारणम् ।
न भवन्तमुपस्थितः स्वयं
प्रकृतौ स्थापयितुं पथच्युतम्(१) ॥ ७६ ॥
मयि तस्य सुवृत्त वर्त्तते
लघुसन्देशपदा सरस्वती ।

मोहितं प्रणिधानात् चित्तैकाग्र्यात् विजज्ञिवान् ज्ञातवान् । ज्ञस्थेति क्वसुप्रत्ययः । इति वक्ष्यमाणप्रकारेण शिष्येण अन्ववोधयत् किल । बुधेर्ण्यन्तात् णिचि लङ् ॥ ७५ ॥

वसिष्ठशिष्य आह असमाप्तेति । यतः हेतोः मुनिः असमाप्तविधिः असमाप्तक्रतुः ततः तव तापकारणं दुःखहेतुं कलत्रनाशरूपं विद्वान् जानन् अपि । विदेः शतुर्वसुरिति वस्वादेशः, न लोकेत्यादिना षष्ठीप्रतिषेधः । पथः च्युतं स्वभावात् भ्रष्टं भयन्तं प्रकृतौ स्वभावे स्थापयितुं समाश्वासयितुम् इत्यर्थः स्वयं न उपस्थितः न आगतः ॥ ७६ ॥

मयीति । हे सुवृत्त सदाचार सन्दिश्यते इति सन्देशः सन्देष्टव्यार्थः तस्य पदानि वाचकानि लघूनि संक्षिप्तानि सन्देश-

(१) सतश्च्युतमिति क्वचित् पाठः, सतो हेतोरित्यर्थः ।

शृणु विश्रुतसत्त्वसार तां
हृदि चैनामुपधातुमर्हसि ॥ ७७ ॥
पुरुषस्य पदेष्वजन्मनः (१)
समतीतञ्च भवच्च भावि च ।
स हि निष्प्रतिघेन चक्षुषा
वितयं ज्ञानमयेन पश्यति ॥ ७८ ॥
चरतः किल दुश्चरं तपः
तृणविन्दोः परिशङ्कितः पुरा ।

पदानि यस्यां सा लघुसन्देशपदा तस्य मुनेःसरस्वती वाक् मयि वर्त्तते, हे विश्रुतसत्त्वसार प्रख्यातधैर्य्यातिशय तां सरस्वतीं शृणु, एनां वाचं हृदि उपधातुं धर्तुं च अर्हसि ॥ ७७ ॥

वक्ष्यमाणार्थानुगुणं मुनेः सर्व्वज्ञत्वं तावदाह, पुरुषस्येति । अजन्मनः पुरुषस्य पुराणपुरुषस्य भगवतः त्रिविक्रमस्य पदेषु विक्रमेषु त्रिभुवनेष्वपि इत्यर्थः समतीतं भूतञ्च भवत् वर्त्तमानञ्च भावि भविष्यच्च इति त्रितयं स मुनिः निष्प्रतिघेन अप्रतिबन्धेन ज्ञानमयेन चक्षुषा ज्ञानदृष्ट्या पश्यति हि, अतस्तदुक्तिषु न संशयितव्यम् इत्यर्थः ॥ ७८ ॥

चरत इति । पुरा किल दुश्चरं तीव्रं तपः चरतः तृणविन्दोः तृणविन्दुनामकात् कस्माच्चित् ऋषेः परिशङ्कितः भीतः । कर्त्तरि

(१) "भूतभवद्भविष्यत्सु" इति दिनकरः ।

प्रजिघाय समाधिभेदिनीं
हरिरस्मै हरिणीं(१) सुराङ्गनाम् ॥ ७९ ॥
स तपःप्रतिबन्धमन्युना
प्रमुखाविष्कृतचारुविभ्रमाम् ।
अशपद्भव मानुषीति तां
शमवेलाप्रलयोर्म्मिणा भुवि(२) ॥ ८० ॥
भगवन् परवानयं जनः
प्रतिकूलाचरितं क्षमस्व मे ।

क्तः, भीत्रार्थानां भयहेतुरित्यपादानात् पञ्चमी । हरिः इन्द्रः समाधिभेदिनीं तपोविघातिनीं हरिणीं नाम सुराङ्गनाम् अस्मै तृणबिन्दवे प्रजिघाय प्रेरितवान् ॥ ७९ ॥

स इति । सः मुनिः शमः शान्तिः एव वेला मर्य्यादा तस्याः प्रलयोर्म्मिणा प्रलयकालतरङ्गेण शमविघातकेन इत्यर्थः । "अब्धावम्बुविकृतौ वेला कालमर्य्यादयोरपि" इत्यमरः । तपसः प्रतिबन्धेन विघ्नेन यः मन्युः क्रोधः तेन हेतुना प्रमुखे अग्रे आविष्कृतचारुविभ्रमां प्रकाशितमनोहरविलासां तां हरिणीं भुवि भूलोके मानुषी मनुष्यस्त्री भव इति अशपत् ॥ ८० ॥

भगवन्निति । हे भगवन् महर्षे अयं जनः परोऽस्यास्तीति

(1) This Harini was an Apsara and not identical with one, who is thus described in the Visnupurana—तेभ्यः प्रभास्वरं जज्ञे मेनका हरिणी तथा । ते चमे ब्रह्मवादिन्यौ योगिन्यौ चाप्यभे द्विज" इति ।

(२) क्षमिरिति पाठान्तरम् ।

इति चोपनतां चितिस्पृशं
कृतवानासुरपुष्पदर्शनात् ॥ ८१ ॥
क्रथकैशिकवंशसम्भवा
तव भूत्वा महिषी चिराय सा ।
उपलब्धवती दिवच्युतं
विवशा शापनिवृत्तिकारणम् ॥ ८२ ॥
तदलं तदपायचिन्तया
विपदुत्पत्तिमतामुपस्थिता ।

स्वामित्वेन परवान् पराधीनः । अयमिति आत्मनिर्देशः, अहं पराधीना इत्यर्थः । मे मम प्रतिकूलाचरितम् अपराधं क्षमस्व इति अनेन प्रकारेण उपनतां शरणागतां च हरिणीम् आसुरपुष्पदर्शनात् सुरपुष्पदर्शनपर्यन्तं चितिं स्पृशतीति चितिस्पृक् तां चितिस्पृशं मानुषीं कृतवान् दिव्यपुष्पदर्शनं शापावधिरित्यनुगृहीतवान् इत्यर्थः ॥ ८१ ॥

क्रथकैशिकेति । क्रथकैशिकानां राज्ञां वंशे सम्भवः यस्याः सा हरिणी तव महिषी अभिषिक्ता स्त्री । "कृताभिषेका महिषी" इत्यमरः । भूत्वा चिराय दिवः स्वर्गात् च्युतं शापनिवृत्तिकारणं सुरपुष्परूपम् उपलब्धवती विवशा अभूत् इति शेषः मृता इत्यर्थः ॥ ८२ ॥

तदिति । तत् तस्मात् तस्याः अपायचिन्तया अलं, तस्या

वसुधेयमवेक्षतां त्वया
वसुमत्या हि नृपाः कलत्रिणः ॥ ८३ ॥
उदये मदवाच्यमुज्झता
श्रुतमाविष्कृतमात्मवत् त्वया ।
मनसस्तदुपस्थिते ज्वरे(१)
पुनरक्लीवतया(२) प्रकाश्यताम् ॥ ८४ ॥

मरणं न चिन्त्यम् इत्यर्थः । निषेधक्रियां प्रति करणत्वात् चिन्तयेति तृतीया । कुतो न चिन्त्यमत आह, उत्पत्तिमतां जन्मवतां विपत् विपत्तिरूपस्थिता सिद्धा, जातस्य हि ध्रुवो मृत्युः इत्यर्थः । तथापि कलत्ररहितस्य किं जीवितेन तत्राह, त्वया इयं वसुधा भूमिः अवेक्ष्यतां पाल्यतां, हि यस्मात् नृपाः वसुमत्या पृथिव्या कलत्रिणः कलत्रवन्तः, अतो न शोचितव्यम् इत्यर्थः ॥ ८३ ॥

उदय इति । उदये अभ्युदये सति मदेन यत् वाच्यं निन्दा तत् उज्झता परिहरता सति अपि मद्धेतौ अनवमानयता त्वया यत् आत्मवत् अध्यात्मप्रचुरं श्रुतं शास्त्रं तज्जनितं ज्ञानम् इति यावत् आविष्कृतं प्रकाशितं तत् श्रुतं मनसः ज्वरे सन्तापे उप-

---

(१) "राज्याधिगमने यत्पदाकीर्णं नाभूत् तेन श्रुतं प्रकटीकृतं शास्त्रतं त्वधिगतसन्तापपरित्यागेन तत् श्रुतं सत्यं प्रकटं कुरु इत्यर्थः" इति दिनकरः ।

(२) यद्वा अक्लीवतया वैकल्यं विना इत्यर्थः तत् श्रुतं प्रकटय मानससन्तापहरणस्य तदेव सत्यं कुरु इति तात्पर्यार्थः ।

रुदता कुत एव सा पुनः
भवता नानुमृतापि लभ्यते ।
परलोकजुषां स्वकर्मभिः
गतयो भिन्नपथा हि(१) देहिनाम् ॥ ८५ ॥
अपशोकमनाः कुटुम्बिनीम्
अनुगृह्णीष्व निवापदत्तिभिः ।

स्थिते प्राणे अक्लीवतया धैर्येण लिङ्गेन पुनः प्रकाग्र्यतां विदुषा सर्वास्ववस्थासु धीरेण भवितव्यम् इत्यर्थः ॥ ८४ ॥

इतोऽपि न रोदितव्यमित्याह, रुदतेति । रुदता भवता सा कुतः एव लभ्यते न लभ्यते एव, अनुम्रियते इति अनुमृत् । क्विप् । तेन अनुमृता अनुमृतवता अपि भवता पुनः न लभ्यते । कथं न लभ्यते इत्याह, परलोकजुषां लोकान्तरभाजां देहिनां गम्यन्ते इति गतयः गम्यस्थानानि स्वकर्मभिः पूर्वाचरितपुण्यपापैः भिन्नपथाः पृथक्कृतमार्गाः हि, परत्रापि स्वस्वधर्मानुरूपफलभोगाय भिन्नदेहगमनाद्व मृतेनापि लभ्यते इत्यर्थः ॥ ८५ ॥

अपेति । किन्तु अपशोकमनाः निर्दुःखचित्तः सन् कुटुम्बिनीं पत्नीं, निवापदत्तिभिः पिण्डोदकादिदानैः अनुगृह्णीष्व तर्पय इत्यर्थः । अन्यथा दोषमाह, अतिसन्ततम् अविच्छिन्नं स्वजनानां बन्धूनाम् । "बन्धुस्वस्वजनाः समाः" इत्यमरः ।

(१) "केचित् मृताः केचित् परत्र, केचित् रुदन्ति हन्त हि" इति दिनकरः ।

स्वजनाश्रु किलातिसन्ततं
दहति प्रेतमिति प्रचक्षते ॥ ८६ ॥
मरणं प्रकृतिः शरीरिणां
विकृतिर्जीवितमुच्यते बुधैः ।
क्षणमप्यवतिष्ठते श्वसन्
यदि जन्तुर्ननु लाभवानसौ ॥ ८७ ॥
अवगच्छति मूढचेतनः
प्रियनाशं हृदि शल्यमर्पितम् ।
स्थिरधीस्तु तदेव मन्यते
कुशलद्वारतया समुद्धृतम् ॥ ८८ ॥

अयु कर्तृ प्रेतं मृतं दहतीति प्रचक्षते किल । अत्र याज्ञवल्क्यः, "श्लेष्मास्रु बन्धुभिर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः । अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः" ॥ इति ॥ ८६ ॥

मरणमिति । शरीरिणां मरणं प्रकृतिः स्वभावः ध्रुवम् इत्यर्थः, जीवितं विकृतिः याट्टच्छिकं बुधैः उच्यते, एवं स्थिते जन्तुः प्राणी क्षणम् अपि । अत्यन्तसंयोगे द्वितीया । श्वसन् जीवन् अवतिष्ठते यदि असौ क्षणजीवी लाभवान् ननु । जीवने यथालाभं सन्तोष्टव्यम् अलभ्यलाभात्, मरणे तु न शोचितव्यम् अस्य स्वाभाव्यात् इति भावः ॥ ८७ ॥

अवैति । मूढचेतनः भ्रान्तबुद्धिः प्रियनाशम् इष्टनाशं हृदि

स्वशरीरशरीरिणावपि
युत(१)संयोगविपर्य्ययौ यदा।
विरहः किमिवानुतापयेत्
वद वाह्यैर्विषयैर्विपश्चितम् ॥ ८९ ॥
न पृथग्जनवच्छ्रुचो वशं
वशिनामुत्तम गन्तुमर्हसि।
द्रुमसानुमतां किमन्तरं
यदि वायौ हितयेऽपि ते चलाः ॥ ९० ॥

अर्पितं निखातं मूलं मङ्क्षु अवगच्छति मन्यते, स्थिरधीः विद्वान् तु तत् एव मूलं समुद्धृतम् उत्खातं मन्यते प्रियनाशे सति इति शेषः, कुतः कुशलहारतया प्रियनाशस्य मोक्षोपायतया इत्यर्थः। विषयलाभवियोगयोर्यथाक्रमं हिताहितसाधनत्वाभिमानः पामराणां विपरीतं तु विपश्चिताम् इति भावः ॥ ८८ ॥

स्वेति। स्वस्य शरीरशरीरिणौ देहात्मानौ अपि यदा यतः द्रुतौ द्रुत्यवगतौ संयोगविपर्य्ययौ संयोगवियोगौ ययोः तौ तयोक्तौ तदा वाह्यैः विषयैः पुत्रकलत्रादिभिः विरहः विपश्चितं विद्वांसं किम् इव अनुतापयेत्, त्वं वद, न किञ्चित् इत्यर्थः। अथवा स्वशब्दस्य शरीरेणैव सम्बन्धः ॥ ८९ ॥

नेति। हे वशिनाम् उत्तम जितेन्द्रियवर्य्य पृथग्जनवत् शुचः शोकस्य वशं गन्तुं न अर्हसि। तथाहि, द्रुमसानुमतां तरु-

(1) Dinakara reads हित for द्रुत।

स तथेति विनेतुरुदारमतेः
प्रतिगृह्य वचो विससर्ज्ज मुनिम् ।
तदलब्धपदं हृदि शोकघने
प्रतियातमिवान्तिकमस्य गुरोः ॥ ९१ ॥
तेनाष्टौ परिगमिताः समाः कथञ्चित्
बालत्वादवितथसूनृतेन(१) सूनोः ।

शिखरिणां किम् अन्तरं कः विशेषः यौ सति द्वितये अपि द्विप्रकाराः अपि । प्रथमचरमेत्यादिना जसि विभाषया सर्व्वनामसंज्ञा । ते द्रुमसानुमन्तः चलाः यदि सानुतामपि चलने द्रुमवत् तेषामपि अचलसंज्ञा न स्यात् इत्यर्थः ॥ ९० ॥

स इति । स अजः उदारमतेः विनेतुः गुरोः वसिष्ठस्य वचः तच्छिष्यमुखेरितं तथेति प्रतिगृह्य अङ्गीकृत्य मुनिं वसिष्ठशिष्यं विससर्ज्ज प्रेषयामास, किन्तु तद्वचः शोकघने दुःखसान्द्रे अस्य अजस्य हृदि अलब्धपदम् अप्राप्तावकाशं सत् गुरोः वसिष्ठस्य अन्तिकं प्रतियातम् इव, प्रतिनिवृत्तं किमु, इत्युत्प्रेक्षा । तोटकवृत्तमेतत् । "इह तोटकमम्बुधिसैः प्रथितम्" इति तल्लक्षणम् ॥ ९१ ॥

तेनेति । अवितथं यथार्थं सूनृतं प्रियवचनं यस्य तेन अजेन

(1) On this Sankara observes "This epithet appears to be used here to show that in living some years after Indumati's death, Aja did not act contrary to his professions contained in his lamentations. Although he lived some years after her death,

सादृश्यप्रतिकृतिदर्शनैः प्रियायाः
स्वप्नेषु क्षणिकसमागमोत्सवैश्च ॥ ९२ ॥
तस्य प्रसह्य हृदयं किल शोकशङ्कुः
पुत्रप्ररोह इव सौधतलं विभेद ।
प्राणान्तहेतुमपि तं भिषजामसाध्यं
लाभं प्रियानुगमने(१) त्वरया स मेने ॥ ९३ ॥

सूनोः पुत्रस्य बालत्वात् राज्याक्षमत्वात् इत्यर्थः प्रियायाः इन्दुमत्याः सादृश्यं वस्त्वन्तरगतम् आकारसाम्यं प्रतिकृतिः चित्रं तयोः दर्शनैः स्वप्नेषु क्षणिका क्षणभङ्गुराः ये समागमोत्सवाः तैश्च कथञ्चित् कृच्छ्रेण अष्टौ समाः वत्सराः । "संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः" इत्यमरः । परिगमिताः अतिवाहिताः । उक्तञ्च, "वियोगावस्थासु प्रियजनसङ्गचानुभवनं, ततश्चित्रं कर्म स्वपनसमये दर्शनमपि । तदङ्गस्पृष्टानामुपगतवतां स्पर्शनमपि, प्रतीकारः कामव्यथितमनसां कोऽपि कथितः"। इति । प्रकृते सादृश्यादिदृतीयाभिधानं तदङ्गस्पृष्टपदार्थसृष्टेरप्युपलक्षणम् । प्रहर्षिणी वृत्तमेतत् ॥ ९२ ॥

तस्येति । शोकः इव शङ्कुः कीलः । "शङ्कुः कीले गिवे च" इति विश्वः । तस्य अजस्य हृदयं, पुत्रप्ररोहः सौधतलम् इव,

---

he was yet अक्षितवयसम्, for he passed those years because his son was still an infant".

(१) प्रियानुगमनत्वरयेति वा पाठः ।

सम्यग्विनीतमथ वर्म्महरं कुमारम्
आदिश्य रक्षणविधौ विधिवत् प्रजानाम् ।
रोगोपसृष्टतनुदुर्वसतिं सुसुक्षुः
प्रायोपवेशनमतिर्नृपतिर्बभूव ॥ ९४ ॥

प्रसह्य बलात् किल बिभेद । स अजः प्राणान्तहेतुं मरणकारणम् अपि भिषजाम् असाध्यम् अप्रतिसमाधेयं तं शोकग्रहं रोगपर्य्यवसितं प्रियायाः अनुगमने त्वरया उत्कण्ठया लाभं मेने तद्विरहस्यातिदुःसहत्वात् तत्प्राप्तिकारणं मरणमेव वरमित्यमन्यत इत्यर्थः ॥ ९३ ॥

सम्यगिति । अथ नृपतिः अजः सम्यक् विनीतं निसर्गसंस्काराभ्यां विनयवन्तं वर्म्म हरतीति वर्म्महरः कवचधारणार्हवयस्कः । वयसि चेत्यच्प्रत्ययः । तं कुमारं दशरथं प्रजानां रक्षणविधौ राज्ये विधिवत् विध्यर्हं यथाशास्त्रम् इत्यर्थः । तदर्हमिति वतिप्रत्ययः । आदिश्य नियुज्य रोगेण उपसृष्टायाः व्याप्तायाः तनोः शरीरस्य दुर्वसतिं दुःखावस्थितिं सुसुक्षुः जिहासुः सन् प्रायोपवेशने अनशनावस्थाने मतिः यस्य स बभूव । "प्रायोयानशने मृत्यौ सुप्तवाहुल्ययोरपि" इति विश्वः । अत्र पुराणवचनम्, "समासक्तो भवेद् यस्तु पातकैर्महदादिभिः दुश्चिकित्स्यैर्महारोगैः पीड़ितो वा भवेत् तु यः । स्वयं देहविनाशस्य काले प्राप्ते महामतिः । आत्मात्मानं वा स्वर्गादिमहाफलजिगीषया । प्रविशेज्ज्वलनं दीप्तं कुर्य्यादनशनं तथा । एतेषामधिकारोऽस्ति नान्येषां सर्व्वजन्तुषु । नराणामथ नारीणां

तीर्थे तोयव्यतिकरभवे जह्नुकन्या सरय्वोः(१)
देहत्यागादमरगणनालेख्यमासाद्य सद्यः ।

सर्व्ववर्णेषु सर्व्वदा" ॥ इति । अनयोर्वंसन्ततिलकाच्छन्दः । तल्लक्षणम्, "उक्ता वसन्ततिलका तभजाजगौ गः" इति ॥ ८४ ॥

तीर्थ इति । असौ अजः जह्नुकन्यासरय्वोः तोयानां जलानां व्यतिकरेण सम्भेदेन भवे तीर्थे गङ्गासरयूसङ्गमे देहत्यागात् सद्यः एव अमरगणनायां लेख्यं लेखनम् । तयोरेव लब्धस्वर्गौ इति भावार्थे ष्यञ्प्रत्ययः । आसाद्य प्राप्य पूर्वस्मात् आकारात् अधिकतरा रुक् यस्याः तया कान्त्या रमण्या सङ्गतः सन् नन्दनस्य इन्द्रोद्यानस्य अभ्यन्तरेषु अन्तर्वर्त्तिषु लीलागारेषु क्रीड़ाभवनेषु पुनः अरमत । "यथाकथञ्चित् तीर्थेऽस्मिन् देहत्यागं करोति यः । तस्यात्मघातदोषो न प्राप्नुयादीप्सितान्यपि" ।

---

(1) Jahnu was a descendant of पुरूरवा and son of Suhotra. Jahnu, whilst performing a sacrifice, saw the whole of the place, overflowed by the waters of the Ganges. Highly offended at this intrusion, his eyes red with anger, he united the spirit of sacrifice with himself by the power of his devotion and drank up the river. The gods and sages upon this came to him, and appeased his indignation, and re-obtained Ganga from him, in the capacity of his daughter (whence she is called Jahnavi) See Wilson's V. P.

पूर्वाकाराधिकतररुचा सङ्गतः कान्तयासौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ॥ ९५ ।

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
अजविलापो नाम अष्टमः सर्गः ।

इति स्कान्दे । मन्दाक्रान्ताच्छन्द. । तल्लक्षणम्, "मन्दाक्रान्ता जलधिषडगैर्मो भनौ तादुरू चेत्" इति ॥ ९५ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरि विरचितायां
रघुवंशव्याख्यायां सञ्जीविनीसमाख्यायां अष्टम सर्ग ।

रघुवंशम् ।

प्रथमः सर्गः ।

अन्वयः ।

अहं वागर्थप्रतिपत्तये वागर्थाविव संपृक्तौ, जगतः पितरौ, पार्वतीपरमेश्वरौ वन्दे ॥१॥ पद—पद्यते, अपदयत, अपादि, पेदे, पद्यते पद्मः । पृच—पृणक्ति, अपृणक्, अपर्चीत्, पर्पच । पृक्तः । वन्द—अवन्दन, अवन्दिष्ट, ववन्दे ।

सूर्यप्रभवः वंशः क्व ? मम अल्पविषया मतिः च क्व ? अहं मोहात् उडुपेन दुस्तरं सागरं तितीर्षुः अस्मि ॥२॥ तॄ—तरति, अतरत्, अतारीत्, ततार, तीर्णः, तरीतुम् । सनि तितीर्षति ।

मन्दः, (तथापि) कवियशःप्रार्थी अहं, प्रांशुलभ्ये फले लोभात् उद्बाहुः वामनः इव उपहासतां गमिष्यामि ॥३॥ अर्थ—अर्थयते, आर्थयत, आर्थिषत, अर्थयामास, अर्थितः ।

বাঙ্গালা অনুবাদ ।

আমি বাক্য ও অর্থের সম্যক্ জ্ঞানলাভের আশয়ে বাক্য ও অর্থের ন্যায় নিত্যসম্বন্ধযুক্ত জগতের পিতামাতাস্বরূপ পার্ব্বতী ও পরমেশ্বরকে বন্দনা করি ॥১॥

সূর্য্য হইতে সমুদ্ভূত বংশই বা কোথায় ? আর আমার অকিঞ্চিৎকর বুদ্ধিই বা কোথায় ? আমি অজ্ঞানবশতঃ ভেলাদ্বারা দুস্তর মহাসাগর উত্তীর্ণ হইবার অভিপ্রায় করিয়াছি ॥২॥

আমি মন্দবুদ্ধি তথাপি কবিকীর্ত্তিলাভ প্রত্যাশা করিয়া নিশ্চয়ই

---

1. In order that I may attain to a right understanding of words and their significations, I do salute Parvati and Paramesvara, parents of the universe, who are as intimately associated with each other as a word is with its import.

2. There is a great disproportion between a race sprung from the sun, and my intellect, which is of limited range, yet out of infatuation, I am desirous of getting across the ocean by means of a raft.

3. Dull that I am, I shall be an object of ridicule by be-

লভ—লভতে, অলভত, অলব্ধ, লিপ্সে, লপ্সতে। ক্ষনি ক্ষিপ্সতে। হন—হন্তি, অহন্, অবধীৎ, জঘান।

অথবা মূর্ব্বসূরিভিঃ কৃতবাগ্দ্বারে অস্মিন্ বংশে বজ্রসমুৎকীর্ণে মণৌ সূত্রস্যেব মে গতিরিতি ॥ ৪ ॥ কৃ—কিরতি, অকিরৎ, অকারীৎ, চকার, কীর্ণঃ।

যঃ অহং আজন্মশুদ্ধানাম্, আফলোদয়কর্ম্মণাম্, আসমুদ্রক্ষিতীশানাম্, আনাকরথবর্ত্মনাম্ ॥ ৫ ॥

যথাবিধিহুতাগ্নীনাম্, যথাকামার্চ্চিতার্থিনাম্, যথাপরাধদণ্ডানাং, যথাকালপ্রবোধি-

---

উপহাসের আস্পদ হইব; যেমন বামন প্রাংশু ব্যক্তি কর্ত্তৃক লভ্য ফলের লোভে বাহু প্রসারণ করিয়া উপহসনীয় হয় ॥৩॥

অথবা প্রাচীন কবিগণ এই বংশে প্রবেশার্থ দ্বার উদ্ঘাটন করিয়াছেন। অতএব সূচী দ্বারা বিদ্ধ মণির অভ্যন্তরে যে প্রকারে সূত্র প্রবেশ করে, তদ্রূপ এই বংশেও আমার প্রবেশ হইতে পারিবে ॥৪॥

রঘুবংশীয়েরা জন্মাবধি বিশুদ্ধচরিত্র ছিলেন, যতক্ষণ ফলোদয় না হইত অভীষ্ট কার্য্যে লিপ্ত থাকিতেন, সমুদ্রপর্য্যন্ত পৃথিবীর অধীশ্বর ছিলেন, এবং তাঁহাদের রথ স্বর্গ পর্য্যন্ত গমন করিত ॥৫॥

তাঁহারা শাস্ত্রপ্রদর্শিত বিধি অনুসারে অগ্নিতে হোম ও প্রার্থনা

---

coming a candidate for a poet's fame, like even to a dwarf who holds up his hands to get at a fruit attainable only by a tall man.

4. Or rather, an entrance for me into the narrative of this race, into which an inlet of description has been cut open by bards of antiquity, is rendered possible, just as the entrance of a string into a precious stone already bored through by a diamond-needle is practicable.

5. So I shall describe the race of the Raghus, though provided with but a scanty stock of words, for I am impelled to this indiscretion by the report of their virtues having reached my ears.

6. The Raghus, who were pure from their very nativity,

नाम्। ६। द्रु—द्रुद्रोति, अद्रुद्रोत्, अद्रौषीत्, द्रुद्राव। द्रोष्यति, द्रुतः, द्रवित्वा, द्रुत्वा। सर्व—सर्वति, सार्वत्, सार्वीत्, सार्वम्। णिचि सर्वयति, सर्विष्यत्। सर्वयामास। सर्वितः। द्युष—द्रोषति, अद्रोषत् अद्युक्षीत्, द्युद्रोष, द्रोष्यति। णिचि द्रोषयति, अद्यूद्रुषत्। सनि दुद्युक्षते। यङि द्रोद्युष्यते। द्युक्षः द्युक्षिः।

आदाय मृत्तिकादानां सस्याय क्षितशालिनी, यमसे विधिवद्यज्ञैः प्रजायै सद्मसेधिनाम्॥७॥ मृ—विमर्ति, मरति, मरते। अविमः, अमार्षीत्, अमत, विमरांचक्रे, मम्रे, मर्मे। णिचि मारयति, अमीमरत्। सनि मुमूर्षति। मार—ममायत, ममाथिष्ट, ममाथे। णिचि मथमायत्, अमीमथत्। जि—जयति, अजयत्, अजैषीत्, जिगाय। णिचि जापयति, अजीजपत्। सनि जिगीषति।

शैशवे अभ्यस्तविद्यानां यौवने विषयैषिणां, वार्द्धके मुनिवृत्तीनां, अन्ते योगेन तनुत्यजाम्॥८। इष—इच्छति, ऐच्छत्, एषीत्, इषित्वा। णिचि एषयति। सनि

अनुसारে अतिथिसत्कার করিতেন, অথবাদের আজ্ঞা অনুসারে দণ্ডপ্রদান করিতেন ও যথাকালে শয্যাত্যাগ করিতেন॥৬॥

তাঁহারা সৎপাত্রে দান করিবার উদ্দেশে ধন সঞ্চয় করিতেন, সত্যের অনুরোধে অল্পভাষী ছিলেন, যশোলাভের আশয়ে শত্রুজয় এবং পুত্রোৎপাদনের জন্য দারপরিগ্রহ করিতেন॥৭॥

তাঁহারা বাল্যকালে বিদ্যাভ্যাস করিতেন, যৌবনে বৈষয়িক সুখভোগে

---

who persevered in their undertakings until issue of fruit, who ruled over the world as far as the ocean, and the way of whose chariots was (unimpeded) up to the heavens.

7. Who used to offer oblations of clarified butter to the consecrated fire, according to the dictates of the *sastras*, to honor all petitioners by gifts according to their desires, to mete out punishment according to the nature of crimes and to rise from their beds at the proper time.

8. Who used to lay up riches for the purpose of giving them away, to speak sparingly for the sake of keeping within the boundary of truth, who were desirous of conquest, simply for fame, who entered into matrimony for begetting offspring.

ইষিষিষতি, ইষিষিষীত্। ত্যজ—ত্যজতি, অত্যজৎ, অত্যাক্ষীৎ, তত্যাজ। ত্যজি ত্যাজয়তি, অতিত্যজৎ।

রঘূণাং অন্বয়ং তনুবাগ্বিভবঃ অপি তনুধীঃ কর্ণং আগত্য আপলায় প্রচোদিতঃ মন্ বচঃ ॥ ৯ ॥

অদ্রবদ্ব্যক্তিহেতবঃ সতাং যে শ্রোতুম্ অর্হন্তি, হি (তথাহি) ইমং বিদ্বদ্ভিঃ শ্যামিকা অপি বা অগ্নৌ সংজায়তে ॥ ১০ ॥ ঋ—ঋণোতি, অঋণীৎ, অর্ণীদীৎ, ঋণাব। ত্যজি আবয়তি, অমিত্যবৎ। ত্যজি ঋগ্বেদে। ঋতঃ। অর্হ—অর্হতি, আর্হীৎ, আর্হীৎ, আনর্হ। অর্হিষ্যতি। লক্ষ—লক্ষয়তি, অলক্ষয়ৎ অললক্ষৎ, লক্ষয়ামাস। কর্ম্মণি লক্ষ্যতে, অলক্ষি। লক্ষিতঃ।

ছন্দসাং প্রণব ইব মনীষিণাং মাননীয়ঃ বৈবস্বতো নাম মনুঃ মহীক্ষিতাম্ আদ্যঃ আসীৎ ॥ ১১ ॥

আসক্ত হইতেন, বার্দ্ধক্যে মুনিব্রত অবলম্বন করিতেন, ও চরমে যোগ দ্বারা দেহত্যাগ করিতেন ॥৮॥

আমার বাক্যসম্পত্তি অল্প হইলেও আমি রঘুদিগের বংশবৃত্তান্ত বর্ণন করিব, কারণ তাঁহাদিগের গুণসমূহ মদীয় কর্ণে প্রবেশপূর্ব্বক আমাকে এই অবিমৃষ্যকারিতায় উত্তেজিত করিতেছে ॥ (৯ম শ্লোক) ॥

গুণদোষপরীক্ষায় সকল পণ্ডিতগণ এই রঘুবংশাখ্য মদীয় প্রবন্ধ শ্রবণ করিবার যোগ্য। কারণ সুবর্ণের বিশুদ্ধি বা বিমিশ্রতা অগ্নিতেই পরীক্ষিত হইয়া থাকে ॥১০॥

যেমন ওঙ্কার সমগ্র বেদের আদি, সেই প্রকার সমুদয় পণ্ডিতমণ্ডলীর মাননীয় বৈবস্বত নামে মনু পৃথিবীর অধিপতিদিগের আদি ছিলেন ॥১১॥

---

9. Who used to study the various branches of learning during their childhood, who sought for pleasure during youth, who led the life of an ascetic in their old age, and abandoned their life at last by religious abstraction.

10. It behoves good critics to lend a hearing to it, for it is in fire only, that the purity or alloy of gold is detected.

11. As the syllable *Om* is the leading word in the *vedas*,

অস্তিমতি তদন্বয়ে ক্ষীরনিধৌ ইন্দুঃ ইব, অস্তিমশরীরঃ দিলীপঃ ইতি রাজেন্দুঃ অসূত ॥১২॥ সূ—সূতে, অসূত, অসবিষ্ট, অসীষ্ট, সুষুবে, সবিতা, সূতঃ, সূনঃ।

ব্যূঢ়োরস্কঃ বৃষস্কন্ধঃ, শালপ্রাংশুঃ, মহাভুজঃ, (অতএব) আত্মকর্ম্মক্ষমং দেহম্ আশ্রিতঃ আত্মবান্ ধর্ম্মঃ ইব স্থিতঃ ॥১৩॥ শ্রি—শ্রয়তি, অশ্রয়ৎ, অশিশ্রিয়ৎ শিশ্রায় শ্রিতঃ।

সর্ব্বাতিরিক্তসারেণ সর্ব্বতেজোঽভিভাবিনা সর্ব্বোন্নতেন আত্মনা মেরুঃ ইব উর্ব্বীং ক্রান্ত্বা স্থিতঃ ॥১৪॥ রিচ—রিণক্তি, অরিচৎ, অরৈক্ষীৎ, অরিক্ত, রিরেচ। ক্রম—ক্রাম্যতি ক্রামতি, অক্রাম্যৎ অক্রামৎ, অক্রমীৎ, অক্রাম। ক্রিবি ক্রাময়তি; অধিক্রমৎ, ক্রান্তঃ।

যে প্রকার ক্ষীরসাগরে চন্দ্রের সমুদ্ভব, সেইরূপ সেই মনুর বিশুদ্ধ বংশে বিশুদ্ধতরচরিত দিলীপনামক রাজচন্দ্র জন্মগ্রহণ করিয়াছিলেন ॥ ১২ ॥

মহারাজ দিলীপ বিপুলবক্ষা, মহাবাহু, বৃষস্কন্ধ এবং শালবৃক্ষের ন্যায় উন্নত ছিলেন। অতএব তাঁহাকে দেখিলে বোধ হইত যেন, সাক্ষাৎ ক্ষত্রিয় ধর্ম্ম নিজ কার্য্যসাধনক্ষম দেহ আশ্রয়পূর্ব্বক ভূমণ্ডলে অবতীর্ণ হইয়াছেন ॥১৩॥

সর্ব্বভূত অপেক্ষা অধিকতর বলশালী, তেজোদ্বারা সর্ব্বভূতপরাভাবী, এবং সর্ব্বাপেক্ষা অধিকতর উন্নত যে নিজদেহ, তদ্দ্বারা তিনি সমগ্র পৃথিবীকে আক্রমণপূর্ব্বক সুমেরুর ন্যায় শোভিত হইতেন ॥১৪॥

---

so was Manu, by name Vaivasvata, esteemed by the wise, the first of kings, that have ever ruled over the earth.

12. From his spotless lineage sprang Dilipa, the moonlike king, himself a most stainless character, just as the moon, sprang from the ocean of milk.

13. Of a broad chest, with shoulders like those of a bull, tall as the *Sala* tree, having huge arms, he was as it were, the very incarnation of heroism, assuming a body capable of performing its own mission.

14. With a figure transcending all in strength, subduing all with its power, and surpassing all in stature, he lorded it over the earth like a second mount Meru.

আকারসদৃশপ্রজ্ঞঃ, প্রজ্ঞয়া সদৃশাগমঃ, আগমৈঃ সদৃশারম্ভঃ আরম্ভসদৃশোদয়ঃ ॥১৫॥

সঃ যাদোরত্নৈঃ আর্ণবদ্রব ভীমকান্তৈঃ নৃপগুণৈঃ উপজীবিনাম্ অধৃষ্যঃ অভিগম্যশ্চ বভূব ॥ ১৬ ॥

নিয়ন্তুঃ তস্য নেমিবৃত্তয়ঃ প্রজাঃ আ মনোঃ ক্ষুণ্ণাৎ বর্ত্মনঃ পরং রেখামাত্রমপি ন ব্যতীয়ুঃ ॥ ১৭ ॥ ইণ্—এতি ঐৎ অগাৎ, ইয়ায়। ণিচি গময়তি অজীগমৎ। সনি জিগমিষতি। ইতঃ। অতরি, যন্।

তাঁহার বুদ্ধি তদীয় আকারের অনুরূপ, তাঁহার শাস্ত্রজ্ঞান তদীয় বুদ্ধির সদৃশ, তাঁহার কার্য্যকলাপ তদীয় শাস্ত্রজ্ঞানের সদৃশ, এবং তাঁহার অভ্যুদয় তদীয় কার্য্যকলাপের অনুরূপ ছিল ॥১৫॥

তিনি ভয়াবহ অথচ কমনীয় গুণসমূহদ্বারা ভূষিত ছিলেন। এবং তন্নিবন্ধন রত্ন ও নক্র দ্বারা পরিপূর্ণ মহাসাগরের ন্যায় আশ্রিত ব্যক্তিদিগের পক্ষে যুগপৎ অধর্ষণীয় ও আশ্রয়ণীয় ছিলেন ॥১৬॥

শাসনকর্ত্তা সেই দিলীপের প্রজাগণ, যেরূপ রথের চক্রধারা চিরাভ্যস্ত পথ হইতে রেখামাত্র ও বিচলিত হয় না, তদ্রূপ মনুর সময় হইতে প্রচলিত আচারপদ্ধতি হইতে রেখামাত্রও অতিক্রম করে নাই ॥১৭॥

---

15. His intelligence was worthy of his (noble) appearance, his learning equalled his intelligence, his enterprise equalled his learning, and his success (in life) was commensurate with his enterprise.

16. Both by his stern and amiable qualities, which are characteristic of a king, he was at once unapproachable and attractive to his dependents, like the ocean by virtue of its monsters and precious stones.

17. Imitating the tire of a chariot wheel, the subjects of this ruler did not deviate a single line from the path marked out from the time of Manu.

স প্রজানাং মঙ্গলায়ৈব তাভ্যঃ বলিম্ অগ্রহীৎ, হি (যতঃ হি) রবিঃ সহস্রগুণম্ উৎসৃষ্টুং রসম্ আদত্তে ॥১৮॥ গ্রহ—গৃহ্লাতি অগৃহ্লাৎ অগ্রহীৎ অগ্রাহ। গৃহীতঃ গৃহীতা, সনি জিঘৃক্ষতি। সৃজ—সৃজতি অসৃজৎ অস্রাক্ষীৎ অস্রষ্ট। সনি সিসৃক্ষতি সস্রক্ষ্যতি। দা—দত্তে অদত্ত অদিত দদে।

তস্য সেনা পরিচ্ছদঃ, অর্থসাধনম্ দ্বয়মেব, শাস্ত্রেষু অকুণ্ঠিতা বুদ্ধিঃ, ধনুষি আততা মৌর্ব্বী চ ॥১৯॥ তন—তনোতি তনুতে অতনীৎ অততনুত অতানীৎ অতন। অতনিষ্ট তেনে তেনে। সনি তিতনিষতি তিতাংসতি।

সংহতমন্ত্রস্য, মূঢ়াকারেঙ্গিতস্য তস্য, প্রারম্ভাঃ প্রাক্তনাঃ সংস্কারাঃ ইব ফলানুমেয়াঃ আসন্ ॥২০॥

তিনি প্রজাদিগের মঙ্গলোদ্দেশেই তাহাদিগের নিকট বলি অর্থাৎ ষষ্ঠাংশ-রূপ কর গ্রহণ করিতেন। সূর্য্যদেব বৃষ্টিরূপে সহস্রগুণ প্রতিদান করিবার জন্যই পৃথিবী হইতে জল গ্রহণ করিয়া থাকেন ॥১৮॥

তাঁহার চতুরঙ্গ সৈন্য তাঁহার পক্ষে পরিচ্ছদ অর্থাৎ ভূষার ন্যায় ছিল। তিনি দুইটীমাত্র পদার্থের উপর নির্ভর করিয়া তাঁহার মনুষ্য প্রয়োজন সাধন করিতেন, প্রথমতঃ তাঁহার শাস্ত্রবিষয়ে অব্যাহত বুদ্ধি, দ্বিতীয়তঃ তাঁহার ধনুতে আরোপিত জ্যা ॥১৯॥

তিনি রাজনৈতিক মন্ত্রণাসমূহ গোপনে নির্ব্বাহ করিতেন, ও তাঁহার আকার ও ইঙ্গিতাদি দ্বারা তাঁহার মনের ভাব প্রকাশ পাইত না। সুতরাং

---

18. He levied tribute from his subjects simply for their ultimate good, for the sun draws up water from the earth with the object of sending it back thousandfold in return.

19. His army was to him an appendage, for he depended on two things only for the accomplishment of his designs,—his intellect intent upon the *sastras*, and his bowstring taut on the bow.

20. He hid his counsel, and his countenance and gestures were impenetrable; so that his measures could only be divined by their results like impressions received in a previous birth.

स अवरुः सन् आत्मानं जुगोप, अनातुरः एव धर्मं मेजे, अगृध्नुः एव अर्थम् आदत्ते, असक्त एव सुखम् अन्वभूत् ॥२१॥ वस—वसति वसति अवसत् अवसत् अवात्सीत् अवसीत् वत्रास । णिचि वासयति अविवसत् । वसः । वसितुम् वसित्वा । गुप—गोपायति अगोपायत् अगोपायीत् अगोपीत् अगोपीत् । गोपयामास । सनि जुगोपायिषति जुगोपिषति जुगुप्सति, गुप्तः । भज—भजति भजते अभजत् अभजत अभाक्षीत् अभक्त बभाज भेजे । णिचि भाजयति अबीभजत् । सनि बिभक्षति । सज्ज—सजति असजत् असाङ्क्षीत् सस्रज्ज । णिचि सञ्जयति असस्रञ्जत् । सनि सिसङ्क्षति, सस्क्तः ।

ज्ञाने मौनम्, क्षमी क्षमा, त्यागे श्लाघाविपर्ययः, तस्य गुणाः गुणानुबन्धित्वात् सप्तसवा इव अभूवन् ॥२२॥

विषयैः अनाकृष्टस्य, विद्यानां पारदृश्वनः, धर्मरतेः तस्य जरसा विना बलम्

তাঁহার উপায়প্রয়োগাদি জন্মান্তরীণ সংস্কারসমূহের ন্যায় কেবলমাত্র ফলের দ্বারা অনুমিত হইতে পারিত ॥২০॥

তিনি ভয়শূন্য হইয়াও আপনার শরীররক্ষার্থ উপায় গ্রহণ করিতেন, তিনি রুগ্ন না হইয়াও ধর্ম্মোপার্জ্জন করিতেন, তিনি লোভী না হইয়াও অর্থসংগ্রহ করিতেন, এবং আসক্তিরহিত হইয়া সুখভোগ করিতেন ॥২১॥

তাঁহার জ্ঞান থাকিলেও তিনি মৌনাবলম্বন করিয়া থাকিতেন, প্রতীকার-সামর্থ্য থাকিলেও ক্ষমা করিতেন, তিনি দান করিতেন, কিন্তু তাঁহার আত্মশ্লাঘা ছিল না ॥২২॥

তিনি রূপ রস প্রভৃতি ভোগ্যবস্তু দ্বারা আকৃষ্ট হইতেন না। তিনি বিদ্যার

---

21. He was on his guard without being afraid, pursued the path of rectitude without being ill, acquired riches without being avaricious, and enjoyed pleasures without being a slave to them.

22. He had taciturnity with knowledge, forgiveness with power, and freedom from boasting with beneficence, so that his virtues by their subservience to each other, seemed as if they were full brothers.

23. Not tempted by pleasures, a perfect master of the

আসীৎ ॥ ২২ ॥ কৃষ—কর্ষতি, অকর্ষৎ, অকার্ষীৎ, অকার্ষ্টাম্, অকৃষৎ, চকর্ষ। কৃষ্যতি। যিচি কর্ষয়তি, অচীকৃষৎ, অচকর্ষৎ। কৃষ্টঃ।

প্রজানাং বিনয়াধানাৎ, রক্ষণাৎ, ভরণাদপি, স পিতা পিতরস্তাসাং কেবলং জন্মহেতবঃ ॥ ২৪ ॥

স্মিতপূর্বাভিধায়িত্বাৎ, প্রভুতায় পরিচ্ছদঃ, মনীষিণস্তস্য অর্থকামাবপি ধর্ম্ম এব আস্তাম্ ॥ ২৫ ॥ ধা—দধাতি, ধত্তে। অদধাৎ, অধত্ত। অধাৎ, অধিত। দধৌ, দধে। যিচি ধাপয়তি, সনি ধিৎসতি। হিতঃ। ধাতুম্। হিত্বা। সস্যাব। দধৎ। দধানঃ। রঘ—রঘতি, অরঘৎ অরঘীৎ, ররঘ। যিচি রঘয়তি, অররঘৎ। ভৃ—বিভর্ত্তি, অবিভঃ, অভার্ষীৎ, বিভরাম্বভূব। যিচি ভারয়তি, অবীভরৎ। সনি বুভূর্ষতি। অবভৃথঃ।

পরিদর্শন করিয়াছিলেন, ধর্ম্মে তাঁহার নিয়ত আসক্তি ছিল, ফলতঃ জরা ব্যতীত তাঁহার বৃদ্ধোচিত অভিজ্ঞতা ঘটিয়াছিল ॥ ২৩ ॥

প্রজাদিগকে শিক্ষা প্রদান দ্বারা, তাহাদিগকে বিপদ হইতে পরিত্রাণ, এবং তাহাদিগের রক্ষণ ও ভরণপোষণ প্রভৃতি কার্য্যদ্বারা তিনিই তাহাদিগের প্রকৃত পিতা ছিলেন, তাহাদিগের পিতৃগণ কেবল জন্মদাতা মাত্র ছিল ॥ ২৪ ॥

তিনি সমাজস্থিতিরক্ষার জন্য দণ্ডার্হদিগকে উপযুক্ত দণ্ড প্রদান করিতেন, সন্তানার্থে বিবাহ করিয়াছিলেন, ফলতঃ মনীষাসম্পন্ন মহারাজ দিলীপের অর্থ ও কাম ধর্ম্মতেই পরিণত হইয়াছিল ॥ ২৫ ॥

---

sciences, and devoted to righteousness, he attained the wisdom of age without its infirmities.

24. By imparting education to his subjects, and by defending and supporting them, he was their true father, while their fathers were merely the authors of their existence.

25. He punished such as were deserving of punishment, for the preservation of order, and entered into matrimony for the sake of offspring, so that the pursuit of riches and pleasures by that wise prince was based on a sense of rectitude.

স যজ্ঞায় গাং দুদোহ, মঘবা শস্যায় দিবং দুদোহ, উভৌ সম্পত্তিনিময়েন ভুবনদ্বয়ং দধতুঃ ॥ ২৬ ॥ যজ—যজতি তে, অযজত্, অযজত, অযাক্ষীৎ অযষ্ট, ইয়াজ, যুযুজে। যজ্যতি, কর্ম্মণি ক্রিয়তে অযাজি। ণিচি যাজয়তি অযীযজৎ। সনি যিযক্ষতি। যষ্টুম্। ইষ্টঃ। দুহ—দোগ্ধি অধোক্-গ্। অধুক্ষৎ। দুদোহ। ধোক্ষ্যতি। ণিচি দোহয়তি অদুদুহৎ। সনি দুধুক্ষতি। যঙি দোদুহ্যতে।

রাজ্ঞাং রক্ষিতুরস্য যত্নঃ ন অনুযযুঃ কিন্তু, যৎ তস্করতা পরস্বেভ্যঃ ব্যাবৃত্তা সতী যুক্তৌ স্থিতা ॥ ২৭ ॥ যা—যাতি, অযাৎ, অযাসীৎ, যযৌ। ণিচি যাপয়তি। সনি যিযাসতি। বৃত—বর্ত্ততে, অবর্ত্ত, অবর্ত্তিষ্ট, বর্ত্তিতে। ণিচি বর্ত্তয়তি, অবীবৃতৎ, অববর্ত্তৎ। সনি বিবর্ত্তিষতে।

ম্লিষ্টঃ দ্বিষোঽপি আর্ত্তস্য ঔষধং যথা তস্য সম্মতঃ আসীৎ। দৃষ্টঃ প্রিয়োঽপি ভুজগ-যুতা অঙ্গুলীব তস্য ত্যাজ্যঃ আসীৎ ॥ ২৮ ॥ দ্বিষ—দ্বেষ্টি, অদ্বেট্-ড্, অদ্বিষ্ট, অদ্বিষ্টাম্,

---

তিনি যজ্ঞসাধনার্থ পৃথিবীকে দোহনপূর্ব্বক কর গ্রহণ করিতেন, দেবরাজ ইন্দ্র শস্যোৎপাদনার্থ স্বর্গরাজ্য দোহনপূর্ব্বক পৃথিবীতে জলবর্ষণ করিতেন; ফলতঃ উভয়ে পরস্পর সম্পত্তি বিনিময়পূর্ব্বক স্বর্গ ও মর্ত্ত্য উভয় ভুবন পোষণ করিতেন ॥ ২৬ ॥

অন্যান্য রাজা সকলের ত্রাণকর্ত্তা দিলীপের যশের অনুকরণ করিতে সমর্থ হন নাই, কারণ, তাঁহার রাজত্বে চৌর্য্যবৃত্তি পরধন-সংস্পর্শরহিত হইয়া কেবল নামমাত্রে পর্য্যবসিত হইয়াছিল ॥ ২৭ ॥

শিষ্ট ব্যক্তি দ্বেষের পাত্র হইলেও পীড়িতের পক্ষে ঔষধের ন্যায় আদৃত হই-

---

26. He milked the earth for the performance of sacrifices, and Indra milked the heavens for the production of crops, so that by an interchange of their respective wealth they sustained the two worlds.

27. No other prince could imitate the fame of that protector of men, for (in his reign) theft, precluded from the property of others, subsisted only in name.

28. A good man, though an enemy, was acceptable to him

अदिष्ट, दिदिय, दिदिषे। मन—मन्यते, अमन्यत, अमंस्त, मेने। णिचि मानयति, अमीमनत्। दुष—दुष्यति, अदुषत्, बदुषत्, दुदोष। दोषयति। णिचि दूषयति, अदूदुषत्। त्यज—त्यजति, अत्यजत्, अत्याक्षीत्, तत्याज। त्याजयति। णिचि त्याजयति, अतित्यजत्।

नूनं विधाः तं महाभूतसमाधिना विदधे, तथाहि तस्य सर्वे गुणाः परार्थैकफलाः आसन्॥ २९॥

स वेलावप्रवलयां परिखीकृतसागराम् अनन्यशासनां उर्वीम् एकपुरीम् इव अशास॥ ३०॥ शास—शास्ति, अशात्, अशासत्, अशास। णिचि शासयति, अशशासत्। शिक्षा।

তেন, পরন্তু দুষ্ট ব্যক্তি নিজের প্রিয় হইলেও সর্পদষ্ট অঙ্গুলির ন্যায় তৎকর্তৃক পরিত্যক্ত হইত॥ ২৮॥

নিশ্চয়ই বিধাতা মহাভূতসমূহের সারাংশ দ্বারা তাঁহাকে নির্ম্মাণ করিয়াছিলেন, কারণ তাহা না হইলে কি প্রকারে পরোপকার তাঁহার সমুদয় গুণের এক মাত্র উদ্দেশ্য হইবে॥ ২৯॥

সমুদ্রকূলই তাঁহার রাজ্যের প্রাকারবেষ্টনস্বরূপ ছিল, মহাসাগরই পরিখাস্বরূপ ছিল, এবং তাঁহার রাজ্যের মধ্যে অন্য কোন স্বাধীন রাজার শাসন চলিত না; মহারাজ এই বিপুল রাজত্ব এক মাত্র পুরীর ন্যায় অনায়াসে শাসন করিতেন॥ ৩০॥

---

as medicine is to the sick, and a bad man, though a friend was shunned by him like a finger bitten by a snake.

29. No doubt, the creator made him by the harmonious composition of the great elements, for surely all his virtues had for their object the fulfilment of the interests of others.

30. He ruled over the earth like a single city, the earth having the sea-coast for its ramparts, and the sea for its intrenchment and in which no other authority was obeyed.

তস্য মগধবংশজা, দাক্ষিণ্যবন্ধেন সুদক্ষিণা ইতি নাম্না, অধ্বরস্য দক্ষিণা ইব পত্নী আসীৎ ॥ ৩১ ॥

বসুধাধিপঃ সতি অবরোধে সত্যপি মনস্বিন্যা তয়া সহ্যা চ আত্মানং কৃতদ্বয়ং মেনে ॥ ৩২ ॥

